# मनीषा

(राष्ट्रिया संस्कृतशोधपत्रिका)

# MANĪṢĀ

(A National Journal of Sanskrit)

**ISSN: 2583-2271**

**Vol -2 No. 1**

**2022**

**स्नातकोत्तरसंस्कृतविभागः**

**सबं-सजनीकान्तमहाविद्यालयः**

लुटुनिया, पश्चिममेदिनीपुरम्, ७२११६६, पश्चिमबङ्गः

# मनीषा

## (राष्ट्रिया संस्कृतशोधपत्रिका)

# MANĪṢĀ

(A National Journal of Sanskrit)

**PEER REVIEWED JOURNAL**

**ISSN: 2583-2271**

**Vol -2 No. 1**

स्नातकोत्तरसंस्कृतविभागः

सबं-सजनीकान्तमहाविद्यालयः

लुटुनिया, पश्चिममेदिनीपुरम्, ७२११६६, पश्चिमबङ्गः

# मनीषा

## (राष्ट्रिया संस्कृतशोधपत्रिका)


### मुख्यसम्पादकः

| | |
|---|---|
| **अध्यापकः ड. तपनकुमारदत्तः** | अध्यक्षः, सबं-सजनीकान्तमहाविद्यालयः, विद्यासागरविश्वविद्यालयः |

### सम्पादकः

| | |
|---|---|
| **ड. भवशङ्करमुखार्जी** | सहाचार्यः, संयोजकः, स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्तमहाविद्यालयः, विद्यासागर-विश्वविद्यालयः |

### सहसम्पादकौ

| | |
|---|---|
| **ड. गगनचन्द्रदे** | सहाचार्यः, विभागाध्यक्षः (स्नातकोत्तरीयस्तरः), स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्त-महाविद्यालयः, विद्यासागरविश्वविद्यालयः |
| **श्रीमान् सुमन्तचौधुरी** | सहायकाध्यापकः, विभागाध्यक्षः (स्नातकस्तरः), स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्त-महाविद्यालयः, विद्यासागरविश्वविद्यालयः |

### सम्पादकमण्डली

| | |
|---|---|
| **अध्यापकः (ड.) बिष्णुपदमहापात्रः** | आचार्यः, न्यायविभागः, श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविश्वविद्यालयः, निउ-दिल्ली |
| **ड. केशवचन्द्रमहापात्रः** | अध्यक्षः, नरेन्द्रनाथसंस्कृतमहाविद्यालयः, प्रियबागः, ओडिशा |
| **ड. अजयकुमारमिश्रः** | आचार्यः, प्रधानः, संस्कृतविभागः, सिधोकानहोबीरसाविश्वविद्यालयः, पुरुलिया, पश्चिमबङ्गः |
| **ड. सुशान्तकुमारराजः** | सहाचार्यः, केन्द्रियसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| **ड. बुद्धेश्वरषडङ्गी** | सहाचार्यः, श्रीसीतारामवेदिक-आदर्शसंस्कृतमहाविद्यालयः, कलिकाता, पश्चिमबङ्गः |
| **ड. गोपीकृष्णन-रघुः** | सहायकाध्यापकः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्, बेलुडमठम्, हाओडा, पश्चिमबङ्गः |

# उपदेष्टृमण्डली

| | |
|---|---|
| **अध्यापकः (ड.) गोपबन्धुमिश्रः** | उपाचार्यः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरातः |
| **अध्यापकः (ड.) गोपालमिश्रः** | भूतपूर्व उपाचार्यः, गौडबङ्गविश्वविद्यालयः अध्यापकः, संस्कृतविभागः, रवीन्द्रभारतीविश्वविद्यालयः, कलिकाता, पश्चिमबङ्गः |
| **अध्यापकः (ड.) गोपालकृष्णदाशः** | भूतपूर्वः अध्यापकः, उत्कलविश्वविद्यालयः, भुवनेश्वरः, ओडिशा |
| **अध्यापिका (ड.) सर्वाणी गाङ्गुली** | वरिष्ठा फेलो, ICSSR, संस्कृतविभागः, विद्यासागरविश्वविद्यालयः, मेदिनीपुरम्, पश्चिमबङ्गः |
| **अध्यापकः (ड.) गोविन्द्रचन्द्रकरः** | भूतपूर्वः अध्यापकः, व्याकरणविभागः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा |

# MANĪṢĀ

## (*A National Journal of Sanskrit)*


### CHIEF EDITOR

| | |
|---|---|
| **Professor (Dr.) Tapan Kr. Dutta** | Principal, Sabang Sajanikanta Mahavidyalaya, Vidyasagar University |

### EDITOR

| | |
|---|---|
| **Dr. Bhaba Shankar Mukherjee** | Associate Professor, Co-ordinator, P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, Vidyasagar University |

### ASSOCIATE EDITORS

| | |
|---|---|
| **Dr. Gagan Chandra Dey** | Associate Professor and H.O.D. (PG Section), P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, VU |
| **Dr. Sumanta Chowdhury** | Assistant Professor and H.O.D. (UG Section), P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, VU |

### EDITORIAL BOARD

| | |
|---|---|
| **Dr. Bishnupada Mahapatra** | Professor in Nyaya, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi |
| **Dr. Keshab Chandra Mahapatra** | Principal, Narendranath Sanskrit College, Priyabag, Odisha |
| **Dr. Ajay Kumar Mishra** | Professor & Head, Department of Sanskrit, Sidhu Kanho Birsha University, Purulia, W.B. |
| **Dr. Susanta Kumar Raj** | Associate Professor in Sahitya, Central Sanskrit University, Shri Sadashiv Campus, Puri, Orisha |
| **Dr. Buddheswar Sarangi** | Associate Professor, Sri Sitaram Vedic Adarsha Sanskrit Mahavidyalaya, Kolkata, W.B. |
| **Dr. Gopikrishnan Reghu** | Assistant Professor, Ramakrishna Mission Vivekananda Educational and Research Institution, Belur Math, Howrah, W.B. |

# ADVISORY BOARD


| | |
|---|---|
| **Prof. (Dr.) Gopabandhu Mishra** | Vice-Chancellor, Somnath Sanskrit University, Gujarat |
| **Prof. (Dr.) Gopal Mishra** | Formar Vice-Chancellor, Gourbanga University, Professor, Department of Sanskrit, Rabindra Bharati University, Kolkata, W.B. |
| **Prof. (Dr.) Gopal Krishna Dash** | Ex Professor, Utkal University, Bhubaneswar, Odisha |
| **Prof. (Dr.) Sarbani Ganguly** | Senior Fellow, ICSSR, Department of Sanskrit, Vidyasagar University, Midnapore, W.B. |
| **Prof. (Dr.) Govinda Chandra Kar** | Ex. Professor in Vyakarana, Shri Jagannath Sanskrit University, Puri, Odisha |

# From the Desk of Chief Editor

Institution gets enriched through its all-round activities. Sabang Sajanikanta Mahavidyalaya better known as Sabang College enriched with undergraduate programme to Ph.D. Programme.

P.G. Department of Sanskrit is a successful department with multifaceted activities. Faculties of the department devoted their major times in class teaching, research and administrative works. Beyond classroom teachings publication of Research Journal improved the quality enhancement of the department. **MANĪṢĀ (A Research Journal of Sanskrit)** is published in 2nd issue with 2nd Volume for the session 2022. The Department committed to publish the journal annually maintain the potential writings of the scholars and teachers.

Attempts are made just by the potentiality of the **MANĪṢĀ** to the scholarly world shall be fruitful through its wide acceptance.

Subscribed papers are authenticated by the Peer Review Team, Hence, I do wish the grand success of the journal through its acceptability.

Prof. (Dr.) Tapan Kr. Dutta
The Chief Editor
Manīṣā

# सम्पादकीयम्

संस्कृतभाषा हि प्राचीनैर्मनीषिप्रवरैः परिकल्पितस्य ज्ञानस्य विज्ञानस्य च अनुपमो निधिः। अस्य अनुसन्धाने प्रत्यग्रतत्त्वं समुन्मिषति। एतादृगनुसन्धानं नैव अवरुद्ध्येत किन्तु प्रकाशपथमायात्वित्यस्ति मनीषाशोधपत्रिकायाः प्रकाशनस्य मूलं लक्ष्यम्। संस्कृतवाङ्मयस्य विविधेषु विचारकाणां वैदुष्यपूर्णगवेषणाभिः संस्कृतजगद् लाभान्वितं स्यादिति मनीषाशोधपत्रिकायाः प्रकाशनस्योद्देश्यम्। एतेन संस्कृतभाषायाः संरक्षण-संवर्धन-प्रचार-प्रसाररूपं यत् स्नातकोत्तरसंस्कृतविभागस्य लक्ष्यं तत्सिद्ध्यत्येव।

सबं सजनीकान्तमहाविद्यालयस्याध्यक्षपादानां डॉ. तपनकुमारदत्तमहाभागानां सान्द्रोत्साहेन मनीषिणां पुरस्तात् प्रादुर्भूता मनीषाख्या वार्षिकीयं शोधपत्रिका। ते सर्वेऽपि धन्यवादभाजनतां लभन्ते ये विभिन्नराज्यविश्वविद्यालयमहाविद्यालयेषु विचक्षणा अध्यापकाः शोधछात्राश्च स्वकीयं शोधनिबन्धं प्रदाय मनीषातनूं भूषयन्ति।

मनीषायाः प्रकाशनाय शोधलेखचयनार्थं विशिष्टा प्रक्रिया समाश्रिता। विशेषज्ञैः प्रकाशनायानुशंसिताः लेखा एवात्र समाविष्टाः। वेद-वेदान्त-व्याकरण-न्याय-काव्यादिविषयैः सह आधुनिकविषयाः अपि अस्यां शोधपत्रिकायां समाविष्टाः।

हृद्या सुधा सुमहिता ललिता च रम्या
भाषाग्रिया सुमधुरा त्रिदिवेशभाषा।
प्रज्ञाशिखावितरणैः प्रसतान्तु मेधा
ज्ञानप्रदा तु नितरां भवतान्मनीषा॥

शोधपत्रिकेयं संस्कृतशोधार्थिनां कृते उपयुक्ततरा भवेदित्युद्दिश्यानुभवितां विदुषां परामर्शा अस्माकं स्वागतार्हा भवेयुः इति शम् ।

विदुषां वशंवदः

**सम्पादकः**

ज्ञान एकता प्रगति


**दामोदर मिश्र**

*कुलपति*

**हिंदी विश्वविद्यालय**

**आलो भवन ,३७/२ भैरव दत्त लेन**

**नंदीबागान , सलकिया, हावड़ा ७१११०६**

**पश्चिम बंगाल , भारत**


**दिनांक -१५-१२-२०२२**

## शुभेच्छा - वार्ता

यह जान कर प्रसन्नता हुई कि, संस्कृत विभाग,सबंग सजनीकांत महाविद्यालय की ओर से अपनी शोध पत्रिका **'मनीषा'** का दूसरा अंक (२०२२) प्रकाशित होने जा रहा है ।

विदित है कि हमारी सभ्यता और संस्कृति की समस्त धरोहर संस्कृत में सुरक्षित है । इन सबकी जानकारी हेतु यह पत्रिका सहायक सिद्ध होगी - ऐसा मेरा मानना है | संस्कृत के प्रचार-प्रसार, शोध और राष्ट्रीय एकता को मजबूत करने की दिशा में यह एक सार्थक पहल है ।

इस पत्रिका की उत्तरोत्तर श्रीवृद्धि की कामना करता हूँ । साथ ही इसके संपादक तथा संपादक मंडली के सदस्यों का अभिनन्दन करता हूँ और सबको धन्यवाद देता हूँ |

दामोदर मिश्र

दामोदर मिश्र

कुलपति, हिंदी विश्वविद्यालय

हावड़ा, पश्चिम बंगाल, भारत |

प्रतिष्ठा में -

डॉ. भवशंकर मुखर्जी

संपादक-**'मनीषा'**

स्नातकोत्तर संस्कृत विभाग

सबंग सजनीकांत महाविद्यालय ।

# सूचीपत्रम्


| क्रमः | कीर्तिः | स्रष्टा / स्रष्ट्री | पुटम् |
|---|---|---|---|
| १ | चरित्रनिर्माणे उपनिषदः योगदानम् | प्रो. विष्णुपदमहापात्रः | १-५ |
| २ | वेदानुशीलने श्री-अरविन्दः | डॉ. लक्ष्मीकान्तषडङ्गी | ६-१२ |
| ३ | शक्तिविषये मीमांसकमतोपस्थापनम् | डॉ. अजयकुमारकरः | १३-१६ |
| ४ | प्रक्रियाक्रमः पाणिनीयव्याकरणञ्च | डॉ. गोपीकृष्णन्-रघुः | १७-२१ |
| ५ | रघुनाथभट्टाचार्याभिमताख्यातार्थविचारः | डॉ. नीरजकुमारभार्गवः | २२-३१ |
| ६ | संस्कृतव्याकरणस्य प्रसारे जानकीनाथ-भट्टाचार्यशास्त्रिमहोदयस्य अवदानम् | डॉ. प्रतिमभट्टाचार्यः | ३२-३७ |
| ७ | मिताक्षरागतकारकाधिकारीयसूत्राणां प्रत्युदाहरणपर्यालोचनम् | शुभमाझिः | ३८-४६ |
| ८ | पदशक्तिस्वरूपविचारः | विनयकुमारः | ४७-५१ |
| ९ | अक्षपाददर्शनदिशा प्रमाणविचारः | मिन्टु-दे | ५२-५६ |
| १० | न्याय-वैशेषिकदर्शनयोः अदृष्टतत्त्वविमर्शः | मलय-दे, डॉ. उत्तमविश्वासः च | ५७-६५ |
| ११ | रूपकालङ्कारनिरूपणे प्राचीननव्यन्यायमतयोः तुलनात्मकं विवेचनम् | डॉ. रत्नाकरखुण्टिआ | ६६-६८ |
| १२ | भगवद्ब्रह्मविरचिते गुण्डिचाशतके साहित्यश्रीः | डॉ. भारतभूषणरथः | ६९-७२ |
| १३ | विंशशताब्दिकं महाकाव्यं पाण्डवविक्रमम् | डॉ. सुबोधकुमारनन्दः | ७३-८१ |
| १४ | अध्यासरम्या च रामायणकथा | डॉ. अरविन्दमहापात्रः | ८२-८६ |
| १५ | गौडीयसंस्कृतसाहित्ये चम्पूकाव्यस्य उद्भवः विकासश्च | चन्दनमहान्ती | ८७-९६ |
| १६ | कालिदासीयदृश्यकाव्येषु वैदिकसंस्कारविमर्शः | डॉ. पापनचन्दः | ९७-१०२ |
| १७ | गुणस्वरूपनिरूपणे पण्डितराजजगन्नाथस्य विशेषत्वम् | मौमिताखाण्डा | १०३-१०७ |
| १८ | नाट्यकारभासस्य स्वाभिनव-नाट्यकौशलम् | सत्येन्द्रनाथ-आदकः | १०८-११४ |
| १९ | जन्मबन्धस्वरूपविचारः | दीपकमण्डलः | ११५-११७ |
| २० | गुणत्रयविचारः | डॉ. नेपालदासः | ११८-१२३ |
| २१ | साम्प्रतिकसन्दर्भे श्री-अरविन्दस्य शिक्षादर्शनं शिक्षाचिन्तनञ्च | तन्मयरायः | १२४-१२७ |
| २२ | कौटिल्यकालिकवाणिज्यनिर्वाहाधुनिक-कालिकवाणिज्यनिर्वाहयोः तुलनात्मकं विश्लेषणम् | देवसुजन-मुखार्जी | १२८-१३५ |

# चरित्रनिर्माणे उपनिषदः योगदानम्

**प्रो. बिष्णुपदमहापात्रः**

**आचार्यः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**नई दिल्ली-११००१६**

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्षस्य प्राधान्यात् सर्वदार्शनिकसम्मतत्वाच्च, स च मोक्षः ब्रह्मतत्त्वज्ञानमन्तरा नैव सम्भवति, ब्रह्मतत्त्वं केवलं सत्यतत्त्वं तदतिरिक्ततत्त्वस्य त्रिकालबाध्यत्वाद-सत्यत्वम्। अत एव श्रुतिः वदति "प्रज्ञानं ब्रह्म"[1] "अहं ब्रह्मास्मि"[2] "तत्त्वमसि"[3] "अयमात्मा ब्रह्म"[4] इति। एतेषां श्रुतिवाक्यानां तत्त्वमुररीकृत्य तत्त्वविवेचने वेदान्तिनां प्रवृत्तिः। परन्तु तादृशब्रह्मतत्त्वस्य प्राप्त्यर्थं यथा ज्ञानस्योपयोगित्वं तथैव तन्मूलकत्वेन सच्चरित्रस्य सत्संस्कारस्य, सत्समाजस्य, सद्गुरूपदेशस्य सच्छिक्षायाः, उपासनायाश्चोपयोगित्वं विद्यते। एतेषां ज्ञानं वेदान्तशास्त्राध्ययनेनैव सम्भवति, नान्यथा। तत्र वेदान्तो नाम वेदानामन्तः अर्थाद् उपनिषत्प्रमाणम्। उक्तञ्च, "वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च"[5]। वेदान्तशास्त्रस्य मुख्यप्रतिपाद्यविषयो भवति ब्रह्म, तद्-ब्रह्मतत्त्वमेव सततमुपासनीयम्, तस्योपासनेनैव चरित्रस्य निर्माणमवश्यम्भावि, एतेन "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" अस्याः श्रुतेश्चरितार्थत्वम्। अस्याः वेदान्तविद्यायाः अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽ-धिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तो-पासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता" इति वेदान्तविद्भिः उद्घोष्यते। एतादृशः ब्रह्मज्ञानाधिकारी जन्ममरणादिसांसारिकदुःख-पीडितप्रखरतरतरणिकिरणौष्णपीडितो मनुष्यः स्वक्लेशमपनुनुत्सुः सरोवरमिव उपनिषद्विद्या-निष्णातं गुरुमनुरूपपत्रपुष्पाद्युपहृतिपाणिरुपसृत्य श्रद्धातिशयपूर्वकं तदुपदिष्टमनुसरन्मनसा वाचा कर्मणा च तं वरीवस्यति। स च गुरुर्जिज्ञासावस्मिन्नति-दयालुरध्यारोपापवादन्यायेन ब्रह्मरूपमतिरहस्यमस्मै समुपदिशति, अत्रापि श्रुतिरेव प्रमाणम्, तथा च श्रुतिः "समित्पाणिः, श्रोत्रियं ब्रह्मनिष्ठम्", "तस्मै स विद्वानुपसन्नाय प्राह" इति।

---

1 ऋग्वेदः

2 यजुर्वेदः

3 सामवेदः

4 अथर्ववेदः

5 वेदान्तसारः, पृ. २

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

चरित्रनिर्माणे यदि ब्रह्मविद्याप्रतिपादक-वेदान्तशास्त्रस्य भूमिका विद्यते तर्हि तत्र चरित्रशब्दस्य कोऽभिप्राय इति जिज्ञासायां धर्मशास्त्रकारो मनुः इत्थं गदति-

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः॥[6]
स्वां प्रसूतिं चरित्रं च कुलमात्मानमेव च।
स्वं च धर्मं प्रयत्नेन जायां रक्षन्हि रक्षति ॥"[7]

तादृशचरित्रनिर्माणाय धर्मशास्त्रकारैः ब्रह्मचर्याश्रम-गृहस्थाश्रम-वानप्रस्थाश्रम-सन्न्यासाश्रमव्यवस्थाभेदात् चतुर्विधाश्रमव्यवस्था कृता, ब्रह्मचर्याश्रमेषु तावदुपनयनसंस्कारानन्तरं गुरुसमीपं गत्वा गुरूपदेशानुसारं ब्रह्मविद्यायाः अध्ययनं कर्तव्यं तेन च सच्चरित्रस्य निर्माणं भवत्येव, अतः एव तैत्तिरीयोपनिषत् स्वाध्यायस्य प्रशंसां करोति-

"ऋतं च स्वाध्यायप्रवचने च सत्यञ्च स्वाध्यायप्रवचने च, तपश्च स्वाध्यायप्रवचने च, दमश्च स्वाध्यायप्रवचने च, शमश्च स्वाध्यायप्रवचने च, अतिथयश्च स्वाध्यायप्रवचने च मानुषं च स्वाध्यायप्रवचने च" इत्यादि।[8]

अत्र प्रवचनमध्यापनं ब्रह्मयज्ञो वा इति। तपस्तावत् कृच्छ्रादिः। दमस्तु बाह्यकरणोपशमः। शमोऽन्तःकरणोपशमः। मानुषं लौकिकव्यवहारः। एतेषां शास्त्रसम्मतमेवानुष्ठातव्यम्, तेन चरित्रस्य निर्माणं जायते। अस्मिन् प्रसङ्गे शङ्कराचार्यो निगदति-

स्वाध्यायाधीनं ह्यर्थज्ञानं अर्थज्ञानायत्तं च परं श्रेयः प्रवचनं च तदविस्मरणार्थं धर्मप्रवृद्ध्यर्थं च। अतः स्वाध्यायप्रवचनयोरादरः कार्यः॥[9]

एतादृशशिक्षासम्पन्नः शिष्यः सततम् ऋतं सत्यं च वदिष्यति, अतिथिप्रियश्च भविष्यति, तेन च परमतत्त्वस्य अवाप्तिः। एतेन "स्वाध्यायोऽध्येतव्यः" इति मीमांसावाक्यं "त्वमेव प्रत्यक्षं ब्रह्मास्मि त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि, ऋतं वदिष्यामि, सत्यं वदिष्यामि" इत्यादिवेदान्तवाक्यञ्च तमेवार्थं पुष्णाति। अतः वेदान्तवाक्यस्य चरित्रनिर्माणे कारणत्वं विद्यत इति निश्चप्रचं वक्तुं शक्यते।

वेदान्तशास्त्रं न केवलं चरित्रनिर्माणे उपदेशं प्रयच्छति अपि तु चरित्रनिर्माणे शिष्यान् अनुशास्ति। "सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।"[10]

अभिप्रायस्तु अत्र वेदविहितकर्तव्यम् उपदिशति श्रुतिः। संस्कारयुक्तः पुरुषः विशुद्धचित्तवशादनायासेन आत्मज्ञाने समर्थो भवति। स्मृतिः वदति –

"तपसा कल्पषं हन्ति विद्ययाऽमृतमश्नुते"[11]

श्रुतिश्च-

"तपसा ब्रह्म विजिज्ञासस्व"[12] इति।

---

[6] मनुस्मृतिः २.२०
[7] मनुस्मृतिः ९.७
[8] तैत्ति. शिक्षा, नवमोऽनुवाकः
[9] तैत्ति, उप. शां. भा.
[10] तै. उप. शिष्यानुशासनम् - १९
[11] मनु. १२/ १०४
[12] तै. उप. ३.३/२/५

एतेन ज्ञायते यत् ज्ञानोत्पत्तये कर्म कर्तव्यम्। श्रुतिविहितानुशासनस्य अतिक्रमाद् दोषाणामुत्पत्तिः, दोषोत्पत्तौ सत्यां न सच्चरित्रस्य निर्माणं, न वा तत्त्वज्ञानस्योत्पत्तिः, न वा आत्मसाक्षात्कारः, न वा मुक्तिः सम्भवति, ब्रह्मविद्यया अभयस्य प्राप्तिः। न कस्माद् बिभेति। शुभकर्मणा सञ्चितपापस्य क्षयो भवति, सत्कर्मणा अधर्मं तीर्त्वा कर्मात्मिकां विद्यामवाप्नोति। तथा च श्रुतिः- "अभयं प्रतिष्ठां विन्दते"[13] "न बिभेति कुतश्चन"[14] "किमहं साधु नाकरवम्"[15] "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते"[16] इति

श्रीमद्भगवद्गीतायामपि अर्जुनमुपदिशति भगवान् श्रीकृष्णचन्द्रः-

"अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥"[17]

अस्य श्लोकस्य व्याख्यानावसरे आचार्यशङ्कर इत्थं प्रवदति – "अन्तःकरणस्य संव्यवहारेषु परवञ्चनमायानृतादिपरिवर्जनं शुद्धभावेन व्यवहार इत्यर्थः। ज्ञानं शास्त्रत आचार्यतः च आत्मादिपदार्थानाम् अवगमः अवगतानामिन्द्रियाद्युपसंहारेण एकाग्रतया स्वात्मसंवेद्यतापादानं योगः, तयोः ज्ञानयोगयोर्व्यवस्थितिर्व्यवस्थानं तन्निष्ठता एषा प्रधाना दैवी सात्त्विकी सम्पदिति। एवञ्च मनसा वाचा कर्मणा कदापि कस्यापि हानिः न स्यात्, सर्वदा प्रियभाषणम्, अपकारकं पुरुषं प्रति क्रोधो मा भवतु, सर्वभूतेषु दया, आसक्तेरभावः इत्यादिकमपि उपदिशति वेदान्तशास्त्रम्। तथाहि-

"अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥[18]

"सत्यं वद" इत्यादिश्रुतिवाक्यस्य विवेचनावसरे आचार्य शंकर इत्थं भणति – यथा प्रमाणावगतं वक्तव्यं तद्वद। तद्वद्धर्मं चर। धर्म इत्यनुष्ठेयानां सामान्यानां सत्यादिविशेष-निर्देशादिति। मातृणां पितृणां गुरूणां च कृते कीदृशमाचरणं कर्तव्यं तद्विषयकमनुशासनमपि शिक्षयति इयं ब्रह्मविद्या। तथाहि-

"देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि।" इति।

अर्थात् मातृदेवो माता देवो यस्य स त्वं मातृदेवो भव स्याः, एवं पितृदेवो आचार्यदेवो भव। देवतावदुपास्या एते इति आचार्याः प्रवदन्ति शिक्षयन्ति च। दानादिविषयकमुपदेशमपि च शिक्षयति ब्रह्मविद्या। कथं देयं, कुत्र देयं, कुत्र न देयमित्यादिशिक्षायाः निर्धारणमपि करोति वेदान्तशास्त्रम्। तथाहि "श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयमि"[19]त्यादि। एतादृश्याः शिक्षायाः प्रदाने ब्रह्मविद्या एव समर्था भवति, नान्या। अत एव अन्ततो गत्वा कथयति "एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्।

[13] तै. उप. ३.२/७/१

[14] तै. उ. २/९/१

[15] तै. उ. २/९/१

[16] ई. उ. ६ तै. उ. २/९/१

[17] श्रीमद्भगवद्गीता १६ / १

[18] श्रीमद्भगवद्गीता १६/२

[19] तै. उ.

एतदनुशासनम्। एवमुपासितव्यम्।" इति। अस्या विद्यायाः श्रद्धया यदि उपासनं क्रियते तर्हि सच्चरित्रस्य निर्माणं सम्भवति। तेनैव ज्ञानस्योदय : ज्ञानोदयाच्च मुक्तिः।

"श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥"[20]

एतादृशीं शिक्षामपि प्रयच्छति इयं ब्रह्मविद्या। श्रुतिमनुसृत्य लौकिकाः वदन्ति-

"अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्" इति॥[21]

एतेन ज्ञायते ब्रह्मविद्या न केवलं चरित्रनिर्माणे कारणमपि तु चरित्रनिर्माणशिक्षाप्रदानेन सह ब्रह्मतत्त्वप्राप्तये साक्षात् मार्गं प्रदर्शयति प्रेरयति च। अतः अस्याः ब्रह्मविद्यायाः महत्त्वं नितरां स्फुटत्येव। **श्रद्धावान् लभते ज्ञानमि**ति गीतायां यदुपदेशमस्माभिः प्राप्तं तत्र या श्रद्धा प्रतिपादिता अस्ति सा च सात्त्विकी - राजसी - तामसीभेदात् त्रिविधा भवति। तत्र सात्त्विकाः देवान्, यक्षरक्षांसि राजसाः, प्रेतादीन् तामसाः जनाः यजन्ते। तथाहि-

"यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः।
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः॥[22]

भोजनमपि चरित्रनिर्माणे कारणं भवति। यथा भोजनं भवति तथैव तस्य पुरुषस्य आचरणं भवत्येव। सात्त्विकभोजनेन सात्त्विकप्रवृत्तिः, राजसिकभोजनेन राजसिकप्रवृत्तिः, तामसिक भोजनेन तामसिकप्रवृत्तिश्च जायते। तथाहि-

"आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विक-प्रियाः॥
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः॥
यातयामं गतरसं पूति पर्युषितं च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥"[23]

"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः"[24]

एतेन इदमपि वक्तुं शक्यते चरित्रनिर्माणे भोजनविषयकनिर्वचनं ब्रह्मविद्याया अतीव महत्त्वपूर्णं चकास्ति। गृहस्थाश्रमे ये निमज्जिताः सन्ति तेषामपि मोक्षे अधिकारः विद्यते, तेषां कथं मुक्तिस्तद्विषयिणीं शिक्षां प्रयच्छति इयं विद्या।

"न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः।
श्राद्धकृत् सत्यवादी च गृहस्थोऽपि मुच्यते॥
वनेषु तु विहृत्यैनं तृतीयं भागमायुषः।
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान् परिव्रजेत्॥"[25]

ब्रह्मविद्यायाः साधनविषयकं यच्चिन्तनं तदतीव मनोहरं चरित्रनिर्माणे च सहायकम्। अतः चत्वारि साधनानि वेदान्तशास्त्रे प्रतिपादितानि। तानि च नित्यानित्यवस्तुविवेकेहामुत्रार्थ-फलभोगविरागशमादिषट्कसम्पत्तिमुमुक्षुत्त्वानि। अर्थात् यावन्नित्यानित्यवस्तुविवेको न स्यान्न तावद्वैराग्यम्। वैराग्यमन्तरेण न शमादीनां सम्भवः। तदसम्भवे च न मोक्षविषयिणीच्छा। तां विना न

[20] गी.४/३९

[21] हितोपदेशः

[22] गीता १७ / ४

[23] गीता १७ / ८.९.१०

[24] उपनिषद्वाक्यम्।

[25] मनुसंहिता ६ / ३३

ब्रह्मजिज्ञासा। विवेकविरागशमादिसाधनत्रययुक्तस्य हृदये मोक्षेच्छोत्पत्तिरवश्यंभाविनी। तदुत्पत्तौ च ब्रह्मजिज्ञासाऽनिवार्येति ब्रह्मविद्यायाः उपासना कर्तव्या, तेन सर्वविषयकं कल्याणमनिवार्यम्। किं वा तत्त्वं नास्ति ब्रह्मविद्यायां येन कल्याणं न भवेत्? उपनिषद्वदति-

"ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्॥[26]

गीतायाञ्च-

"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥[27]

अतः सर्वदा वेदान्तविद्यायाः उपासना करणीया, येन न पुनरपि जननं न पुनरपि मरणमित्यादिशङ्करवाक्यस्यापि साधुत्वं सङ्गच्छेत्। एवञ्च वाल्मीकीरामायणे महर्षिवाल्मीकिः पृच्छति - चारित्र्येण च को मुक्तः? तं तु औपनिषदं पुरुषं पृच्छामि। अस्य समाधानं प्रयच्छति महर्षिः- राम एव चरित्रवान् भवति। यतः रामः वेदान्तविद्यापरिनिष्ठितो भवति, अत एव "रामो विग्रहवान् धर्म" इति धर्मलक्षणं रामायणे प्रतिपादितं भवति। धर्मस्य चरित्रेण सह अन्तः सम्बन्धो विद्यत एव। तादृशधर्मतत्त्वज्ञानात् चरित्रस्य निर्माणं भवत्येव। नीतिशास्त्रकारैरपि प्रतिपादितं यत्-

"आहारनिद्राभयमैथुनं च, सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो, धर्मेण हीनाः पशुभिः समानाः॥
येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूताः, मनुष्यरूपेण मृगाश्चरन्ति॥" इति।

अतः सततं ब्रह्मविद्यायाः उपासना कर्तव्येत्यलम्। इति शम्।

[26] यजुर्वेदः ४० / १

[27] गीता १८/६६

MANĪṢĀ - *A Research Journal of Sanskrit* ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# वेदानुशीलने श्री-अरविन्दः

**डॉ. लक्ष्मीकान्तषडङ्गी**

**सहायकाध्यापकः, संस्कृतविभागः, योगदासत्सङ्गपालपाडामहाविद्यालयः**

**पालपाडा, पूर्वमेदिनीपुरम्, पश्चिमबङ्गः**

**प्रबन्धसारः**

*भारतस्य क्रान्तिकारिमहामानवेषु श्री-अरविन्दः अन्यतमः। असौ १८७२-ख्रीष्टाब्दे अगष्टमासस्य पञ्चदशे दिनाङ्के कलिकातानगर्याम् अजायत। भारतस्य स्वाधीनतासंग्रामे आत्मानं नियोजितोऽपि असौ परवर्तिसमये स्वदिव्यानुभूत्या योगित्वं प्राप्तः। अतोऽसौ 'पण्डिचेरी' इति नगर्याम् आश्रममेकं संस्थाप्य आत्मानम् आध्यात्मिकजगति नियोजितवान्। भारतीयशिक्षायां चिन्तने च श्री-अरविन्दस्य महत्त्वपूर्णं योगदानमासीत्। असौ आदौ एव उद्घोषयामास यत् मानवः सांसारिकजीवनेऽपि दैवीशक्तिसम्पन्नः स्यादिति। असौ मन्यते यत् मानवः भौतिकजीवनम् अतिवाहयन्नपि मानवसेवया एव स्वमानसम् अतिमानसरूपेण आत्मानञ्च अतिमानवरूपेणापि परिवर्त्तयितुं शक्नोति। परन्तु सर्वमेतत् शिक्षया एव सम्भवेत् इति तन्मतमासीत्। साम्प्रतिकपरिस्थितौ यदा वयं स्वप्राचीनसभ्यतां, संस्कृतिं, परम्परां च विस्मृत्य भौतिकवादिसभ्यतायाः अन्धानुकरणं कुर्मः, एतस्यां स्थितौ एव श्री-अरविन्दस्य शिक्षा दर्शनञ्च अस्मान् सन्मार्गं निर्दिशति। साम्प्रतिकसमाजे धार्मिकस्य आध्यात्मिकजागृतेश्च नितान्तमावश्यकता विद्यते। श्री-अरविन्दानुसारम् आत्मनः सर्वाङ्गीनविकाशाय उच्चतरादर्शप्रयोगाय च शिक्षा एव सहायिका स्यात्। तस्य शिक्षासम्बन्धि-विचारः महात्मगान्धिप्रतिपादितशिक्षायाः लक्ष्येण सह समानोऽस्ति। वेदोपनिषदामशीलनेनासौ मानवसमाजं प्रति नवीनां दिशां प्रतिपादयति।*

**भूमिका -**

ऋषि-अरविन्दः एकाधारेण कविः गुरुश्चासीत्। बङ्गप्रदेशस्य महत्सु क्रान्तिकारिषु अन्यतमोऽसौ आसीत् अरविन्दः। यः युवावस्थायामेव भारतस्य स्वाधीनतासंग्रामे आत्मानं नियोज्य कारावासमपि प्राप्तवान्। परन्तु तदैव कारावासकाले तेनानुभूतं यत् तस्यादृष्टम् अन्यत् किञ्चिदस्ति इति। अतोऽसौ अरविन्दः अनया स्वानुभूत्या एव योगित्वं गतः। तस्य हृदये तस्यामेव अवस्थायां विशिष्टाध्यात्मिकविचारः योगस्वरूपविचारश्च जागरितः जातः। अतोऽसौ अरविन्दः आत्मनः एतादृशानां विचाराणां स्पष्टरूपं प्रदातुं भारतस्य पण्डिचेरी इति स्थाने आश्रममेकं संस्थापयामास[1]। तस्मिन्नेवाश्रमे स्थित्वा अरविन्दः वेदोपनिषदादीनां ग्रन्थानामुपरि टीकाग्रन्थान् लिखितवान्। ऋषिः अरविन्दः वेदोपनिषदादीनां टीकाग्रन्थैः सह रामायण-महाभारत-पुराण-कालिदास-भर्त्तृहरिप्रभृतीनां नैकेषां संस्कृतकवीनां काव्यानाम् उपरि समालोचनात्मकानि पुस्तकान्यपि रचितवान्। एतदतिरिच्यापि तेन उपनिषच्छास्त्रमाश्रित्य तन्त्रविद्यां च आश्रित्य चत्वारः मौलिकग्रन्थाः विरचिताः। ते यथा – भवानीभारती, श्री-अरविन्दोपनिषद्, तन्त्रिकासिद्धिप्रकरणम्, सप्तचतुष्टयं चेति। एतेषु मौलिकग्रन्थेषु तस्य

[1] International Journal of Creative Research Thoughts (IJCRT)

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

अरविन्दोपनिषद् अन्यतमा। उपनिषदि अस्याम् अरविन्दस्य ब्रह्मस्वरूपनिर्णयप्रसङ्गे मौलिकं चिन्तनं परिलक्ष्यते।

**श्री-अरविन्दः-**

सम्प्रति एकविंशशताब्द्यां यद्यपि नैके संस्कृतविद्वांसः कवयश्च वेदादीनां प्राचीनशास्त्राणां समनुशीलनेन काव्यग्रन्थादीन् निर्माय तेषां स्वकीयं पाण्डित्यं प्रकाशयितुं क्षमास्तथापि ऋषि-अरविन्दस्य तु वेदादिषु शास्त्रेषु योगदानं समनुशीलनं च सततं मौलिकत्वम् अभिनन्दनीयं चावहति किञ्चित्। यतो हि सम्प्रति एवं परिलक्ष्यते यत्, प्रायशः कवयः कवित्वं प्राप्तुं कामाः गड्डुलिकाप्रवाहेण गतानुगतिकं पन्थानम् एकामेव सरणीं वा समनुसरन्ति सर्वत्रैव। अतः तेषां काव्यग्रन्थेषु नाधिकं किमपि मौलिकं विवेचनम् अभिनवसिद्धान्तश्च परिदृश्यते। परन्तु ऋषि-अरविन्दः ऊनविंशशतके वेदादिषु ग्रन्थेषु तस्य स्वाभिनवं मतं समीचीनयुक्त्या समुपस्थापयति[2]। असौ वेदोपनिषत्सु प्राचीनानां शास्त्रकाराणां टीकाकाराणां च व्याख्यानादिषु दोषान् समुल्लिख्य तेषां कारणान्यपि समुद्धरति। न केवलमेतदपि तु विविधानां दोषाणां समाधानेन सह स्वकीयं नवीनं मतमपि स्वयमेव स्वयुक्त्या सरलरीत्या च प्रतिपादयति। अनेन शास्त्रादिषु नवीनदिशः समुद्धरणेन सह जनगणानामपि अज्ञानान्धकारः दूरीभवति। अतः संस्कृतजगत् प्रति ऋषि-अरविन्दस्य स्वाभिनवं वैप्लविकञ्च महत् योगदानमस्तीति अनुमीयते। यथा – अरविन्दात् बहुप्रागेव ब्रह्मसूत्रकारः ब्रह्मजगतोः स्वरूपं प्रतिपादयन् उक्तवान् यत् – "ब्रह्म सत्यं जगन्मिथ्या[3]" इति। परन्तु अत्र ऋषि-अरविन्दस्तु तस्यैव ग्रन्थे स्वरूपमिदं स्वयुक्त्या खण्डयित्वा कथयति यत् – ब्रह्म सत्यं जगदपि ब्रह्म[4] इति। अतः वेदादिषु नैकेषु स्थानेषु एवम् ऋषि-अरविन्दस्य स्वकीयं मौलिकमनुशीलनं सदैव यथार्थरीत्या समुपलब्धत्वात् तस्यैवारविन्दस्य जीवनं संक्षेपेणालोचयितुमिच्छामि।

**वेदानुशीलने अरविन्दः -**

भारतीयानां धर्मः अतीव विशालः नानाशाखाप्रशाखासुशोभितश्च। मूलं तस्य गभीरतमज्ञानारूढं, शाखास्तस्य सुदूरं प्रान्तं यावत् सविस्तृताः। यथा गीतायाः अश्वत्थवृक्षः ऊर्ध्वमूलम् अधःशाखम्[5] च तथैव अयमपि धर्मः ज्ञाने एव प्रतिष्ठितः, कर्मप्रेरकश्च, निवृत्तिः तस्य भित्तिः, प्रवृत्तिः तस्य गृहम् आच्छादनं प्राचीरं मुक्तिस्तस्य चूडा चेति। मानवजातेः सुविशालं जीवनम् अस्य सुविशालहिन्दुधर्मस्य वृक्षं समाश्रयति[6]। सर्वे निगदन्त्येव हिन्दुधर्मस्य प्रतिष्ठाप्रसङ्गम्। परन्तु स्वल्पसंख्यकाः जनाः तस्य प्रतिष्ठायाः स्वरूपं धर्मञ्च अवजानन्ति। प्रायशः वयं शाखाग्रे उपविश्य सुस्वादयुक्तस्य नश्वरफलस्य आस्वादने निमग्नाः सन्तः मूलानुसन्धानं न कुर्मः। वयं शृणुमः यत्, वेदस्य भागद्वयमस्ति कर्मकाण्डः ज्ञानकाण्डश्च। परन्तु

---

[2] श्रीअरविन्देर वांला रचना. पृष्ठांकः -२१

[3] ब्रह्मज्ञानावलीमाला -२०

[4] श्रीअरविन्दपूर्णयोगः -१

[5] भगवद्गीता -१५-१

[6] श्रीअरविन्देर वांला रचना. पृष्ठांकः -४३

कः कर्मकाण्डः कश्चासौ ज्ञानकाण्डः तद्विषये तु वयं न जानीमः। वयं म्याक्समुलारकृतस्य श्रीयुक्त-उमेशचन्द्रदत्तस्य च व्याख्यानं पठामः। परन्तु कौऽसौ ऋग्वेदः तत्तु न जानीमः। म्याक्समुलार-दत्तमहोदययोः सकाशात् वयमिदं ज्ञानं प्राप्नुमः यत् ऋग्वेदस्य ऋषयः प्रकृतेः बाह्यपदार्थान् भूतसकलान् च पूजितवन्तः। एवञ्च सूर्य-वायु-चन्द्राग्नीत्यादीनां स्तोत्रमेव सनातनहिन्दुधर्मस्य तस्यैव अनाद्यनन्तस्य अपौरुषेयस्य च मूलं ज्ञानमस्ति। वयम् एतदेव विश्वस्य वेदानाम् ऋषीणां हिन्दुधर्मस्य च अवमाननां कुर्मः। अनया अवमाननया वयं मन्यामहे यत्, वयं महान्तः विद्वांसः महालोकप्राप्ताश्च। वस्तुतः वेदेषु किमस्ति सत्यासत्यं कथं वा आचार्य-शङ्करप्रभृतयः महाज्ञानिनः महापुरुषाश्च स्तवस्तोत्रादीन् अनाद्यनन्तं सम्पूर्णम् अभ्रान्तज्ञानम् इति स्वीकुर्वन्ति तस्य न किमपि अनुसन्धानं कुर्मः[7]। वस्तुतस्तु वेदसंहिता भारतवर्षस्य धर्मस्य सभ्यतायाः अध्यात्मवादस्य च सनातनः उत्सोऽस्ति। परन्तु उत्सस्यास्य मूलम् अगम्यपर्वतस्य गुहायां निहितमस्ति। तस्यादिस्रोतश्च अतिप्राचीने घनकण्टकमये अरण्ये पुष्पितं वृक्षलतासु गुल्मेषु समावृतञ्च। वेदस्य भाषा वाचनभङ्गी, चिन्तागतिः चान्या भवति। परन्तु अस्य चिन्ताप्रणाली अस्माकं समक्षे जटिलावबोधं सृजति। अस्याः भाषायाः अर्थः एव सन्दिग्धोऽस्ति। अस्य मूलचिन्ता प्रतिमुखेषु व्यवहृता सामान्यकथा चास्ति। एवं सत्त्वेऽपि वेदस्य मूलचिन्ता प्राचीनकालादेव तर्कं मतभेदञ्च समुत्पादयति। परमपण्डितस्य सायणाचार्यस्य टीकावलोकनेन धारणेयमस्माकं मनसि समुत्पद्यते यत्, वेदस्य कदापि कोऽपि संलग्नः अर्थः नासीत् इति न, यदासीत् तत्तु वेदस्य परवर्तिब्राह्मणरचनायाः बहु-पूर्वं सर्वग्रासिकालस्य अतले विस्मृतिसागरे निमग्नोऽभूत्[8]।

सायणाचार्यः वेदार्थकरणाय प्रवृत्तः सन् बहुसमस्यायां सम्मुखीनोऽस्ति। आर्यधर्मस्य प्रमुखपुस्तकस्यार्थं कर्तुमुचितं स्यात्। किन्तु एवं रहस्यावृत्तासु विविधासु निगूढचिन्तासु जडिलेषु सहस्रस्थलेषु यत्र अर्थोऽपि न सम्भवति तत्र यादृच्छिकेनार्थेन प्रायशः सन्देहस्य छाया एवावशिष्यते। सङ्कटेऽस्मिन् बहुवारं सायणः निराशः सन् ऋषिमुखेषु एवं व्याकरणविरोधीं भाषाम् एवं कुटिल-जटिल-भग्नवाक्यरचनाम् एवं च विक्षिप्ताम् असंलग्नां चिन्तां चारोपयति यत्, तस्य टीकापठनेनैव भाषामिमां चिन्ताधाराञ्च आर्यः इति नोक्त्वा वर्वरस्य उन्मत्तस्य वा प्रलापः इति वक्तुं प्रवृत्तिः जायते। नात्र तु सायणस्य कोऽपि दोषः। प्राचीननिरुक्तकारः यास्कोऽपि अनुरूपां त्रुटिं सृजति। एवञ्च यास्कस्य बहुपूर्ववर्तिब्राह्मणकारोऽपि वेदस्य सरलमर्थं न प्राप्य कल्पनासाहाय्येन mythopoeic faculty इत्याश्रयेण दुरूहाणाम् ऋचां व्याख्यानं विधातुं विमूलमुद्यमं करोति[9]। ऐतिहासिकाः अपि प्रणालीमिमामनुसृत्य विविधसमुपकल्पिते-

[7] श्रीअरविन्देर वांला रचना. पृष्ठांकः -४३

[8] श्रीअरविन्देर वांला रचना. पृष्ठांकः -२१

[9] श्रीअरविन्देर वांला रचना. पृष्ठांकः -२१

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

तिहासस्याडम्बरेण वेदस्य प्रकृतं सरलमर्थं विकृतं जटिलञ्च कुर्वन्ति। एकेनैवोदाहरणेन अर्थ-विकृतेः स्वरूपम् अववुध्यते। ऋग्वेदस्य पञ्चममण्डलस्य द्वितीये सूक्ते अग्नेः निष्पेषितावस्था गुण्ठितावस्था वा पुनश्चातिविलम्वेन तस्य प्रकाशस्य कथा समुपलभ्यते। तद्यथा – "कुमारं माता युवतिः समुब्धं गुहा विभत्ति न ददाति पित्रे। कमेतं त्वं युवते कुमारं पेषी विभषि महिषी जजान। पूर्बीहि गर्भः शरदो ववर्धऽपश्यं जातं यदसून माता[10]"। अस्यार्थोऽस्ति "युवति-माता कुमारं गोपयित्वा गुहायाम् अर्थात् गुप्तस्थाने स्वजठरे धारयति, पितरं नैव दित्सति। हे युवति! कोऽयं कुमारः यं त्वं तव सङ्कुचितावस्थायां स्वस्य मध्ये धारयसि? माता यदा सङ्कुचितामवस्थां परित्यज्य महती भवति, तदा कुमारं जनयति। बहुनि वर्षाणि यावत् गर्भस्थः शिशुः बर्धते, यदा माता तं प्रसृतवती, तदा तं द्रष्टुं समर्थोऽहम्"। वेदस्य भाषा सर्वत्रैव संहता, घना, सारवन्ता चास्ति। तस्य भाषेयं स्वल्पकथायां विस्तरमर्थं प्रकाशयितुमिच्छति। एवं सत्त्वेऽपि अर्थस्य सरलता चिन्तायाः सामञ्जस्यं च तत्र न हीयते। ऐतिहासिकास्तु सूक्तस्य सरलार्थमिमं बोधयितुमक्षमाः। यदा माता पेषी तदा कुमारं समुब्धं, अर्थात् सङ्कुचितावस्थायां कुमारस्यापि गोपनावस्था जायते। ऋषीणां भाषां चिन्तायां सामञ्जस्यञ्च एते नैव लक्षीकुर्वन्ति। अतस्ते पेषीम् अवलोक्य पिशची इत्यवगम्य मन्यन्ते काऽपि पिशाची अग्नेः तेजः हरति इति। महिषीम्

[10] अग्निसूक्तम् -१,२

अवलोक्य राज्ञः महिषी इति अवमन्यन्ते। कुमारं समुब्धं दृष्ट्वा कोऽपि ब्राह्मणकुमारः रथचक्रेण निष्पेषितः सन् मृतः इति अवमन्यन्ते। अस्मिन्नेवार्थे एका सुविस्तृता आख्यायिका अपि जाता। मूलतः सरलरुचः अर्थोऽपि दुरुहः जातः। कुमार-जननी-पिशाच्यः के भवन्ति। अग्नेः, ब्राह्मणकुमारस्य वा गल्पोऽस्ति, कः कमपि कस्मिन् च विषये कथयति एतत् सर्वमेव द्वन्द्वात्मकमस्ति। सर्वत्रैव एवमत्याचारेण अनया कल्पनादौरात्म्येन च वेदस्य गभीरार्थस्य विकृतिर्जायते। अव्यत्रापि यत्र भाषा, चिन्ता च जटिला जायते तत्रापि टीकाकारस्य कृपयां दुर्वोध्यता भीषणाम् अस्पृश्यमुक्तिं धारयति[11]।

अरविन्दस्य मतानुसारं स्वतन्त्र-स्वतन्त्रऋचामुपमा कथं क्रियते? वेदस्य मुख्यधर्ममाश्रित्य अतिप्राचीनकालादेव बहुशो मतभेदाः सन्दृश्यन्ते। ग्रीस्देशीयस्य युहेमेरस्य (Euhemerous) मतानुसारं ग्रीक्जातेः देवताः चिरस्मरणीयाः वीराः राजानश्चासन्। समयक्रमेण कुसंस्काराणि कवीनामुद्दामकल्पनाश्च तान् देवतारूपेण परिवर्त्तयित्वा स्वर्गे सिंहासनारूढान् कृतवन्तः। प्राचीनभारतेऽपि युहेमेरस्यानुगामीनामभावः नासीत्। दृष्टान्तस्वरूपं ते उक्तवन्तः यत् मुख्यतः अश्विद्वयं न देवता, न च नक्षत्राणि परन्तु तौ द्वौ सुविख्यातौ राजानौ अस्मद्दशानामिव रक्तमांसधारिणौ मनुष्यौ आस्ताम्। मृत्योरनन्तरं तयोः देवत्वं सम्भवेत् इति[12]। भारतवर्षे चिन्ताशीलानां जनानाम्

[11] श्रीअरविन्देर वांला रचना. पृष्ठांकः -२२

[12] श्रीअरविन्देर वांला रचना. पृष्ठांकः -२२

अभावः नासीत्। ये तावत् वेदस्य वेदत्वे ऋषीणां ऋषित्वे च आस्थावन्तः आसन्। ते ऋक्संहितायाः आध्यात्मिकमर्थं प्रकाशितवन्तः वेदेषु वेदान्तरस्य मूलं तत्त्वेमन्वेषितवन्तश्च। तेषां मतानुसारं ऋषयः देवानां समीपे यदेव ज्योतिर्दानाय प्रार्थितवन्तः तत्तु न भौतिकसूर्यस्य अपि तु ज्ञानसूर्यस्य। गायत्रीमन्त्रे विश्वामित्रऋषिरेव तस्यावलोकनं कृतवान्। ज्योतिरियं "तत्सवितुर्वरेण्यं देवस्य भर्गः" देवतेयमेषा, यो नो धियः प्रचोदयात्[13], यस्तु अस्माकं सकलां चिन्तां सत्यं तत्वं प्रति प्रेरयति। ऋषयः तमः सकाशात् भीतवन्तः न तु रात्रिसकाशात्। अत्र तमस्तु अज्ञानस्य गाढान्धकारः। इन्द्रस्तु जीवात्मा प्राणाः वा। वृत्रस्तु न मेघः नापि कविकल्पितः असुरः। सः तु नः पुरुषार्थं गहनाज्ञानान्धकारेषु आवर्त्तयित्वा रोधयति। यस्य मध्ये देवगणाः अग्रे निहिताः लुप्ताश्च सन्तः देववाक्यजनितोज्ज्वलज्ञानालोके निस्तारिताः प्रकटिताश्च सन्ति, स एव वृत्रः। सायणाचार्यः एतान् आत्मविदः इति नाम्नाभिहितं करोति[14]। अस्या आत्मविद्कृतव्याख्यायाः दृष्टान्तस्वरूपं रहूगणपुत्रगोतमऋषेः मरुत्स्तोत्रस्योल्लेखः क्रियते। तस्मिन् सूक्ते गोतमः मरुद्गणान् आहुय तेषां निकटे ज्योतिषः भिक्षां कृतवान् –

यूयं तत् सत्यशवस आविष्कर्त्त महित्वता
विध्यता विद्युता रक्षः ॥
गूहता गुह्यं तमो वियात विश्वमत्रिणम्
ज्योतिष्कर्त्ता यदुश्मसि॥[15]

कर्मकाण्डीनां मतानुसारम् अस्य ऋक्द्वयस्य व्याख्यायां 'ज्योतिः' भौतिकसूर्यस्य ज्योतिः इत्यवबुध्यते। "यः रक्षः सूर्यालोकं अन्धकाराच्छन्नं करोति। मरुद्गणाः 'तं रक्षं' विनश्य सूर्यस्य ज्योतिः पुनः दर्शयन्तु"। आत्मविदां मतानुसारं अपरमर्थमपि क्रियते यत् यूयं सत्यवलेन वलीनः युस्माकं महिमायां तस्यैव परमतत्त्वस्य प्रकाशोऽस्तु। युस्माकं विद्युत्समः आलोकः रक्षान् विद्धतु। यूयं हृद्-गुहायां प्रतिष्ठितमन्धकारं गोपयत। अर्थात् अन्धकारोऽसौ यथा सत्यस्य आलोकववन्यायाम् अदृश्यं स्यात्। पुरुषार्थस्य सकलान् भक्षकान् दूरीकृत्य वयं तामेव ज्योतिरिच्छामः, तामेव प्रकटयत"। अत्र मरुद्गणास्तु न मेघहन्ता वायवः अपि तु पञ्चप्राणाः। तमः हृदयगत-भावरूपान्धकारः, पुरुषार्थभक्षकः षड्रिपुः, ज्योतिः परमतत्त्वसाक्षात्-रूपज्ञानालोकश्च। अस्यां व्याख्यायाम् अध्यात्मतत्त्वं, वेदान्तस्य मूलकथा, राजयोगस्य प्राणायामप्रणाली च एकस्मिन्नेव योगे वेदे प्राप्यते[16]।

अयं तु गतः वेदस्य स्वदेशीसमस्या। ऊनविंशशताब्द्यां पाश्चात्यपण्डिताः सुदृढचित्ताः सन्तः प्रसङ्गेऽस्मिन् नियोजिताः भवन्ति भारतवर्षे घोरतरां विदेशीविप्लवं संघटयन्ति च। एतस्याः वन्यायाः विपुले तरङ्गे वयमद्य श्वासरूद्धाः सन्तः भासामानाः भवामः। पाश्चात्यपण्डिताः प्राचीननिरुक्तकारस्य ऐतिहासिकानाञ्च भित्तेरूपरि

---

13 यजुर्वेदः -३६-३

14 श्रीअरविन्देर वांला रचना. पृष्ठांकः -२३

15 मरुत्स्तोत्रम् १-८६-९,१०

16 श्रीअरविन्देर वांला रचना. पृष्ठांकः -२४

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

स्वस्य सुरम्यं नवकल्पनामन्दिरं निर्मान्ति। ते तु यास्कस्य निरुक्तं न तथा स्वीकुर्वन्ति, पेत्रग्रादे इत्यनयोः नवीनं मनोनीतं निरुक्तं निर्माय तेनैव साहाय्येन वेदव्याख्यां कुर्वन्ति। ते प्राचीन-भारतवर्षीयटीकाकाराणां 'solarmyth' विचित्रां नवमूर्तिं निर्माय तस्योपरि नवीनवर्णं संस्थापयति। एतेन देशस्यास्य शिक्षितसम्प्रदायानां नयनावरुद्धः जातः। अस्य युरोपीयमतेऽपि वेदोक्तदेवता वाह्यप्रकृतेः विविधक्रीडायाः रूपकमात्रम्। आर्याः सूर्य-चन्द्र-तारा-नक्षत्र-रात्रि-वायु-नदी-समुद्र-वृक्षादीनां दृश्यवस्तुनि पूजयन्ति। एतत् सर्वमवलोतक्य विस्मयाभिभूताः वर्वरजातयः एषां विचित्रां गतिं कवेः रूपकच्छलेन स्तुवन्ति स्म। पुनः तन्मध्येषु एव विविधानां देवतानां चैतन्यमयीं क्रियां बुध्वा तेन शक्तिधरेण सह सख्यं स्थापितवन्तः, पुनश्च तेषां निकटे विजयलाभं , धनानि, दीर्घजीवनम्, आरोग्यं, सन्ततिञ्च कामयन्ति स्म। ते रात्रेः अन्धकारात् भीताः सन्तः यागयज्ञादिभिः सूर्यस्य पुनरूद्धारं कृतवन्तः। तेषां समीपे मूतप्रेतादीनामपि आतङ्कः आसीत्। अतः भूतप्रेतादिभ्यः रक्षार्थं देवतानां निकटे कातरोक्तिं कृतवन्तः। स्वर्गलाभस्याशादयोऽपि प्रागैतिहासिक-वर्वरोचित-धारणा-कुसंस्कारश्चेति[17]।

**उपसंहारः -**

एवमपि 'युद्धे विजयलाभः' केन सह युद्धः? एते कथयन्ति पञ्चनदनिवसीनाम् आर्यजातेः समरः मुख्यतः भारतवासीनां द्राविडजात्या सह भवति। प्रतिवेशीषु यः युद्धविग्रहः सततं जायते तत्र आर्येषु एव कलहः। यथैव प्राचीन-ऐतिहासिकाः वेदस्य स्वतन्त्रं स्वतन्त्रं ऋचः आश्रित्य विविधेतिहासाः गठितवन्तः, एषामपि साक्षात् सेयं प्रणाली। तथापि एते तु विचित्रम् अतिप्राकृतघटनायां पूर्णं विचित्रगल्पानि नैव रचितवन्तः। ते केवलमात्रं प्राचीनभारतस्येतिहासं रचयितुं चेष्टितवन्तः। अस्याः प्राकृतिकक्रीडायाः परस्परविरोधि-रूपकस्य तेन सह अस्येतिहाससम्पर्कितरूपकस्य सम्मिश्रणेन पाश्चात्यपण्डितगणाः वेदस्य यदपूर्वां विच्युतिं कृतवन्तः तत्तु वर्णनातीतम्। तथापि ते कथयन्ति यत् वयमुपायशून्याः आस्म। प्राचीनवर्वरकवीनां मनांसि आसन् असामञ्जस्यपूर्णानि। अतः एवं व्याख्यानं तेषां सामञ्जस्यविहीनमस्ति। अस्माकं व्याख्या तु शुद्धं सम्यक् निर्मलञ्च। यत् भवतु नाम प्राच्य पण्डितानां व्याख्यायां वेदस्यार्थं यथैवासंलग्नं द्वन्द्वात्मकं दुरुहं जटिलाञ्चासीत् पाश्चात्यानां व्याख्यासु तद्वदस्ति एव। सर्वं परिवर्त्तन्ते परन्तु सर्वमेव समानम्। टेमस्-सेन्-नेवानिदीनां शतशतवज्रधराः अस्माकं मस्तकस्योपरि नवपाण्डित्यस्य स्वर्गीय-सप्तनदीं वर्षयन्ति इति तु सत्यं परन्तु तेषां न कोऽपि वृत्रकृतान्धकारम् अपसारयितुं क्षमः। वयं यस्मिन्नेव तिमिरान्धकारे तस्मिन्नेव तिमिरान्धकारे इति शम्[18]।

ও৪৩৪ও

[17] श्रीअरविन्देर वांला रचना. पृष्ठांकः -२४

[18] श्रीअरविन्देर वांला रचना. पृष्ठांकः -२४

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

## सहायकग्रन्थसूची

१. वैदिकसंकलन (वांला) – भट्टाचार्य ओ अधिकारी संस्कृतवुक् डिपो – विधानसरणी कलिकाता २८/१

२. श्रीमद्भगवद्गीता (वांला) – गीताप्रेस-गोरख्यपुरम् -७६३

३. अरविन्देर वांला रचना – श्रीअरविन्द आश्रम, पण्डिचेरी

४. संस्कृतसाहित्येर इतिहास (वांला) – युधिष्ठिरगोप, विधानसरणी, कलिकाता

५. संस्कृतसाहित्यर इतिहास (ओडिआ) – हरेकृष्णशतपथी-कितावमहल, कटक,ओडिशा

६. संस्कृतसातहित्येर संक्षिप्त इतिवृत्त (वांला) – डॅा. देवकुमारदास -संस्कृतपुस्तकभाण्डार -३८ विधानसरणी – कलिकाता।

# शक्तिविषये मीमांसकमतोपस्थापनम्

**डॉ. अजयकुमारकरः**

**अतिथ्यध्यापकः, नरेन्द्रनाथसंस्कृतमहाविद्यालयः**

**प्रियवागः, बालेश्वरम्**

न्यायवैशेषिकतन्त्रे द्रव्यादिभेदेन सप्त पदार्थाः सन्ति। यद्यपि एते द्रव्यादिपदार्थाः वैशेषिकशास्त्रे प्रसिद्धाः सन्ति, तथापि तेषु पदार्थेषु नैयायिकानां वैमत्यं नास्ति। अत एव अस्मिन् शास्त्रे सप्तपदार्थाः प्रसिद्धाः।

प्रशस्तपादाचार्येणापि उक्तम्- "एवं धर्मैर्विना धर्मिणामुद्देशः कृतः"[1] उपमानचिन्तामणौ शक्तिसादृश्यादीनां पदार्थानां पदार्थान्तरत्वं मीमांसकाभिमतम् इति मणिकारैः। मीमांसकप्रस्थानेऽपि प्रभाकरमते शक्तेरतिरिक्तपदार्थत्वम् आलङ्कारिकमते च सादृश्यस्य अतिरिक्तपदार्थत्वम्। एतेन ज्ञायते प्रभाकरमीमांसकमते शक्तेः पदार्थान्तरत्वम्। शक्तेः पदार्थान्तरत्वस्वीकारे इयम् एव युक्तिः प्राप्यते। बीजात् अङ्करस्योत्पत्तिः वह्नौ च दाहस्य उत्पत्तिः, बीजाभावे नाङ्कुरस्योत्पत्तिर्वह्न्यभावे च न दाहस्योत्पत्तिः इति अन्वयव्यतिरेकाभ्यां बीजस्य अङ्कुरं प्रति वह्नेः च दाहं प्रति कारणत्वं सिद्ध्यति। परन्तु यदि बीजस्यैव अङ्कुरस्य कारणत्वं स्यात् अथवा दाहं प्रति वह्नेरेव कारणत्वं स्वीक्रियेत तदा मुषिकाघ्रातबीजे बीजत्वस्य सद्भावात् तस्मात् एव कथं न अङ्कुरस्य उत्पत्तिः। एवञ्च मणिमन्त्रौषधीप्रयोगवशात् प्रज्वलितवह्नेः सत्वात् कथं न दाहोत्पत्तिः। एतेन ज्ञायते बीजे बीजत्वं वा भवतु वह्नौ वह्नित्वं वा भवतु तदतिरिक्तः कोऽपि धर्मः भवेत् येन कारणेन बीजात् अङ्कुरस्य वह्नेश्च दाहस्य उत्पत्तिः। यस्य धर्मस्य उपस्थितौ कार्यस्य उत्पत्तिः तादृशधर्मः शक्तिपदवाच्यः इति मीमांसकानां मतविशेषः। तादृशशक्तिसद्भावे अर्थापत्तिरेव प्रमाणं भवति। अर्थापत्त्या च शक्तेः पदार्थान्तरत्वं सिद्ध्यति अर्थात् भिन्नप्रकारेण उपपत्तेरभावात् येन कारणेन च उपपत्तिः तादृशकारणकल्पना एव अर्थापत्तिः अत्र श्लोकवार्तिककारैः तन्त्रवार्तिककारैश्च तदसत्त्वे तदभावे प्रमाणं प्रदर्शयति। तथा च उक्तम् -

"तेनार्थापत्तिपूर्वत्वमत्र यत्र च कारणे।
कार्यादर्शनतश्शक्तेरस्तित्वं सम्प्रतीयते॥
कार्यस्य ननु लिङ्गत्वं न सम्बन्धानपेक्षणात्।
दृष्टा सम्बन्धिता चैषा शक्तिर्गम्येत नान्यथा॥"[2]
"शक्तिः कार्यानुमेयत्वाद् यद्गतैवोपयुज्यते।
तद्गतैर्वाभ्युपेयतया स्वाश्रयान्याश्रयापि वा॥"[3]

---

[1] प्र. भाष्यम्, पृ. ५

[2] श्लोकवार्तिक अर्थापत्तिपरिच्छेदः, पृ. ४७-४८

[3] तन्त्रवार्तिक, पृ. ३९८, शास्त्रदीपिका, पृ- ८०

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

मीमांसकानां मते शक्तेः पदार्थान्तरत्वस्वीकारे इयम् एव युक्तिः विद्यते- वह्नौ दाहानुकूला शक्तिः अस्ति, परन्तु चन्द्रकान्तमणिविशिष्टेन वह्निना दाहो न जन्यते अर्थात् चन्द्रकान्तमणिसमवहितायां वह्नौ दाहानुकूलशक्तिः नश्यति चन्द्रकान्तमण्यभावे सति उत्तेजकसूर्यकान्तमणेः समवधाने सति च दाहो भवति इति मणिसमवधाने शक्तेः नाशः इति शक्तेः अतिरिक्तपदार्थत्वम् इति प्रभाकराः वदन्ति। सा च शक्तिः सहजाशक्ति-आधेयशक्ति-पदशक्तिभेदात् त्रिविधा भवति। सहजाशक्ति च वयादिनिष्ठा, आधेयशक्तिः च प्रोक्षणादिजन्या ब्रीह्यादिनिष्ठा पदशक्तिश्च तत्तदार्थनिरूपिता तत्तत्पदनिष्ठा च भवति इति। ताः सर्वाः शक्तयः अतिरिक्ताः भवन्ति इति प्रभाकरसिद्धान्तं मनसि निधाय शक्तिवादस्य उपरि चर्चा प्रारभ्यते शक्तिवादप्रकरणे शशधराचार्यैः तत्र आदौ विप्रतिपत्तयः प्रदर्श्यन्ते तथाहि -

"तत्र विप्रतिपत्तिः। अयं वह्निर्दाहानुकूलातीन्द्रियाद्विष्ठधर्मसमवायी न वा। अनुकूलत्वं च कार्याभावनियताभावप्रतियोगित्वं कारणतदवच्छेदकोभयसाधारणम्। अतीन्द्रियत्वं च साक्षात्कारत्वनियामकप्रत्यासत्त्या-सत्त्यनाश्रयत्वम्। यद्वा वह्निनिष्ठदाह-कारणत्वमतीन्द्रियधर्मावच्छेद्यं न वा।"[4]

तत्र ते परेषां मतम् उपस्थापयन्ति वह्निसंयुक्ते सति अर्थात् यादृशकारणसद्भावे हस्तादेः दाहः भवति, सति प्रतिबन्धके तादृशसामग्रीसद्भावेऽपि दाहो न जायते यतो हि प्रतिबन्धकत्वं कार्यस्य विघटकत्वम् एव भवति। प्रतिबन्धकसद्भावे च कार्यस्य अनुत्पत्तिः तद्भावे च कार्यस्य उत्पत्तिः भवति इति प्रतिबन्धकस्य मण्यादेरन्यथानुपपत्त्या अतीन्द्रियभूतायाः मणिनिष्ठशक्तेः प्रतिबन्धकत्वं मण्यभावनिष्ठशक्तेश्च कारणत्वं कल्प्यते। सा च शक्तिः अर्थापत्त्या एव सिद्ध्यति।

तथाहि "तस्मादतीन्द्रियकिञ्चिद्दाहा-नुकूलविघटकत्वं प्रतिबन्धकत्वं मण्यादेरन्यथाऽनुपपत्त्या कल्पनीयमित्य-र्थापत्तिरेव शक्तौ प्रमाणम्।"[5]

उपर्युक्तदृष्टान्तेन अर्थापत्त्या शक्तेः पदार्थान्तरत्वं मीमांसकैः यत् स्वीकृतं तन्न युक्तं यतो हि कारणताकुक्षौ प्रतिबन्धकाभावस्याऽपि कारणतास्वीकारात् चन्द्रकान्तमणेः प्रतिबन्धकत्वं चन्द्रकान्तमण्यभावस्य च कारणत्वं कल्प्यते। अत एव प्रतिबन्धकाभावत्वेन इव कार्यकारणभावनिर्वाहे शक्तेः पदार्थान्तरत्व-कल्पना नैव युक्ता। तदुपरि पुनः मीमांसकाः वदन्ति अन्योन्याश्रयदोषप्रसङ्गात् प्रतिबन्धकाभावस्य कारणत्वं नाङ्गीकार्यम्। एतत् सर्वं मनसि निधाय शशधराचार्यः वदति -

"न प्रतिबन्धकाभावत्वेन कारणत्वम्। अन्योन्याश्रयप्रसङ्गात्। प्रतिबन्धकत्वं हि कारणीभूताभावप्रतियोगित्वं, तच्च कारणत्वग्रहाधीनग्रहं, कारणत्वं च तद्ग्रहाधीनग्रहमिति। नापि मण्याद्यभावत्वेन। मणिसमवधानेऽपि तदन्योन्याभावमादाय

4 न्या. सि. दी., पृ. १८

5 न्या. सि. दी., पृ. १८

दाहप्रसङ्गात्। नापि मणिप्रागभावत्वेन। उत्पन्नविनष्टे मणौ दाहानुत्पादप्रसङ्गात्।"[6]

"नापि मणिप्रध्वंसत्वेन। अनुत्पन्ने मणौ दाहानुत्पादप्रसङ्गात्। नापि मण्यत्यन्ताभावत्वेन उत्पन्नविनष्टे मणावत्यन्ताभावस्य तदाभावात्। नापि मण्यादिसंसर्गाभावत्वेन। अन्योन्याभावातिरिक्तस्य संसर्गाभावस्य निर्वक्तुमशक्यत्वात्।"[7]

तत्र इदम् अपि ध्यातव्यं यत्र चन्द्रकान्तमणेः समवधानं विद्यते तत्र उत्तेजकसद्भावे कथं दाहः? दाहस्तु तत्र भवति एव। स किं प्रतिबन्धकप्रागभावात् प्रतिबन्धकध्वंसात् प्रतिबन्धकात्यन्ताभावाद् वा जायते इति पक्षत्रयम् उपस्थाप्य तस्य निराकरणम् अपि शक्तिवादप्रकरणे शशधराचार्यैः कृतम्।

किञ्च, मण्यादिसमवधानदशायाम् उत्तेजकसद्भावे यो दाहो जायते स किं प्रतिबन्धकप्रागभावाद् उत प्रतिबन्धकध्वंसात् तदत्यन्ताभावाद्वा। न तावदाद्यः, असिद्धेः। प्रागभावस्य कार्यैकोन्नेयत्वात्। न द्वितीयः। उत्तेजकापनयेऽपि दाहप्रसङ्गात्। ध्वंसस्य विद्यमानत्वात्। अत एव न तृतीयः। अत्यन्ताभावस्य नित्यत्वादुत्तेजकापनयेऽपि दाहप्रसङ्गात्। किञ्च, न मण्यादिसंसर्गाभावत्वेन कारणत्वं, तथा च तत्समवधानेऽपि यत् किञ्चिन्मणिसंसर्गाभावमादाय दाहप्रसङ्गात्। न हीतरसमवहितदण्डसमवधाने दण्डान्तरविलम्बे कार्यविलम्बो दृश्यते।"[8]

वस्तुतः विशिष्टाभावस्य कारणत्वं कल्प्यते यत्र च उत्तेजकस्य सूर्यकान्तमणेः सद्भावत्वं प्रतिबन्धकस्य चन्द्रकान्तमणेश्च यत्र सद्भावत्वं तत्र विशिष्टाभावमादाय कारणत्वं कल्प्यते। यतः उत्तेजकाभावमणेः कार्यविघटकत्वं तदभावस्य च कारणत्वस्वीकारात् यत्र च उभयोः सत्त्वं तत्र विशेषणाभावप्रयुक्तविशिष्टाभावस्य सत्त्वात् प्रतिबन्धकसंसर्गाभावत्वस्य कारणत्वकल्पनं युक्तं, तेन कार्यनिर्वाहे शक्तेः अतिरिक्तकल्पनाया अन्याय्यत्वम्, अतः एव शक्तेः पदार्थान्तरत्वं नैवाङ्गीकार्यम् एतत् सर्वं मनसि निधाय उदाहरणान्तरेण शक्तेः पदार्थान्तरत्वं निराकरोति शशधराचार्यैः -

"पिपासोपशमनसमर्थजलमित्यादौ सहाकारिविरहप्रयुक्तकार्याभाववत्त्वमेवानुमेयं तथाचैतदनुरोधेनापि न शक्तिसिद्धिः। ननु दीपस्य बीजोपरिनयनम् अङ्कुरप्रतिबन्धकम्, अन्यथा तदनन्तरम् अङ्कुरोत्पादप्रसङ्गात् तस्मादगत्याङ्कुरोत्पादकानुकूलं बीजनिष्ठं किञ्चिदतीन्द्रियं दीपोपरिनयनस्य विनाश्यमवश्यं स्वीकरणीयमिति। मैवम्। दीपोपरि सम्बन्धात्यन्ताभावास्यानादितत्संसर्गाभावस्य वा कारणत्वात्। न चानुमानात् शक्तिसिद्धिः। प्रथमानुमानेऽचाक्षुषद्रव्यत्वस्योपाधेः सत्त्वात्। द्वितीयानुमाने प्रत्यक्षगुणान्यत्वस्य संयोगेतरत्वस्य वोपाधेः सत्त्वात्। एकवृत्त्या साध्यविशेषणे द्रव्यत्वस्यैवोपाधेः सत्त्वात् तृतीयानुमाने

[6] न्या. सि. दी., पृ. १८

7 न्या. सि. दी., पृ. १७

8 न्या. सि. दी., पृ.- १९

स्थितिस्थापकेन सिद्धसाधनात्, "अचाक्षुष-द्रव्यत्वस्य चोपाधेस्तथैव सत्त्वात्। सर्वेषामप्रयोजकत्वाच्चेति॥"[9]

अनेन रूपेण वह्नौ या दाहानुकूला सहजाशक्तिः विद्यते तस्याः शक्तेः पदार्थान्तरत्वमपि अपास्तम्।

## सहायकग्रन्थसूची


- उदयनाचार्यः, किरणावली, द्विवेदी, विन्ध्येश्वरीप्रसादः (सम्पा.), चौखम्बा संस्कृत सीरीज सं. 9, वाराणसी, 1897
- रक्षितः, शान्तः, तत्त्वसंग्रहः, शास्त्री, द्वारिकादासः (सम्पा.), बौद्धभारती, वाराणसी, 1968
- भट्टाचार्यः, जगदीशः, तर्कामृतम्, मिश्रः, रामचन्द्रः (सम्पा.), चौखम्बा विद्याभवन, वाराणसी, 1973
- भास्करः, लौगाक्षिः, तर्ककौमुदी, पनसीकरः, वी. एल. एस. (सम्पा.), निर्णयसागर प्रेस, बम्बई, 1928
- मिश्रः, केशवः, तर्कभाषा, शुक्लः, बदरीनाथः (सम्पा.), मोतीलाल बनारसीदास, वाराणसी, 1968
- अन्नंभट्टः, तर्कसंग्रहः, बोडासः, अथल्ये (सम्पा.), बाम्बे संस्कृत सीरीज, सं. 55, भण्डारकर ओरियण्टल रिसर्च इन्स्टीट्यूट, पूना, 1968
- उदयनाचार्यः, न्यायकुसुमाञ्जलि, गोस्वामी, महाप्रभुलालः (सम्पा.), मिथिला विद्यापीठ ग्रन्थमाला सं. 28, 1972
- वात्स्यायनः, न्यायभाष्यम्, मिश्रः, नारायणः (सम्पा.), काशी संस्कृत ग्रन्थमाला, 48, वाराणसी, 1970
- उद्योतकराचार्यः, न्यायवार्त्तिकम्, द्विवेदी, विन्ध्येश्वरीप्रसादः (सम्पा.), बिब्लोथिका इण्डिका, कलकत्ता, 1887
- विश्वनाथः, न्यायसिद्धान्तमुक्तावली, श्रीकृष्णवल्लभाचार्यः (सम्पा.), काशी संस्कृत ग्रन्थमाला, सं. 212, वाराणसी, 1972
- प्रशस्तपादः, प्रशस्तपादभाष्यम्, मिश्रः, नारायणः (सम्पा.), काशी संस्कृत (पदार्थधर्मसंग्रहः) ग्रन्थमाला सं. 173, वाराणसी, 1966
- उपाध्यायः, बलदेवः, भारतीय दर्शन, चौखम्भा सं. सं. दिल्ली, 1977


9 न्या. सि. दी., पृ. २२

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# प्रक्रियाक्रमः पाणिनीयव्याकरणञ्च

**डॉ. गोपीकृष्णन्-रघुः**

**सहायकाचार्यः, संस्कृत-दर्शनविभागः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्था,**

**बेलुरमठः, हाओडा, पश्चिमबङ्गः**

**0. भूमिका**

त्रिमुनिव्याकरणप्रणेत्रा भगवता पाणिनिना सूत्ररूपेण शास्त्रमिदं निरमायि। कालान्तरे यदा सूत्राणामर्थावगमने क्लेशः जातः तदा तेषां सुलभावगमनाय सूत्राणां वृत्तयः परिकल्पिताः। वृत्तिः नाम सूत्रार्थविवरणवाक्यं भवति। इयं च संक्षिप्तव्याख्या भवति सूत्राणाम्। सद्यःकाले वृत्तिग्रन्थानाश्रित्यैव शास्त्रपठनपाठनपरम्परा प्रचलति।

व्याकरणशास्त्रे एषां वृत्तिग्रन्थानां द्विधा परम्परा दृश्यते। प्रथमा अष्टाध्यायीक्रमानुसारिणी, द्वितीया प्रक्रियाक्रमानुसारिणी इति। अष्टाध्याय्यां येन क्रमेण सूत्राणां पाठः वर्तते तेनैव क्रमेण यत्र सूत्राणां वृत्तिः भवति सा अष्टाध्यायीक्रमानुसारिणी। यथा- काशिकावृत्तिः, भागवृत्तिः, दुर्घटवृत्तिः इत्यादयो ग्रन्थाः।

द्वितीयक्रमः भवति प्रक्रियाक्रमः। अत्र च अध्येतृसौलभ्याय एकस्य रूपस्य निष्पत्त्यर्थं यानि सूत्राण्यपेक्षितानि तानि एकत्र संगृहीतानि वर्तन्ते। यथा सन्धिकार्यसम्बद्धानि सूत्राणि सर्वाणि सन्धिप्रकरणे संगृहीतानि। तथैव समाससम्बद्धानि सूत्राणि समासप्रकरणे। एवं तत्तद्विषयसम्बद्धानां सूत्राणामेकत्रीकरणं क्रमस्यास्य वैशिष्ट्यम्। अयञ्च क्रमः, अष्टाध्यायीक्रमात् भिन्नः। अत एव क्रमेऽस्मिन् कदाचित् “पूर्वत्रासिद्धम्” “विप्रतिषेधे परं कार्यम्” इत्यादीनां नियमानामवगमे प्रयोगे च क्लेशः जायते। किन्तु अनेन क्रमेण अध्ययने तु सुलभतया प्रक्रिया अवगम्यते। तथैव अपेक्षितांशानामेव पठनमपि सुकरम्। अत एव प्रक्रियाक्रमस्य कालेऽस्मिन् प्रचारबाहुल्यं दृश्यते।

**१.० प्रक्रियाक्रमस्य प्रादुर्भावः**

वस्तुतः प्रक्रियाक्रमः पाणिनीये व्याकरणे नारब्धः। क्रमस्यास्य आविर्भावः पाणिनीयेतरव्याकरणेष्वभवत्। ततः प्रक्रान्तः अयं क्रमः पाणिनीये। सूर्यकान्तबालिमहोदयानुसारं क्रिस्तोः परं प्रथमशतके अस्य क्रमस्य प्रादुर्भावः जातः। अस्यारम्भः कातन्त्रव्याकरणेनाभूत्। ततश्च क्रमशः संवर्धितः पाणिनीयेऽपि प्रविष्टः।

**१.१ कातन्त्रव्याकरणम्**

कातन्त्रशब्दस्य अर्थः भवति लघुतन्त्रम्

इति। अस्य च कर्ता शर्ववर्मा इति कथ्यन्ते। युधिष्ठिरमीमांसकानां मते तु अयं केवलं संग्रहणकर्ता एव। स्वयं न रचितवान्। अस्य व्याकरणस्य नामान्तराणि भवति कौमारम्, कलापकम् इति च। अत्र ग्रन्थे शर्ववर्मा उत्सर्गापवादसरणीं परित्यज्य विषयविभागानुसारिणीं सरणीं स्वीचकार। अयं क्रमः अनेनैव प्रप्रथमतया प्रयुक्तः वर्तते। ग्रन्थस्य प्रथमभागे संज्ञापादः, सन्धिपादः, निपातपादश्च विद्यते। द्वितीयभागे नामप्रकरणाख्ये नामरूपाणां निष्पत्तिः, तद्धितप्रत्ययाः, समासाः, स्त्रीप्रत्ययाश्च वर्तन्ते। तृतीयभागे आख्यातानां विषये उल्लेखः वर्तते। चतुर्थः भागः कृदन्तभागश्च भवति।

प्रायः अयमेव क्रमः कालेऽस्मिन्नपि प्रक्रियाग्रन्थेषु दृश्यते। अतः अयमेव प्रक्रियाक्रमस्य पितृस्थानीयः इति मन्तव्यम्।

**१.२ हैमव्याकरणम्**

यद्यपि शर्ववर्मणा प्रक्रियाक्रमः प्रथमशतके एव प्रवर्तितः तथापि बहोः कालानन्तरमेव तस्य अनुसरणं केनचिदन्येन कृतमुपलभ्यते। आचार्यहेमचन्द्रसूरिणा स्वीये सिद्धहैमशब्दानुशासनम् इत्याख्ये ग्रन्थे प्रायः प्रक्रियाक्रमः एव अनुसृतः। अयं च हेमचन्द्रसूरिः जैनसम्प्रदाये श्वेताम्बरसम्प्रदायानुसारी आसीत्। अनेन च गुर्जरराज्ञः सिद्धराजस्य आदेशानुसारमेव ग्रन्थोऽयं निरमायि। युधिष्ठिरमीमांसकमते अस्य कालः ११९६-११९९ मध्ये भवति। ग्रन्थे चास्मिन् एकादशप्रकरणानि सन्ति। तानि च क्रमशः- संज्ञा, स्वरसन्धिः, व्यञ्जनसन्धिः, नाम, कारकम्, षत्वम्, स्त्रीप्रत्ययः, समासः, आख्यातः, कृदन्तः, तद्धितः च।

अतः अयमेवात्र प्रक्रियाक्रमे द्वितीयः प्रयासः इति वक्तुं प्रभवाम। अस्य ग्रन्थस्य अयमपि विशेषः यत् संस्कृतेतरभाषाणामपि चर्चा ग्रन्थान्ते कृता वर्तते।

**१.३ मुग्धबोधव्याकरणम्**

आचार्यहेमचन्द्रसूरेः अनन्तरं प्रक्रियाक्रमे प्रयासः विहितः बोपदेवेन। अनेन च मुग्धबोधनामकं व्याकरणं प्रणीतम्। अस्य च कालः १३२५-१३७०-मध्ये इति स्वीक्रियते। अस्य पितुः नाम केशवः, गुरोर्नाम धनेश्वरश्च आसीत्। संज्ञाप्रकरणतः आरभ्य कृदन्तपर्यन्तं हेमचन्द्रस्य सर्वेऽपि विभागाः स्वीकृताः ग्रन्थेऽस्मिन्।

पाणिनीयपरम्परायां प्रक्रियाग्रन्थानां प्रवृत्त्यर्थम् इमे ग्रन्थाः आसन् कारणीभूताः। एतेषां प्रचुरप्रचारं दृष्ट्वा तदानीन्तनाः आचार्याः स्वशास्त्ररक्षणार्थं प्रचारार्थञ्च नवीनामिमां पद्धतीमनुचक्रुः।

**२.० पाणिनीये प्रक्रियाक्रमः।**

पाणिनीये प्रक्रियाक्रमस्य आरम्भः प्रायः द्वादशशताब्द्यां भवति। ततः प्रभृति तदा तदा प्रक्रियाग्रन्थाः समुद्भूताः बहवः। किन्तु तेषु सर्वेष्वपि ग्रन्थेषु साम्प्रतिके काले उत्तमोत्तमस्थानं भजते श्रीमता विदुषा भट्टोजीदीक्षितेन विरचितः वैय्याकरणसिद्धान्तकौमुदीनामकः ग्रन्थः। ततः प्रागपि केचन ग्रन्थाः समुद्भूताः सन्ति। तान्यत्र प्रतिपाद्यन्ते।

**२.१ रूपावतारः**

पाणिनीयव्याकरणे प्रक्रियाक्रमः अनेन

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

ग्रन्थेन प्रारब्धः। अस्य च ग्रन्थस्य कर्ता भवति धर्मकीर्तिः। अयं च बौद्धः आसीदिति श्रूयते। अस्य कालः प्रायः वैक्रमसंवत् ११४०-परिसरे भवति। अनेन पाणिनीयव्याकरणं सरलावबोधनाय पुनर्व्यवस्थापितम्। अस्य ग्रन्थः अवताराख्येषु अध्यायेषु विभक्ताः। ते च यथा- संज्ञावतारः, विभक्त्यवतारः, अव्ययावतारः, स्त्रीप्रत्ययावतारः, कारकावतारः, समासावतारः, तद्धितावतारः इति पूर्वार्धः, तथा धातुप्रत्ययपञ्चिका इत्युत्तरार्धश्च। अनेन तु न सम्पूर्णानां सूत्राणां सङ्कलनं कृतम्। किन्तु रूपसिद्ध्यर्थम् अपेक्षितानामेव सूत्राणामत्र व्याख्या कृता। स्वरविधायकसूत्रादिकं तु त्यक्तवानेव। अतः नेयं सम्पूर्णाष्टाध्याय्याः व्याख्या।

**२.२ प्रक्रियारत्नम्**

सायणस्य धातुवृत्तौ अयं ग्रन्थः बहुधा उद्धृतः किन्तु सद्यः नोपलभ्यते। तथैव दैवम् इत्यस्य कृष्णलीलाशुकमुनिविरचितायां पुरुषकारव्याख्यायामपि अस्योल्लेखः वर्तते। युधिष्ठिरमीमांसकमते कृष्णलीलाशुक-मुनिरेव अस्यापि ग्रन्थस्य कर्ता। स च वै.सं. १२५०-१३५० मध्ये जीवितः आसीत्।

**२.३ रूपमाला**

प्रक्रियाक्रमे तृतीयोऽयं ग्रन्थः विमलसरस्वतिना विरचितः। अयं च प्रक्रियाकौमुदीकर्तुः रामचन्द्रस्य किञ्चित्पूर्वं समकाले वा आसीत्। अस्य कालः १४००-वैक्रमाब्दपरिसरे भवतीति विदुषां मतम्। अनेन च मालाख्येषु अध्यायेषु ग्रन्थः विभक्तः। ते च यथाक्रमं- संज्ञामाला, स्वरसन्धिः, प्रकृतिभावः, व्यञ्जनसन्धिः, विसर्गसन्धिः, अजन्तमाला, हलन्त्यमाला, सर्वनाममाला, संख्याभागः, नियततिङ्माला, छान्दसमाला, अव्ययमाला, स्त्रीप्रत्ययमाला, कारकभागः, सार्वधातुकमाला, भावकर्मप्रक्रिया, लुट्-भागः, लृट्-भागः, लङ्भागः, लिट्-भागः, पञ्चमभागः, सनादिभागः, लकारार्थमाला, लणादिनियम-भागः, कृन्माला, तद्धितमाला, समासमाला चेति।

अस्मिन्नपि ग्रन्थे सम्पूर्णानां पाणिनीयसूत्राणां सङ्कलनं नास्ति। अपेक्षितप्रक्रियानुसारिणामेव सूत्राणां ग्रहणं वर्तते।

**२.४ प्रक्रियाकौमुदी**

पाणिनीयव्याकरणस्य प्रक्रियाक्रमे प्रमुखं स्थानं भजते प्रक्रियाकौमुदी। सिद्धान्तकौमुद्याः प्राक् प्रक्रियाक्रमस्य प्रचारे अस्येव प्रामुख्यमासीत्। अस्य ग्रन्थस्य कर्ता भवति शेषवंशीयः रामचन्द्राचार्यः। अस्य पितुः नाम कृष्णमाचार्यः इति पुत्रस्य नाम नृसिंहः इति चासीत्। अस्य कालः क्रि.सं १५१४-तः प्रागिति युधिष्ठिरमीमांसकाः।

प्रक्रियाकौमुदी पूर्वग्रन्थानामपेक्षया विस्तृता सरला च वर्तते। अस्मिन् ग्रन्थे एवं विभागः दृश्यते- सन्ध्युपयोगिसंज्ञाप्रकरणम्, स्वादिप्रक्रिया, अव्ययानि, स्त्रीप्रत्ययः, विभक्त्यर्थः, समासः, तद्धितः, द्विरुक्तप्रत्ययः, गणप्रक्रिया, उणादिः, वैदिकप्रक्रिया, स्वरप्रक्रिया च।

अस्य ग्रन्थस्य तु प्रायशः दशाधिकाः व्याख्या समुपलभ्यन्ते। तेनैवास्य प्रचारः ज्ञातुं

शक्यः। तथैव सिद्धान्तकौमुदीरचनायामस्य प्रभावः दरीदृश्यते।

**२.५ प्रक्रियासर्वस्वम्**

पाणिनीयप्रक्रियाग्रन्थमालायामन्यतमं पुष्पं भवति प्रक्रियासर्वस्वम्। अस्य च कर्ता केरलवास्तव्यः नारायणभट्टतिरीति प्रख्यातः पण्डितः। तेन च विदुषा देवनारायणाख्यस्य राज्ञः आज्ञया ग्रन्थोऽयं प्रणीतः। अस्य ग्रन्थस्य टीकाकर्तुः केरलवर्मदेवस्य मतेन षष्टिमितदिनैः ग्रन्थस्यास्य निर्माणमभूत्। नारायणभट्टोऽयं मेल्पत्तूरग्रामे जनिमलभत। नैकशास्त्रानिपुणेन अनेन मीमांसशास्त्रे **मानमेयोदयः** इति ग्रन्थं व्यरचि। अस्यैव इतरकृतयः वर्तन्ते अपाणिनीयप्रमाणता, धातुकाव्यम्, नारायणीयम् इत्यादयः। प्रायः अष्टत्रिंशत् ग्रन्थाः अनेन निर्मिताः संस्कृतजगति राराजन्ते। अयं भट्टोजिदीक्षितानां समकालिक इति श्रुतिः। तत्र एवं श्रूयते यत् श्रीभट्टोजिदीक्षितः नारायणभट्टं साक्षात्कर्तुं काशीतः प्रस्थितः किन्तु मध्ये नारायणभट्टानां मृत्युवृत्तान्तं श्रुत्वा प्रतिनिवृत्तः इति। यदि कथनमिदं सत्यं तर्हि अस्य कालः षोडशशताब्दिः भवति। युधिष्ठिरमीमांसकः एवमपि लिखति यत् अस्य मीमांसागुरुः माधवः यदि सायणभ्राता भवति तर्हि अस्य कालः पञ्चदशशताब्दिरपि भवितुमर्हति इति।

प्रक्रियासर्वस्वाख्यस्य ग्रन्थस्य विभागः विंशत्यध्यायेषु कृतो वर्तते। ते च यथा- संज्ञा, परिभाषा, सन्धिः, कृत्, तद्धितः, समासः, स्त्रीप्रत्ययः, सुबर्थाः, सुब्विधयः, आत्मनेपदपरस्मैपदविभागाः, तिङ्, लकारार्थः, सन्, यङ्, यङ्लुक्, सुब्धातु, धातु, उणादि, छान्दसम् इति। अत्र ग्रन्थे उदाहरणानि श्लोकरूपेण दत्तानि। तथैव शास्त्रचर्चा अपि कारिकारूपेण विहिता। ग्रन्थकर्ता स्वयमेव ग्रन्थलेखनकारणं ग्रन्थारम्भे ददाति। सिद्धान्तकौमुद्याम् इव अस्मिन् ग्रन्थेऽपि समग्रपाणिनीयसूत्राणां सन्निवेशो दरीदृश्यते।

**२.६ वैय्याकरणसिद्धान्तकौमुदी**

कालेऽस्मिन् व्याकरणाध्ययनस्य प्रवेशद्वारं भवति कौमुद्याः अध्ययनम्। व्याकरणविषये प्राथमिकज्ञानावाप्त्यर्थं जनाः एनमेव ग्रन्थं समाश्रयन्ति। आचार्यः भट्टोजीदीक्षितः भवति कर्ता ग्रन्थस्यास्य। अयमाचार्यः काशीवास्तव्यः इति सुविदितमेव। किन्तु एतेषां परम्पराविषये विद्वत्सु मतिभेदो दृश्यते। केचन विद्वांसः अयं तैलङ्गब्रह्मणः आसीत्, तत्र च चित्तूरूप्रान्ते अस्य मूलस्थानं वर्तते इति ब्रुवन्ति। अन्ये तु एनं महाराष्ट्रियो सारस्वतब्राह्मणः इति कथयन्ति। विषयेऽस्मिन् इदानीमपि निर्णयः सम्यक् न वर्तते। अस्य पितुः नाम लक्ष्मीधरः इत्यासीत् इति कौस्तुभे स्वयमेव वदति। दीक्षितस्य कालः षोडशशताब्द्याः अन्तिमे पादे भवतीति निर्णयः पण्डितानाम्। युधिष्ठिरमीमांसकः अस्य कालः वि.सं १५७०-१६५०-मध्ये भवतीति वदन्ति।

ग्रन्थोऽयं द्विधा विभक्तः। पूर्वार्धः, उत्तरार्धश्चेति। स च विभागः विषयानुसारी एव। पूर्वार्धे नामरूपाणां विषये चर्चा भवति उत्तरार्धे धातुरूपाणां विषये। तत्स्वयं ग्रन्थकर्त्रा सूचितमुत्तरार्धारम्भे-

**'पूर्वार्धे कथिता तुर्यपञ्चमाध्यायगोचराः।**
**प्रत्यया अथ कथ्यन्ते तृतीयाध्यायगोचराः॥"**
इति।

पूर्वार्धे एवं प्रकरणविभागः दृश्यते- संज्ञा, परिभाषा, सन्धिः, शब्दाधिकारः, अव्ययम्, स्त्रीप्रत्ययप्रकरणम्, कारकप्रकरणम्, समासप्रकरणम्, तद्धितप्रकरणम्, द्विरुक्तप्रकरणम् चेति। तत्र सन्धि-शब्दाधिकार- समास- तद्धितेषु अवान्तरप्रकरणानि विद्यन्ते।

उत्तरार्धे तु दशगणी, णिच्- सन्- यङ्- यङ्लुक्- नामधातु- कण्ड्वादि- आत्मनेपदि- परस्मैपदि- भावकर्म- कर्मकर्तृ- लकारार्थप्रकरणानि, पूर्वकृदन्त-प्रकरणम्, उणादिः, उत्तरकृदन्तप्रकरणम्, वैदिकप्रक्रिया, स्वरप्रक्रिया च भवति। एभि प्रकरणैः सम्पूर्णस्यास्य पाणिनीयस्य प्रतिपादनं कृतं श्रीमता भट्टोजीदीक्षितेन।

**३.० उपसंहारः**

एवञ्चास्मिन् काले व्याकरणान्तराद् उपक्रान्तोऽयं क्रमः पाणिनीये च प्रसिद्धिमवाप्य व्याकरणाध्ययनस्य द्वारीभूतो राजतेतराम्।

**सहायकग्रन्थाः**


- दहालः, लोकमणिः, व्याकरणशास्त्रेतिहासः, भारतीयविद्या-प्रकाशन्, वारणासी, १९९०
- मीमांसकः, युधिष्ठिरः, संस्कृतव्याकरणशास्त्र का इतिहास, चौखम्बा पब्लिकेषन्स्, वारणासि, २००३
- शास्त्री, अशोकचन्द्रगौडः, संस्कृतशास्त्रेतिहासविमर्शः, भारतीयविद्याप्रकाशन्, वारणासि, १९९७
- Bali, Dr. Suryakanth, Bhattoji Dixit, Oriental Publications, New Delhi, 1990.

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# रघुनाथभट्टाचार्याभिमताख्यातार्थविचारः

**डॉ. नीरजकुमारभार्गवः**

**सहायकाचार्यः, संस्कृत-दर्शनविभागः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्था,**

**बेलुरमठः, हाओडा, पश्चिमबङ्गः**

रघुनाथभट्टाचार्यमते आख्यातमात्रस्य यत्नो वाच्यः, इति प्रतिभाति तद्विरचिताख्यातवाददीधितिग्रन्थस्याध्ययनेन। तत्र हि वदति सः- **“आख्यातस्य यत्नो वाच्यः। पचति पाकं करोतीति यत्नार्थककरोतिना सर्वाख्यातविवरणात्, व्यवहारादिवद्बाधकं विना विवरणादपि व्युत्पत्तेः”**[1]। तेषां तात्पर्यं वर्तते यदस्ति विवरणमपि शक्तिग्राहकेषु मध्ये अन्यतमम्। तथा चोक्तमपि वर्तते-

**“शक्तिग्रहं व्याकरणोपमानकोशाप्त-वाक्याद्व्यवहारतश्च।**
**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः”**[2]॥

तत्र विवरणं नाम तत्समानार्थकपदान्तरेण तदर्थकथनम्। यथा घटोऽस्तीत्यस्य कलशोऽस्तीत्यनेन विवरणाद्घटस्य कलशे शक्तिग्रहो भवति। एवमन्यत्रापि बोध्यम्। एवं च पचति इत्यस्य पाकं करोति इति विवरणं भवति, पच्यते इत्यस्य पाकः क्रियते इति विवरणं भवति। तत्र पच्धातोर्विवरणं पाकमिति पाकः इति, तीत्यस्य ते इत्यस्य वा विवरणं करोतीति क्रियते इति वा। एवमेव अन्येषां तसादितिङ्प्रत्ययानां विवरणमपि कृधातुना क्रियते। एवं च सिद्धमिदं यत् तिङो विवरणं कृधातुना भवति, कृधातोश्चार्थो यत्नो वर्तते। तस्मात्तिङोऽपि यत्नार्थकत्वं स्वीकरणीयमिति भावः। अत एव स्वतात्पर्यं वदति रघुनाथः- **“पचति पाकं करोतीति यत्नार्थककरोतिना सर्वाख्यातविवरणात्, व्यवहारादिवद्बाधकं विना विवरणादपि व्युत्पत्तेः”**[3]। तथा चोक्तं मुक्तावल्याम्- **“एवं विवरणादपि शक्तिग्रहः। विवरणं तु तत्समानार्थकपदान्तरेण तदर्थकथनम्। यथा घटोऽस्तीत्यस्य कलशोऽस्तीत्यनेन विवरणाद्घटपदस्य कलशे शक्तिग्रहः। एवं पचतीत्यस्य पाकं करोतीत्यनेन**

1 आख्यातवाददीधितपत्रसंख्या 4/ चतुर्थसंस्करणम् 1972/ प्रकाशकः तञ्जापुरीसरस्वतीमहालग्रन्थालयः, तञ्जजौरम्, कर्नाटकप्रदेशः।

2 आख्यातवाददीधितपत्रसंख्या 4/ चतुर्थसंस्करणम् 1972/ प्रकाशकः तञ्जापुरीसरस्वतीमहालग्रन्थालयः, तञ्जजौरम्, कर्नाटकप्रदेशः।

3 आख्यातवाददीधितपत्रसंख्या 4/ चतुर्थसंस्करणम् 1972/ प्रकाशकः तञ्जापुरीसरस्वतीमहालग्रन्थालयः, तञ्जजौरम्, कर्नाटकप्रदेशः।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

**विवरणादाख्यातस्य यत्नार्थकत्वं कल्प्यते”**[4]।

अथ दीधितिकारेण सकलाख्यातप्रत्ययानां करोतिना विवरणात् करोतेश्च यत्नार्थकत्वात् आख्यातप्रत्ययानामर्थः कृतिरिति साधितं तदेव च नोपपद्यते करोतेः यत्नार्थकत्वासिद्धेः इति तु नैव शङ्कनीयम्। यतो हि करोतेः यत्नार्थकत्वं नैयायिकैः साधितं वर्तते। तथाहि- यत्नजन्यत्वं स्वीकृत्य मया घटादयः कृताः, अहं घटं करोमि, इत्येते व्यवहाराः भवन्ति। यत्नाजन्यत्वं चाभिप्रेत्य मया अङ्कुरो न कृतः, इत्यादिव्यवहाराः भवन्ति, अहम् अङ्कुरं करोमि, इत्यादयः व्यवहाराश्च न भवन्ति। यदि कृधातोः व्यापारसामान्यार्थकत्वं स्वीक्रियते तर्हि अङ्कुरेऽपि कृष्यादिव्यापारजन्यत्वं वर्तते एवेति कृत्वा मया अङ्कुरो न कृतः इति व्यवहारो न स्यात्, भवति च मया अङ्कुरो न कृतः इति व्यवहारः, तस्मात् कृञः यत्नार्थकत्वं स्वीकर्तव्यम्। स्वीकृते च यत्नार्थकत्वे बीजवापमात्रे एव मनुष्यस्य प्रयत्नः, बीजाद् अङ्कुरोत्पत्तौ च न मनुष्यस्य प्रयत्नः, इति परिशीलनात् मया अङ्कुरो न कृतः इति व्यवहारस्य सिद्धिः भवति। एवं च क्रियाजन्यत्वेऽपि यत्नजन्यत्वाजन्यत्वप्रतिसन्धानात् पटाङ्कुरयोः कृताकृतव्यवहारात् कृञो यत्नार्थकत्वं स्वीकरणीयमिति भावः। प्रोक्तमपि रघुनाथेन - **“कृञश्च यत्नार्थकत्वं क्रियाजन्यत्वेऽपि यत्नजन्याजन्यत्वप्रतिसन्धानात् पटाङ्कुरयोः कृताकृतव्यवहारात्, ज्ञात्रादिवदाश्रयपरतृजन्तकर्तृपदस्य यत्नाश्रयबोधकत्वाच्च”**[5]। अत एव प्रोक्तम् उदयनाचार्यैः कुसुमाञ्जलौ-

“कृताकृतविभागेन कर्तृरूपव्यवस्थया।
यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना”[6] *॥8॥*

घटः कृतः अङ्कुरो न कृतः, इति व्यवहारात् कुलालादिः कर्ता न कारकान्तरमिति कृञ्धात्वर्थः कृतिः। ननु यत्नपदपर्यायता स्यादत आह पूर्वेति। परस्मिन् उत्तरकालवर्तिनि फले विद्यमाने सैव कृतिरेव पूर्वा साधनीभूता भावना। फलानुकूलतापन्नयत्न एवाख्यातार्थः।

अपि च किं करोति इति यत्नार्थकप्रश्ने सति पचति इति उत्तरं प्रदीयते, यत्नार्थकप्रश्नस्य च समाधानं यत्नार्थकोत्तरेणैव भवितुम् अर्हति। तस्मात् प्रोक्तप्रश्नोत्तराभ्यामपि कृञः आख्यातस्य च यत्नार्थकत्वं स्वीकर्तव्यमेवेति भावः। तथा चोक्तं रघुनाथेन- **“किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विना अनुपपत्तेश्च”**[7]। एतस्य ग्रन्थस्येदं तात्पर्यं ग्रन्थघटकस्य यत्नार्थकत्वं विना इत्यस्य यत्नत्वविशिष्टे पाकसम्बन्धबोधं विना इत्यर्थः। एतद्ग्रन्थस्यार्थो वर्तते यत्नत्वविशिष्टे जिज्ञासितार्थसम्बन्धबोधके

---

4 किरलावलीसहितन्यायसिद्धान्तमुक्तावलीपत्रसंख्या 309/ प्रकाशनवर्षम् 2006/ प्रकाशकः चौखम्भासंस्कृतसंस्थानं वाराणसी उ.प्र.।

5 आख्यातवाददीधितपत्रसंख्या 4/ चतुर्थसंस्करणम् 1972/ प्रकाशकः तञ्जापुरीसरस्वतीमहालग्रन्थालयः, तञ्जौरम्, कर्नाटकप्रदेशः।

6 विश्वेश्वरविरचितहिन्दीटीकायुतन्यायकुसुमाञ्जली पृष्ठः=189, तृतीयसंस्करणम् =1988, प्रकाशकः=चौखम्बविद्याभवनम्, वाराणसी, उ.प्र.।

7 आख्यातवाददीधितपत्रसंख्या 4/ चतुर्थसंस्करणम् 1972/ प्रकाशकः तञ्जापुरीसरस्वतीमहालग्रन्थालयः, तञ्जौरम्, कर्नाटकप्रदेशः।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

किं करोतीति प्रश्ने सति तदुत्तरकालभावि पचतीति उत्तरस्य यत्नत्वविशिष्टे जिज्ञासितार्थसम्बन्धबोधकस्य प्रश्नस्य आख्यातस्य यत्नार्थकत्वं विना अनुपपत्तेः। अयं भावः यद्धर्मविशिष्टे यद्धर्मावच्छिन्नस्य सम्बन्धः यत्प्रश्नवाक्यात्प्रतीयते, तद्धर्मविशिष्टे तद्धर्मव्याप्यधर्मावच्छिन्नस्य सम्बन्धश्चेदुत्तरवाक्यात् प्रतीयते, तदा तदुत्तरवाक्यं तत्प्रश्ननिवर्तकं भवति। यथा कस्माद् घटः इति प्रश्नात् घटत्वविशिष्टे जिज्ञासितधर्मावच्छिन्नजनकस्य जन्यत्वरूपः सम्बन्धः प्रतीयते। एतस्य प्रश्नस्य चोत्तरं भवति दण्डात् घटः, अनेन चोत्तरेण घटत्वविशिष्टे जिज्ञासितधर्मव्याप्य-दण्डत्वावच्छिन्नस्य जन्यत्वरूपः सम्बन्धः प्रतीयते। तस्मात् कस्माद् घटः इति प्रश्नस्य निवर्तकं भवति दण्डाद् घटः इत्युत्तरम्। प्रकृते च किं करोतीति प्रश्नात् जिज्ञासितधर्मावच्छिन्ने यत्नत्वधर्मावच्छिन्नस्य जनकत्वसम्बन्धः प्रतीयते। किं च पचति इत्यत्र यदि आख्यातस्य व्यापारत्वावच्छिन्ने शक्तिः स्वीक्रियते चेत् पचति इति उत्तरवाक्यात् पाकत्वधर्मावच्छिन्ने व्यापारत्वधर्मावच्छिन्नस्य जनकत्वरूप-सम्बन्धस्य प्रतीतिः स्यात्। तथा च किं करोतीति प्रश्नस्य पचतीत्युत्तरं निवर्तकं न स्यात्, भवति च तस्मात् उत्तरस्य प्रश्ननिवर्तकत्वान्यथानुपपत्त्या आख्यातस्य यत्नत्वविशिष्टे शक्तिः स्वीकर्तव्येति भावः।

अथ यदि कृञः यत्नार्थकत्वं स्वीक्रियते तर्हि रथो गच्छति इत्यस्य गमनानुकूलकृतिमान् रथः इति बोधः स्यात्, तत्तु नैव सम्भवति रथस्य अचेतनत्वेन कृतेश्च चैतन्यमात्रनिष्ठत्वेन कृत्याश्रयत्वस्य रथादौ बाधादिति तु नैव शङ्कनीयम्, यतोहि अत्र बाधात् रथो गच्छति इत्यत्र आख्यातस्य व्यापारे आश्रयत्वे वा निरूढलक्षणा स्वीक्रियते, तथा चोक्तवाक्यात् संयोगानुकूलव्यापारवान् रथः, गमनाश्रयो रथः इति वा बोधो भवति। एवं चैत्रो जानाति इत्यत्रापि आश्रयत्वे निरूढा लक्षणा, तथा चोक्तवाक्यात् ज्ञानाश्रयः चैत्रः इति बोधः। चैत्रः इच्छति इत्यत्रापि आख्यातस्य आश्रयत्वे निरूढा लक्षणा। तथा चोक्तवाक्यात् इच्छाश्रयः चैत्रः इति बोधः। चैत्रो यतते इत्यत्रापि आश्रयत्वे निरूढा लक्षणा। तथा चोक्तवाक्यात् यत्नाश्रयः चैत्रः इति बोधः। एवं चैत्रः द्वेष्टि, विद्यते इत्यादावपि आश्रयत्वे निरूढा लक्षणा। तेन च द्वेष्याश्रयः चैत्रः, सत्ताश्रयः चैत्रः इति बोधः। घटो नश्यति इत्यत्र च प्रतियोगित्वे निरूढा लक्षणा। तथा चोक्तवाक्यात् नाशप्रतियोगी घटः इति बोधः। तथा चोक्तं दीधितिकारेण- **"रथो गच्छति, जानाति, इच्छति, यतते, द्वेष्टि, विद्यते, निद्रातीत्यादौ क्रियानुकूलकृतिव्यापारयोरप्रतीतेः गत्यादिमात्र-प्रतीतेश्च आश्रयत्वे नश्यतीत्यादौ च प्रतियोगित्वे निरूढलक्षणा"**[8]।

**कर्माख्यातप्रत्ययार्थविचारः**

कर्माख्यातप्रत्ययानां फलं परसमवेतत्वं चार्थो वर्तते। तथाहि वदति रघुनाथः- **"तस्मात्फलम् आत्मनेपदार्थः"**। एवमग्रेऽपि

8 आख्यातवाददीधितपत्रसंख्या 4/ चतुर्थसंस्करणम् 1972/ प्रकाशकः तञ्जापुरीसरस्वतीमहालग्रन्थालयः, तञ्जौरम्, कर्नाटकप्रदेशः।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

वदति **"भूमिं प्रयाति, विहगो विजहाति महीरुहं न स्वात्मानमित्यनुरोधात् क्रियात्वे परसमवेतत्वमपि कर्मप्रत्ययार्थः। ईयांस्तु विशेषः- यत्परत्वं सुपा प्रकृत्यर्थापेक्षिकं तिङादिना च स्वार्थफलाश्रयापेक्षिकं प्रत्याय्यते"**[9]। व्युत्पत्तिवादे गदाधरेणापि दीधितिकृन्मतम् एवमेवोक्तम्- अत्र दीधितिकारप्रभृतयः- **"फलमिव तत्र क्रियान्वयिपरसमवेतत्वमपि कर्माख्यातार्थः"**[10]।

चैत्रेण गम्यते ग्रामः इत्यादौ कर्माख्यातस्य संयोगरूपं फलमिव परसमवेतत्वमपि अर्थः। परसमवेतत्वं च भेदवत्समवेतत्वम्, तदेकदेशे भेदे प्रथमान्तार्थस्य ग्रामस्य प्रतियोगित्वसम्बन्धेन अन्वयः। धात्वर्थव्यापारस्य जन्यत्वसम्बन्धेन अपरस्मिन्नाख्यातार्थे संयोगरूपे फले अन्वयः। तस्य फलस्य आश्रयत्वसम्बन्धेन प्रथमान्तार्थे ग्रामे अन्वयः। तथा च चैत्रवृत्तिर्यः संयोगजनकः ग्रामप्रतियोगिकभेदवत्समवेतो व्यापारः तज्जन्यसंयोगाश्रयो ग्राम इति बोधः।

एवं चैत्रेण त्यज्यते ग्रामः इति वाक्यात् चैत्रवृत्तिः यः विभागजनकः ग्रामप्रतियोगिकभेदवत्समवेतो व्यापारः तज्जन्यविभागाश्रयो ग्राम इति बोधः।

**पाणिनीयस्मृतिविरोधापत्तिः**

अथ यद्याख्यातमात्रस्य कर्तृत्वमर्थः, कर्माख्यातप्रत्ययानां कर्मत्वं परसमवेतत्वं चार्थः इति स्वीक्रियते तदा **'लः कर्मणि च भावे चाकर्मकेभ्यः' {पा० सू० १/४/१०५}** इति सूत्रविरोधापत्तिः। सूत्रस्यास्यार्थस्तावत् भवति लकाराः सकर्मकेभ्यो धातुभ्यः कर्तरि कर्मणि च भवन्ति, अकर्मकेभ्यो धातुभ्यः कर्तरि भावे च भवन्ति, एवं च लकाराणां कर्ता कर्म भावश्च इत्येते वाच्या इति सूत्रानुसारं समायाति, दीधितिकारानुसारं तु कृतिः फलं भावः इत्येते वाच्याः लकाराणामिति, तथा च सूत्रेण साकं विरोधः स्पष्ट एवेति भावः।

**अत्र समाधानम्**

यद्यपि प्रतिपादितदिशा दोषः प्रतिभाति किन्तु नैव तद्दोषो रघुनाथमतस्य दूषक इति भावः। यतोहि नैयायिकाः वदन्ति यद्व्याकरणं शक्तिग्राहकेषु अन्यतमं वर्तते। किञ्च प्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणेन भवति। अतो व्याकरणेन यस्याः प्रकृतेः यस्य प्रत्ययस्य च यत्र शक्तिरिति प्रतिपाद्यते तत्र तत्पदस्य शक्तिरसति बाधके स्वीक्रियते किन्तु सति बाधके तु त्यज्यते। यथा लः कर्मणि च भावे च कर्मकेभ्यः इति सूत्रेण कर्त्राख्यातप्रत्ययानां कृत्याश्रये कर्माख्यातप्रत्ययानां च फलाश्रये शक्तिरिति प्रतिपाद्यते, किन्तु तत्र शक्तौ गौरवं वर्तते, तस्मादेतत्पक्षं परित्यज्य लाघवात् कर्त्राख्यातप्रत्ययानां कृतौ कर्माख्यातप्रत्ययानां च फले शक्तिः स्वीक्रियते। तथाहि यदि कृत्याश्रये शक्तिः स्वीक्रियते तर्हि शक्यो भविष्यति कृत्याश्रयः, शक्यतावच्छेदकं च कृत्याश्रयत्वं तच्च कृतिरूपं वर्तते, कृतिश्च नानेति कृत्वा नाना शक्यतावच्छेदकापत्तिः। परन्तु कृतौ शक्तिः

9 आख्यातवाददीधितपत्रसंख्या 4/ चतुर्थसंस्करणम् 1972/ प्रकाशकः तञ्जापुरीसरस्वतीमहालग्रन्थालयः, तञ्जौरम्, कर्नाटकप्रदेशः।

10 विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभागपत्रसंख्या 39/ संस्करणम् 2012/ प्रकाशकः राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः, आन्ध्रप्रदेशः।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

स्वीक्रियते चेत् शक्या भविष्यति कृतिः शक्यतावच्छेदकं च कृतित्वं तच्च जातिरूपमेकमेवेति कृत्वा एकशक्यतावच्छेदकस्वीकारे लाघवमिति भावः। एवं कर्माख्यातप्रत्ययानां फलाश्रये शक्तिस्वीकारे शक्यः फलाश्रयः शक्यतावच्छेदकं च फलाश्रयत्वं तच्च फलरूपं वर्तते, फलं च नानेति कृत्वा नाना शक्यतावच्छेदकापत्तिः। यदि च फले शक्तिः स्वीक्रियते तर्हि शक्यं फलं भविष्यति शक्यतावच्छेदकं च फलत्वं भविष्यति। फलत्वं च जातिरूपमेवेति कृत्त्वा एकं शक्यतावच्छेदकमिति भावः। तस्माद्व्याकरणप्रतिपादितमतस्वीकारे गौरवं वर्तते, अतो गौरवरूपबाधकस्य सद्भावात् तेषां मतं परित्यज्य स्वकीयं भिन्नं मतं प्रतिपादयन्ति नैयायिकाः, एवं च सूत्रविरोधसत्त्वेऽपि क्षतिर्नास्ति। तैः सर्वत्र व्याकरणमतास्वीकारात्। तथा चोक्तमपि विश्वनाथपञ्चाननभट्टाचार्येण **"धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति। क्वचित्सति बाधके त्यज्यते। यथा वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते। चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्वयः। तच्च गौरवात्त्यज्यते। किन्तु कृतौ शक्तिर्लाघवात्। कृतिश्चैत्रादौ प्रकारीभूय भासते"**[11]।

अपि च सूत्रविरोधोऽपि नास्ति। तथाहि- ते वदन्ति लः कर्मणि चेति सूत्रे कर्तृकर्मपदे भावप्रधाननिर्देशो वर्तते, एवं च कर्तृ इत्यस्य कर्तृत्वमर्थः, कर्तृत्वं च कृतिः। यतोहि न्यायनये कर्ता कृत्याश्रयः, तथा च कर्तृत्वं नाम कृतिः, **"प्रकृत्यर्थप्रकारीभूतो धर्मो भावप्रत्ययेनोच्यते"** इति नियमात्। कर्म इत्यस्य च कर्मत्वमर्थः कर्मत्वं च फलम्। न्यायनये फलाश्रयः कर्म, एवं च कर्मत्वं फलमिति सिध्यति प्रोक्तन्यायात्। तथा च सूत्रस्यार्थो भवति लकाराः सकर्मकेभ्यो धातुभ्यः कर्तृत्वे कर्मत्वे च भवन्ति, अकर्मकेभ्यो धातुभ्यो भावे कर्तृत्वे च भवन्ति। एवं चानेन सूत्रेणापि लकाराणां कृतिः फलमित्यादय एवार्थाः सन्तीति प्रतिफलति। तस्मान्नास्ति स्मृतिविरोधापत्तिरिति भावः।

**अभिहितानभिहितव्यवस्थानापत्तिः**

दीधितिकारानुसारमयमपि दोषो वर्तते। तथाहि- चैत्रः तण्डुलं पचति, चैत्रेण तण्डुलः पच्यते, इत्यादौ यदा कर्तरि तिबादयः प्रत्ययाः भवन्ति, तदा कर्ता अभिहितो भवति, कर्मादयश्चानभिहिताः भवन्ति, एवं च अभिहिते कर्तरि प्रथमा, अनभिहितकर्मादिषु च द्वितीयादिविभक्तयो भवन्ति, एवं च चैत्रः तण्डुलं पचति इत्यादिवाक्यानां सिद्धिर्भवति। यदा च कर्मणि तिबादिप्रत्ययाः भवन्ति, तदा कर्म अभिहितं भवति, कर्त्रादयश्चानभिहिताः भवन्ति, एवं च अभिहिते कर्मणि प्रथमा भवति, अनभिहितकर्त्रादिषु च तृतीयादिविभक्तयो भवन्ति, तथा सति चैत्रेण तण्डुलः पच्यते इत्यादिप्रयोगाणां सिद्धिर्भवति। परन्तु दीधितिकारमते तु तिबादिप्रत्ययाः कृत्यादिष्वर्थेषु समागच्छन्ति, एवं तैः कृत्यादीनामर्थानामभिधानं

11 किरलावलीसहितन्यायसिद्धान्तमुक्तावलीपत्रसंख्या 296/ प्रकाशनवर्षम् 2006/ प्रकाशकः चौखम्भासंस्कृतसंस्थानं वाराणसी उ.प्र.।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

भवति न तु कर्त्रादीनामर्थानाम्, एवं च कथं रघुनाथमते अभिहितस्य अनभिहितस्य च व्यवस्था भविष्यति, कथं च चैत्रः तण्डुलं पचति, चैत्रेण तण्डुलं पच्यते इत्यादीनां वाक्यानां सिद्धिर्भविष्यति, तस्मादस्ति रघुनाथमते अभिहितानभिहितव्यवस्थोच्छेदापत्तिरूपो दोष इति भावः। तथा चोक्तं रघुनाथेन- **"कर्तृकर्मणी लकारवाच्ये चैत्रः पचति पच्यते तण्डुलः, इति सामानाधिकरण्यानुरोधात्। अन्यथा पचतीत्यत्रापि कर्तरि तृतीया पच्यते इत्यत्रापि कर्मणि द्वितीया स्यात्। तयोरनभिहिताधिकारीयत्वात् कृत्यभिधानस्याविशिष्टत्वात्"**[12]।

**अत्र समाधानम्-**

यद्यपि प्रतिपादितरीत्या दोषो वर्तते। तथापि दीधितिकारेण दोषस्यास्य समाधानं कृतमस्ति। स वदति यन्नहि अभिहितानभिहितव्यवस्था कर्तृकर्मणोर-भिधानानभिधानाभ्यां भवति, किन्तु कर्तृकर्मगतसंख्याभिधानानभिधानाभ्यामेव अभिहितानभिहिताधिकारीयकार्योपपत्तिः भवति। तथा चोक्तं तेन **"कर्तृकर्मसंख्याभिधाना-नभिधानाभ्यां नियमः"**[13]। तेषामयमाशयः- आख्यातेन कर्तृगतसंख्यायामनभिहितायां कर्तृवाचकपदोत्तरं तृतीया भवति। तस्यामभिहितायां तु प्रथमा भवति। एवं कर्मगतसंख्यायामनभिहितायां कर्मवाचकपदोत्तरं द्वितीया भवति, अभिहितायां तु प्रथमा भवति।

अथ आख्यातेन कदा कर्तृनिष्ठसंख्या प्रतिपाद्यते कदा कर्मनिष्ठा संख्या प्रतिपाद्यते इत्यत्र नियामकाभावात् अव्यवस्था स्यादिति तु नैव वक्तव्यम्, यतोहि स्वयमेव ग्रन्थकारेण नियामकं प्रोक्तमस्ति। तथा चाह ग्रन्थकारः- अत्र वदन्ति भावनाविशेष्ये संख्यान्वयः, समानपदोपात्तत्त्वेनैकान्वयित्वस्योचितत्वात्। भावनायाश्च विशेषणत्वेन अन्वययोग्यः कर्मत्वाद्यनवरुद्धप्रथमान्तपदोपस्थाप्य एव तथा साकाङ्क्षत्वात्।

अत्रायं विशेषः- अस्याः पङ्क्तेः अभिप्रायं विशदीकुर्मः। कर्मत्वाद्यनवरुद्ध इत्यस्य कर्मत्वादिविशेषणत्वेन तात्पर्याविषय इत्यर्थः। प्रथमान्तपदोपस्थाप्य इत्यस्य प्रथमान्तपदजन्योपस्थितिविशेष्य इत्यर्थः। अत्र चैत्रः तण्डुलं पचति, चैत्रः काष्ठेन पचति, इत्यत्र कर्मत्वकरणत्वादिलाक्षणिकप्रथमान्तपदोप-स्थाप्यतण्डुलकाष्ठादेः आख्यातार्थसंख्यान्वय-वारणाय कर्मत्वद्यनवरुद्धत्वविशेषणम्। तादृशविशेषणस्य यथाश्रुतार्थकत्वे उक्तस्थले तण्डुलकाष्ठादेः शाब्दबोधात् पूर्वं शाब्दबोधीयकर्मत्वादिनिरूपितविशेष्यताशून्य-त्वात् तद्दोषतादवस्थ्यम्। अतस्तादृशयथा-श्रुतार्थमपहाय कर्मत्वादिविशेषणत्वेन तात्पर्याविषयत्वरूपपर्यवसितार्थानुसारणम्।

ननु चैत्र इव मैत्रो गच्छतीत्यत्र आख्यातोक्तैकत्वसंख्यायाः चैत्रेऽन्वयः स्यात्

12 आख्यातवाददीधितपत्रसंख्या 4/ चतुर्थसंस्करणम् 1972/ प्रकाशकः तञ्जापुरीसरस्वतीमहालग्रन्थालयः, तञ्जौरम्, कर्नाटकप्रदेशः।

13 आख्यातवाददीधितपत्रसंख्या 4/ चतुर्थसंस्करणम् 1972/ प्रकाशकः तञ्जापुरीसरस्वतीमहालग्रन्थालयः, तञ्जौरम्, कर्नाटकप्रदेशः।

कर्मत्वाद्यनवरुद्धत्वात् प्रथमान्तपदोस्थाप्यत्वाच्च। किं च पक्वमन्नं भुज्यते इत्यादौ अन्नादौ आख्यातार्थसंख्यान्वयानुपपत्तिः, पाककर्मत्वस्यान्नेऽन्वयेन कर्मत्वाद्यनवरुद्धत्वा-भावादिति चेत् न। कर्मत्वाद्यनवरुद्धेत्यनेन इतरविशेषणत्वेन तात्पर्याविषय इत्यर्थस्य विवक्षितत्वात्। तथा च पक्वम् अन्नं भुज्यते इत्यत्र अन्नस्य विशेष्यत्वात् इतरविशेषणत्वेन तात्पर्याविषयत्वात्। तत्र आख्यातार्थसंख्यान्वयो-पपत्तिः। चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रस्य इवशब्दार्थसादृश्यविशेषणतया तात्पर्यविषयत्वात् न तत्र संख्यान्वयः।

यद्वा धात्वर्थातिरिक्ताविशेषणत्वं कर्मत्वाद्यनवरुद्धत्वमित्यस्यार्थः। तेन चैत्र इव मैत्रो गच्छतीत्यादौ चैत्रादेः धात्वर्थातिरिक्तसादृश्यविशेषणत्वात् न तत्र संख्यान्वयः। स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय प्रथमान्तपदोपस्थाप्यत्वमिति दलम्। स्तोकादेः द्वितीयान्तपदोपस्थाप्यत्वात् वारणम्।

अथ यदि अनभिहिते इत्यस्य अनभिहितसंख्याके इत्यर्थं स्वीकृत्य कर्मणि द्वितीया इत्यादीनाम् अनभिहितसंख्याके कर्मणि द्वितीया विभक्तिः भवति इत्यर्थं कृत्वा, एवमेव कर्तृकरणयोस्तृतीये-त्यादीनामपि सूत्राणामर्थं सम्पाद्य च चैत्रः तण्डुलं पचति, चैत्रेण तण्डुलः पच्यते इत्यादौ अभिहितानभिहितव्यवस्था-सम्पादने सत्यपि चैत्रेण दृष्टो घटः, चैत्रः घटं दृष्टवान् इत्यादौ अभिहितानभिहितव्यवस्था न स्यादत्र कृत्प्रत्ययेन संख्याया अनभिधानात् इति चेत्सत्यम्, अत एव तैः अनभिहिते इत्यस्य अनभिहितसंख्याके अनभिहितकारके इत्यर्थद्वयं स्वीक्रियते। ततश्च सूत्रार्थो जायते कर्मगतसंख्याकर्मान्यतरानभिधाने द्वितीया भवति। एवं च चैत्रेण घटो दृष्टः इत्यत्र कृत्प्रत्ययेन कर्मगतसंख्यानभिधानेऽपि कर्मण अभिधानात् नात्र द्वितीयेति भावः। एवमन्यत्रापि। तथा च न कुत्रापि दोष इति भावः। तथा चोक्तमपि नागेशभट्टेन **"ननु कृता सङ्ख्यानभिधानात् तत्र दोष इति चेत् न, तत्र कर्तृकर्माभिधानानभिधानाभ्यामेव व्यवस्थासम्भवात्। अन्यतरानभिधाने तृतीयेति सूत्रार्थः"**[14]। अत एव कौण्डभट्टोऽपि विषयेऽस्मिन् वदति – **"अत्र नैयायिकाः कर्तृसङ्ख्याभिधानादेव तदभिधानं वाच्यम्। न च तदन्वयनियमे मानाभावः, भावनान्वयिन्येव तदन्वयात्। सङ्ख्याभावनयोः समानपदोपात्त-त्वेनैकान्वयित्वस्योचितत्वात्। भावनायाश्चेतरा-विशेषणीभूतप्रथमान्त-पदोपस्थाप्य एवान्वयः, तथैवाकाङ्क्षितत्वात्। एवं कृदादावपि कर्त्राद्यभिधानादेवाभिधानव्यवस्था, अन्यतरानभिधाने तृतीया इति तु सूत्रार्थः। तस्मान्नोक्तानुपपत्तिः"**[15]।

---

14 वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या 83/ प्रथमसंस्करणम् 1977/ प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, उ. प्र.।

15 बृहद्वैयाकारणभूषणपत्रसंख्या 5/ प्रथमसंस्करणम् 1985/ प्रकाशकः चौखम्बामरभारतीप्रकाशनम्, वाराणसी उ.प्र.।

**पुरुषवचनव्यवस्थानापत्तिः**

रघुनाथनये पुरुषव्यवस्थोच्छेदापत्ति-रूपोऽपि दोषो वर्तते। तथाहि युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः-{पा० सू० १/४/१०५} इत्यनेन सूत्रेण मध्यमपुरुषस्य व्यवस्था भवति। सूत्रेऽस्मिन् सामानाधिकरण्यं नाम तिङ्वाच्यकारक-वाचित्वरूपम्, एवं च सूत्रस्यास्यार्थस्तावत् तिङ्वाच्यकारकवाचिनि युष्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च मध्यमपुरुषो भवतीति, यथा त्वं गच्छसि, मया त्वं दृश्यसे, इत्यादौ, किन्तु दीधितिकृन्नये तु तिङ्वाच्यं कारकमस्त्येव नहि, तन्नये तु तिङः कृतिरर्थः, कृतेश्च नहि युष्मदर्थेन साकं सामानाधिकरण्यं सम्भवति, तस्मात्कथं मध्यमपुरुषस्य व्यवस्था स्यात्। एवम् अस्मद्युत्तमः-{पा० सू० १/४/१०५} इति सूत्रमुत्तमपुरुषस्य व्यवस्थापकम्, सूत्रस्यास्यार्थस्तावत् तिङ्वाच्यकारकवाचिनि अस्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च उत्तमपुरुषो भवतीति, अत्रापि तिङ्वाच्यस्य कारकस्याभावादस्यापि सूत्रस्य प्रवृत्तिर्नैव भविष्यति, तस्मात्कथं दीधितकारनये उत्तमपुरुषस्य व्यवस्था भविष्यति।शेषे प्रथमः-{पा० सू० १/४/१०५} इत्यनेन प्रथमपुरुषस्य व्यवस्था भवति, अस्यापि सूत्रस्य प्रवृत्तिः कारकवाचकत्वाभावे नैव सम्भवति, तस्मात्कथं प्रथमपुरुषस्य व्यवस्था भविष्यति। एवं च पुरुषव्यवस्थोच्छेदापत्तिरूपो दोषो वर्तते दीधितिकारनय इति भावः।

**अत्र समाधानम्**

यद्यपि वैयाकरणैः सूत्रस्यास्यार्थो यथा प्रतिपादितो वर्तते तद्रीत्या दोषस्तु प्रतिभाति किन्तु न्यायनये सूत्रस्यार्थो भिन्नरूपेण प्रतिपादितं वर्तते। तथाहि- युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः- [पा० सू० १/४/१०५] इत्यत्र न्यायनये सामानाधिकरण्यं नाम तिङर्थान्वितार्थबोधकत्वम्, तिङर्थसंख्यान्वयिवाचकत्वं वा। एवं च सूत्रस्यास्यार्थो भवति तिङर्थान्वितार्थबोधके तिङर्थसंख्यान्वयिवाचिनि वा युष्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च मध्यमपुरुषो भवति। यथा त्वं गच्छसि इत्यत्र तिङर्थः कृतिः तस्यान्वयो प्रथमान्तार्थे युष्मदर्थे भवति, अतः तिङर्थकृत्यन्वितार्थः युष्मदर्थः, तद्बोधके युष्मदि उपपदे सति प्रकृतस्थले मध्यमपुरुषस्य प्रयोगो भवति। अथवा तिङर्थात्र एकत्वसंख्या तस्या युष्मदर्थे अन्वयो भवति, अतस्तदन्वयि युष्मदर्थः, तद्वाचिनि युष्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने चात्र मध्यमपुरुषस्य प्रयोगो भवति। यथा त्वं गच्छसि, त्वं पचसि, इत्यादौ भवति एवमन्यत्रापि बोध्यम्। एवम् अस्मद्युत्तमः-[पा० सू० १/४/१०५] इति सूत्रस्यार्थो भवति, तिङर्थान्वितार्थबोधके तिङर्थसंख्यान्वयिवाचिनि वा अस्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च उत्तमपुरुषो भवति। अहं गच्छामि, अहं पचामि इत्यादौ भवति। एवमन्यत्रापि बोध्यम्। एवं शेषे प्रथमा [पा० सू० १/४/१०५] इत्यत्रापि तिङर्थान्वितार्थबोधके तिङर्थसंख्यान्वयिवाचिनि वा युष्मद्भिन्ने अस्मद्भिन्ने वा उपपदे प्रयुज्यमाने

अप्रयुज्यमाने च प्रथमपुरुषो भवति। यथा रामो गच्छतीत्यादौ। एवमन्यत्रापि।

**अत्र शाब्दबोधविचारः**

**चैत्रः ग्रामं गच्छति -** अत्र वाक्ये गम्धात्वर्थः संयोगः व्यापारश्च, द्वितीयार्थो वृत्तित्वम्, आख्यातार्थः आश्रयत्वम्, तत्र ग्रामस्य वृत्तित्वे निरूपितत्वसम्बन्धेनान्वयः, वृत्तित्वस्य संयोगे आश्रयतासम्बन्धेनान्वयः, संयोगस्य व्यापारे अनुकूलत्वसम्बन्धेनान्वयः, व्यापारस्य आश्रयत्वे निरूपितत्वसम्बन्धेनान्वयः, आश्रयत्वस्य च चैत्रे आश्रयतासम्बन्धेनान्वयः भवति, तथा च ग्रामनिरूपितवृत्तित्ववत्संयोगानुकूलव्यापारनिरूपिताश्रयत्ववच्चैत्रः, अर्थात् ग्रामवृत्तिसंयोगानुकूल-व्यापाराश्रयचैत्रः इति बोधो भवति। एवमन्यत्रापि बोध्यम्।

**चैत्रेण ग्रामो गम्यते -** अत्र वाक्ये गम्धात्वर्थः संयोगः व्यापारश्च, तृतीयार्थो वृत्तित्वम्, आख्यातार्थः आश्रयत्वम्, तत्र चैत्रस्य वृत्तित्वे निरूपितत्वसम्बन्धेनान्वयः, वृत्तित्वस्य व्यापारे आश्रयतासम्बन्धेनान्वयः, व्यापारस्य संयोगे जन्यत्वसम्बन्धेनान्वयः संयोगस्य आश्रयत्वे निरूपितत्वसम्बन्धेनान्वयः, आश्रयत्वस्य च ग्रामे आश्रयतासम्बन्धेनान्वयः भवति, तथा च चैत्रनिरूपितवृत्तित्ववद्व्यापार-जन्यसंयोगनिरूपिताश्रयत्ववद्ग्रामः, चैत्रवृत्तिव्यापारजन्यसंयोगाश्रयो ग्रामः, इति बोधो भवति। एवमन्यत्रापि बोध्यम्।

**चैत्रेण सुप्यते -** चैत्रेण इत्यत्र तृतीयार्थो वृत्तित्वम्, तत्र चैत्रस्य निरूपितत्वसम्बन्धेनान्वयः, ते इत्यस्य कृतिः, तत्र वृत्तित्वस्य आश्रयत्वसम्बन्धेनान्वयः, कृतेश्च धात्वर्थव्यापारे जन्यत्वसम्बन्धेनान्यः, धात्वर्थस्य स्वप्नस्यापि व्यापारे अनुकूलत्वसम्बन्धेनान्वयः, तथा चोक्तवाक्यात् चैत्रनिरूपितवृत्तितावत्कृति-जन्यस्वप्नानुकूलव्यापारः। अर्थात् चैत्रवृत्तिकृतिजन्यस्वापः इति यावत्। एवमन्यत्रापि बोध्यम्।

**अत्र रघुनाथमतखण्डनम्**

रघुनाथशिरोमणिनये कर्तृविहिताख्यातप्रत्ययानामर्थः कृतिः, कालः, संख्या, इति प्रतिपादितम्। कर्मविहिताख्यातप्रत्ययानाञ्च फलम्, परसमवेतत्वम्, कालः, संख्या चार्थः, इति प्रतिपादितम्। कारणं हि नैयायिकैः करोतेः यत्नार्थकत्वं संसाध्य यत्नार्थकेन करोतिना विवरणादाख्यातप्रत्ययानां यत्नार्थकत्वं प्रतिपादितम्। इदं मतं साधु नास्ति। कारणं ह्यस्मिन् मते पचतीत्यत्र आख्यातस्य कृतिरर्थः। रथो गच्छतीत्यत्र लक्षणया व्यापारो वाच्यः। जानाति द्वेष्टि इच्छति इत्यादौ आख्यातस्य लक्षणया आश्रयत्वमर्थः, घटो नश्यतीत्यत्र आख्यातस्य लक्षणया प्रतियोगित्वमर्थः, इति स्वीकर्तव्यं भवति। तदपेक्षया सर्वत्राख्यातस्य आश्रय एवार्थ इत्येव स्वीकुर्वन्तु।

अपि स्वशक्यसाक्षात्सम्बन्धो हि लक्षणा, इति हि नैयायिकमतं वर्तते। एवं च सति रथो गच्छतीत्यादौ आख्यातशक्यकृतेः व्यापाररूपेणार्थेन सह आश्रयत्वरूपेणार्थेन साकं वा नहि कश्चन साक्षात्सम्बन्धो वर्तते। एवमेव

घटो नश्यतीत्यादौ प्रतियोगित्वरूपेणार्थेन साकमपि नहि कृतेः कश्चन साक्षात्सम्बन्धः, इति कृत्वा लक्षणापि प्रकृते दुरुपपादा वर्तते।

अपि च पुरुषव्यवस्थाकरणाय सामानाधिकरण्यं नाम तिङर्थसंख्यान्वयि-वाचकत्वरूपं स्वीकृतं तदपि न साधु, तिङर्थाभिन्नार्थकत्वरूपसामानाधिकरण्यस्यैव सामानाधिकरण्यशब्देन लाभात् तथैव युक्तत्वाच्च।

अपि च अभिहितानभिहित-व्यवस्थाकरणाय संख्याकारकान्यतरान-भिधाने तत्तद्विभक्तयः इति कर्मणि द्वितीया इति वक्तव्यम्, तत्र अन्यतरत्वमपि दुरुपपादं वर्तते।

अपि च वैयाकरणनये तु सर्वत्र धात्वर्थे व्यापारे कालस्यान्वयो भवति। किन्तु नैयायिकैः कालस्य कृतावन्वयः स्वीक्रियते सामान्यरूपेण, किन्तु जानाति, इच्छतीत्यादौ धात्वर्थे कालस्यान्वयः स्वीकर्तव्यो भवति। तस्मात्कुत्र कृतावन्वयः, कुत्र धात्वर्थे अन्वयः, इत्यर्थं पृथक् पृथक् कार्यकारणभावस्य कल्पना कर्तव्या भविष्यतीति कृत्वा नैव लाघवं कुत्रचिदपि न्यायनये वर्तते।

अथ कर्तृविहिताख्यातप्रत्ययानामर्थः यदि कृतिः, कर्तृविहितकृत्प्रत्ययानाञ्चार्थः कर्ता, इति वैषम्यमपि नैयायिकनये वर्तते। तस्य किं कारणमित्यस्मिन् विषये नैयायिकैरुच्यते यत् चैत्रः पाचकः, इत्यादौ पाकानुकूलव्यापाराश्रयाभिन्नः चैत्रः, इत्यभेदान्वयबोध एव कृत्प्रत्ययानां कर्तृवाचकत्वे प्रमाणमिति। ततश्च पचतिकल्पं चैत्रः पचतिरूपं मैत्रः, इत्यादावपि अभेदान्वयानुरोधेन कर्तृवाचकत्वं तिङ्प्रत्ययानामपि स्वीकुर्वन्तु, एवमेव पचति चैत्रः इत्यादौ सामानाधिकरण्यानुरोधेनापि तिङां कर्तृवाचकत्वमस्तु। अत एव प्रोक्तमपि नागेशभट्टेन **“तत्र आख्यातस्य कर्तृकर्मणी वाच्ये। पाचको देवदत्त इत्यादाविव देवदत्तः पचतीत्यादावपि युष्मद्युपपदे समानाधिकरणे इति सूत्रानुवादबोधित-ऋष्यनुभवसिद्धसामानाधिकर-ण्यानुभवानुरोधात्। एतेन कर्तृत्वकर्मत्वे तदर्थ इत्यपास्तम्”**[16]**।** एवं च खण्डनीयमेव नैयायिकमतमाख्यातविषये इति भावः।

**निष्कर्षः**

रघुनाथमते कर्तृविहिताख्यात-प्रत्ययानां कृतिः कालः संख्या चार्थः। कर्मविहिताख्यातप्रत्ययानां च फलं कालः संख्या चार्थः। भावविहिताख्यातप्रत्ययानां कृतिः कालश्चार्थः। तत्र कालः कृतौ अन्वेति समानप्रत्ययोपात्तत्वात्, कुत्रचिच्च धात्वर्थे अपि अन्वेति। संख्या तु नैयायिकमते प्रथमान्तार्थे अन्वेति। तिङर्थभूता कृतिः प्रथमान्तार्थे अन्वेति। तिङर्थभूतं फलमपि प्रथमान्तार्थे अन्वेति। प्रथमान्तार्थमुख्यविशेष्यकश्च बोधो भवति। किन्तु रघुनाथमतं समीचीनं नास्ति। अतः मतमिदं न स्वीकुर्वन्ति वैयाकरणाः।

---

16 वैयाकरणसिद्धान्तमञ्जुषापत्रसंख्या ८३/ प्रथमसंस्करणम् 1977/ प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी उ. प्र.।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# संस्कृतव्याकरणस्य प्रसारे जानकीनाथभट्टाचार्यशास्त्रीमहोदयस्य अवदानम्

**डॉ. प्रतिमभट्टाचार्यः**

**सहायकाध्यापकः, संस्कृतविभागः, सुकुमारसेनगुप्तमहाविद्यालयः**

**केशपुरम्, पश्चिममेदिनीपुरम्, पश्चिमबङ्गः**

**प्रबन्धसारः**

*प्राचीनकालादारभ्य अस्माकं बङ्गदेशः संस्कृतभाषामवलम्ब्य शास्त्रचर्चायाः साहित्यचर्चायाः च पीठस्थानरूपेण स्वीकृतः। बङ्गदेशीयाः विविधशास्त्रज्ञाः पण्डिताः अध्यापकाश्च ग्रन्थरचनामाध्यमेन आत्मनः ज्ञानगरिमाणं प्रकाशितवन्तः। एतेषां विदग्धानां पण्डितानां मध्ये जानाकीनाथभट्टाचार्यशास्त्रिमहोदयस्य नाम विशेषरूपेण स्मरणीयम्। अविभक्तबङ्गदेशस्य फरिदपुरजिलान्तर्गते धानुकाग्रामे १८८७-ख्रीष्टीये वर्षे जानकीनाथमहोदयस्य पुण्याविर्भावोऽभवत्। वंशपरम्परया तस्य पूर्वजाः संस्कृतशास्त्रचर्चां कृतवन्तः। मेधावी जानकीनाथोऽपि शैशवे पितुः भ्रातुः च सकाशात् संस्कृतमधीतवान्। यौवने भारताटने स रतोऽभवत्। तत्र वाराणस्यां प्रसिद्धपण्डितानां स्नेहानुकूल्ये तस्य संस्कृतसाधना परिपक्वा जाता। सिंहलप्रदेशमपि गत्वा स तत्र संस्कृताध्ययनं कृतवान्। बङ्गप्रदेशे विहारप्रदेशे च विविधविद्यालयेषु शिक्षकरूपेण तस्य कर्मजीवनमतिवाहितम्। कलिकातायां 'संस्कृतसाहित्यपरिषत्' इति प्रतिष्ठानस्य स्थापनार्थं तस्य प्रभूतमवदानं स्वीकृतम्। १९६८-ख्रीष्टीये वर्षे संस्कृतसाधनायां जानकीनाथमहोदयस्य असामान्यं कृतित्वं राष्ट्रीयपुरस्कारेण विभूषितमभवत्। पराधीनभारतवर्षे आङ्गलभाषायाः प्रसारकार्येषु समकालीनशासकाः यत्नवन्तः आसन्। विद्यालयशिक्षा उच्चतरशिक्षा च तदा प्राधान्येन आङ्गलमाध्यमेन अभवत्। भारतवर्षस्य सनातनी भाषा संस्कृतं भवत्येव। परन्तु व्रिटिशशासने अस्याः भाषायाः मर्यादा सर्वदा न स्वीकृता। विशेषतः विविधव्याकरणगतवैचित्र्यात् विदेशिनां कृते संस्कृतभाषा दुरूहा एव प्रतिभाति स्म। स्वाधीनतोत्तरकालेऽपि बङ्गदेशे शिक्षाप्रतिष्ठानेषु आङ्गलभाषामाध्यमेन एव संस्कृतशिक्षादानं प्रचलितमासीत्। सापि पद्धतिः बङ्गभाषाभाषिणां कृते कष्टसाध्या एव आसीत्। अस्याः समस्यायाः समाधानकल्पे पण्डितशिरोमणिना जानकीनाथेन "Helps to the Study of Sanskrit" इति ग्रन्थः रचितः। अस्मिन् ग्रन्थे संस्कृतव्याकरणस्य विविधाः नियमाः आङ्गलभाषायां बङ्गभाषायां च सरलतया लौकिकोदाहरणैः सह व्याख्याताः। पाणिनीयव्याकरणशाखा अत्र प्राधान्येन अनुसृता। वोपदेवरचितस्य मुग्धबोधव्याकरणस्य प्रभावोऽपि अस्मिन् ग्रन्थे परिदृश्यते। छात्राणां बोधसौकर्यविधानार्थं रचितोऽयं ग्रन्थः अद्यावधि विश्ववन्दितो वर्तते।*

**कुञ्चीशब्दाः**

बङ्गदेशे संस्कृतचर्चा, संस्कृतव्याकरणम्, जानकीनाथभट्टाचार्यशास्त्री, Helps to the Study of Sanskrit, आङ्गलभाषायां संस्कृतव्याकरणशिक्षा।

## भूमिका

प्राचीनकालादारभ्य अस्माकं बङ्गदेशः संस्कृतभाषामवलम्ब्य शास्त्रचर्चायाः साहित्यचर्चायाः च पीठस्थानरूपेण स्वीकृतः। बङ्गदेशीयाः विविधशास्त्रज्ञाः पण्डिताः अध्यापकाश्च वेदपुराणदर्शन-व्याकरणसाहित्यादीन् विविधान् विषयान् आश्रित्य ग्रन्थरचनामाध्यमेन आत्मनः ज्ञानगरिमाणं प्रकाशितवन्तः। एतेषां विदग्धानां पण्डितानां मध्ये जानाकीनाथभट्टाचार्यशास्त्रि-महोदयस्य नाम विशेषरूपेण स्मरणीयम्।

## जानकीनाथस्य परिचयः छात्रजीवनं च

अविभक्तबङ्गदेशस्य फरिदपुरजिलान्तर्गते धानुकाग्रामे १८८७-ख्रीष्टीये वर्षे जानकीनाथमहोदयस्य पुण्याविर्भावोऽभवत्। अधुना फरिदपुरजिला बाङ्गलादेशे अन्तर्भुक्ता। वंशपरम्परया जानकीनाथस्य पूर्वजाः संस्कृतशास्त्रचर्चां कृतवन्तः। तस्य पिता ईश्वरचन्द्रभट्टाचार्यः विविधसंस्कृतशास्त्रेषु सुपण्डितः आसीत्। विशेषतः व्याकरणशास्त्रे अतुलनीयदक्षतावशतः स “विद्यारत्नम्” इत्युपाधिना भूषितोऽभवत्। जानकीनाथस्य ज्येष्ठभ्राता द्वारकानाथभट्टाचार्योऽपि संस्कृतपण्डितसमाजे समादृत आसीत्। न्यायशास्त्रे तस्य पाण्डित्यं सुविदितमासीत्। मेधावी जानकीनाथोऽपि शैशवे पितुः भ्रातुः च सकाशात् संस्कृतमधीतवान्। कर्मसूत्रे तस्य पिता इदानीन्तने पाकिस्तानस्थिते लाहोरप्रदेशे कियत्कालमतिवाहितवान्। तत्र जानकीनाथः राष्ट्रीयविद्यालयात् प्रवेशिकापरीक्षां साफल्येन सह उत्तीर्णोऽभवत्। यौवने भारताटने स रतोऽभवत्। तत्र वाराणस्यां प्रसिद्धपण्डितानां स्नेहानुकूल्ये तस्य संस्कृतसाधना परिपक्वा जाता। वाराणस्यां वामाचरणन्यायाचार्यः, गोपिनाथकविराजः, कैलाशशिरोमणिः, चन्द्रकिशोरतर्कतीर्थः इत्यादयः तस्य आचार्याः आसन्। सिंहलप्रदेशमपि गत्वा स तत्र संस्कृताध्ययनं कृतवान्।

## जानकीनाथस्य कर्मजीवनम्

बङ्गप्रदेशे विहारप्रदेशे च विविधविद्यालयेषु शिक्षकरूपेण जानकीनाथस्य कर्मजीवनमतिवाहितम्। विद्यानुरागी जानकीनाथः कलिकातायां श्यामबाजार इति स्थाने विद्यमानस्य ‘सरस्वती इन्स्टिटिउशन्’ (Saraswati Institution) इत्याख्यस्य विद्यालयस्य स्थापकानामन्यतमः आसीत्। अधुना स विद्यालयः “शैलेन्द्रसरकारविद्यालय”रूपेण प्रसिद्धः। कलिकातायां ‘संस्कृतसाहित्यपरिषत्’ इति प्रतिष्ठानस्य स्थापनार्थं तस्य प्रभूतमवदानं स्वीकृतम्। कलिकातायां शोभाबाजारस्थितं तस्य गृहं समसामयिकानां संस्कृतानुरागिणां पण्डितानां छात्राणां च कृते पुण्यस्थलमिव

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

परिगणितं भवति। १९६८-ख्रीष्टीये वर्षे संस्कृतसाधनायाः जानकीनाथमहोदयस्य असामान्यं कृतित्वं राष्ट्रीयपुरस्कारेण विभूषितमभवत्। १९७१ ख्रीष्टीये वर्षे संस्कृतभारत्याः आत्मजस्यास्य तिरोभावोऽभवत्।

### "Helps to the Study of Sanskrit" इति ग्रन्थरचनायाः पटभूमिका

पराधीनभारतवर्षे आङ्गलभाषायाः प्रसारकार्येषु समकालीनशासकाः यत्नवन्तः आसन्। विद्यालयशिक्षा उच्चतरशिक्षा च तदा प्राधान्येन आङ्गलमाध्यमेन अभवत्। भारतवर्षस्य सनातनी भाषा संस्कृतं भवत्येव। परन्तु व्रिटिशशासने अस्याः भाषायाः मर्यादा न तु सर्वदा स्वीकृता। विशेषतः विविधव्याकरणगतवैचित्र्यात् विदेशिनां कृते संस्कृतभाषा दुरूहा एव प्रतिभाति स्म। स्वाधीनतोत्तरकालेऽपि बङ्गदेशे शिक्षाप्रतिष्ठानेषु आङ्गलभाषामाध्यमेन एव संस्कृतशिक्षादानं प्रचलितमासीत्। सापि पद्धतिः बङ्गभाषाभाषिणां कृते कष्टसाध्या एव वर्तते स्म। अस्याः समस्यायाः समाधानार्थं पण्डितशिरोमणिना जानकीनाथेन "Helps to the Study of Sanskrit" इति ग्रन्थः रचितः। अस्मिन् ग्रन्थे संस्कृतव्याकरणस्य विविधाः नियमाः आङ्गलभाषायां बङ्गभाषायां च सरलतया लौकिकोदाहरणैः सह व्याख्याताः।

### ग्रन्थस्य वैशिष्ट्यानि विषयसूची च

"Helps to the Study of Sanskrit" इति ग्रन्थस्य प्रारम्भिकांशे ग्रन्थकारः पुस्तकस्यास्य वैशिष्ट्यानि कथितवान्। तत्र उल्लेखनीयानि वैशिष्ट्यानि यथा-

क) व्याकरणशिक्षायाः प्रधाना उपयोगिता भाषाप्रयोगे कुशलतार्जनमेव। तदर्थं ग्रन्थे यथासाध्यमनुशीलनीभागः संयोजितः।

ख) पाठार्थिनां सौकर्यसाधनार्थं धातूनां व्यवहारप्रदर्शनकाले तेषां वर्णानुक्रमिकविन्यासः अनुसृतः।

ग) विविधेभ्यः धर्मार्थनीतिशास्त्रेभ्यः काव्यनाटकेभ्यः च वैयाकरणप्रयोगाणाम् उदाहरणानि संगृहीतानि।

घ) संस्कृतसाहित्येषु प्रचलितानां प्रवादवाक्यानां सूक्तीनां च आङ्गलभाषानुवादः अत्र प्रदर्शितः।

ङ) आङ्गलभाषायां प्रचलितक्रियापदानां वर्णानुक्रमिकविन्यासं कृत्वा संस्कृतभाषायां तेषामर्थप्रकाशकानां धातूनां तालिका अत्र विधृता।

च) अनेकानामाङ्गलशब्दानां संस्कृतप्रतिशब्दाः अत्र तालिकारूपेण उपस्थापिताः।

छ) छात्राणामाशुबोधनाय संहिताकार्यं न सर्वत्र सम्पादितम्। किञ्च संहितायां नित्यविधिरपि न सर्वदा अनुसृतः ग्रन्थकारेण। यथा- "अधि-शी-स्थासाम् अधिकरणम्"।

ग्रन्थस्यास्य आङ्गलभाषायां रचिता विषयसूची छात्राणां सुखबोधाय अतीव यत्नसहकारेण परिकल्पिता। "Introductory Rules"-इत्याख्ये प्रथमे आलोचनांशे आङ्गलभाषातः संस्कृतभाषानुवादस्य मौलिकनियमाः वर्णिताः। अतः परं क्रमेण विशेष्यविशेषणविवेचनम्, पुरुषवचनलिङ्ग-

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

निर्धारणम्, कारकविभक्तिनिर्णयः, सर्वनामपरिचयः, तिङन्तप्रकरणम्, वाच्यपरिवर्तनम्, प्रत्ययप्रयोगः, उपसर्गव्यवहारः, अव्ययविचारः, परस्मैपदात्मनेपदविधानम्, सन्नन्तयङन्तनामधातूनां परिचयः, स्त्रीप्रत्ययपरिचयः, समासप्रकरणम्, तद्धितप्रकरणम् इत्यादयः विषयाः आलोचिताः। ग्रन्थस्य अवशिष्टांशे आङ्गलभाषातः बङ्गभाषातश्च संस्कृतभाषायामनुवादकार्यस्य विविधानि प्रायोगिककौशलानि उद्घाटितानि।

**जानकीनाथस्य व्याकरणशिक्षापद्धतिः**

ग्रन्थस्य प्रारम्भे जानकीनाथेन स्पष्टीकृतं यत् विद्यालयशिक्षायामुच्चशिक्षायां च पाणिनिव्याकरणस्य प्राधान्यं सर्वजनविदितम्। अतः पाणिनीयव्याकरणशाखा अत्र प्राधान्येन अनुसृता। अनेकानां पाणिनीयसूत्राणां सरलव्याख्या ग्रन्थकारेण प्रसङ्गक्रमेण प्रदत्ता। अपि च ग्रन्थे अनेकस्थानेषु जटिलानां पाणिनीयसूत्राणां सरलीकृतरूपाणि दृश्यन्ते। यथा- कारकाणां संज्ञानिर्धारणविषये "क्रियासम्पादकः कर्त्ता", "क्रिययाक्रान्तं कर्म", "यस्मै दानं सम्प्रदानम्", "यतो विश्लेषोऽपादानम्" इत्यादीनि सूत्राणि ग्रन्थे सन्निविष्टानि। ग्रन्थे अन्यानि उल्लेखयोग्यानि अपाणिनीयसूत्राणि यथा- "अधि-शी-स्थासाम् अधिकरणम्", "अभिनिविशो विभाषा", "विभाषा दिवः करणम्", "सहार्थैः", "हेतुरुत्पत्तेः", "आविर्भवन-भूर्भुवः", "ऋद्व्यञ्जनाभ्यां ण्यत्", "अदन्ताद् आप्" इत्यादीनि।

वोपदेवरचितस्य मुग्धबोधव्याकरणस्य प्रभावोऽपि अस्मिन् ग्रन्थे परिदृश्यते। मुग्धवोधव्याकरणे विधृतानि सूत्राण्यपि ग्रन्थकारेण अत्र सन्निविष्टानि। यथा- "यावत् पूर्वाभ्यां भाव्ये"[1], "संप्रतेरस्मृतौ"[2], "प्रोपादारम्भे"[3] इत्यादीनि।

अनुशीलनीपरिकल्पनायां जानकीनाथस्य स्वकीयता सम्यक् परिस्फुटा। ग्रन्थे अधीतविषयेषु छात्राणां व्यवहारिकज्ञान-सम्पादनाय विषयाध्यापनायाः अन्तिमभागे विषयोपयोगिनी अनुशीलनी अन्तर्भुक्ता। तत्र विषयानुगप्रश्नानुशीलनम्, अनुवादकार्यम् अशुद्धिसंशोधनं च करणीयरूपेण व्यवस्थापितम्। सर्वत्र प्रदत्तोत्तरस्य कारणमपि उल्लेखनीयमिति निर्देशः ग्रन्थकारेण कृतः। अनया पद्धत्या पाठार्थिनां विषयावबोधनं संशयनिरसनं च भवत्येव।

उदाहरणरूपेण शिष्टप्रयोगाणां व्यवहारः जानकीनाथस्य व्याकरणशिक्षायाः विशेषवैशिष्ट्यं वर्तते। प्रसिद्धेषु काव्यनाटकादिषु तेन शब्दानुशासननियमानामुदाहरणं संगृहीतम्। यथा- कालिदासकृतात् मेघदूतमिति काव्यात् अजहल्लिङ्गपदस्य उदाहरणं प्रदर्शितम्- "सन्तप्तानां त्वमसि शरणम्"[4]। अभिज्ञानशकुन्तलमिति नाटकात् कुलशब्दयोगात् एकवचनप्रयोगस्य दृष्टान्तो

[1] मुग्धवोधव्याकरणम्, सूत्रसंख्या- ९३६

[2] तदेव, सूत्रसंख्या- ८९९

[3] तदेव, सूत्रसंख्या- ८९५

[4] मेघदूतम्, पूर्वमेघः, श्लोकसंख्या- ७

गृहीतो यथा- “छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यसतु”[5]। भारविकृतात् किरातार्जुनीयमिति महाकाव्यात् अभितः इति शब्दयोगात् द्वितीयाविभक्तेः प्रयोगस्य उदाहरणं प्रदत्तम्। यथा- “माहेन्द्रं नगमभितः”[6]। माघरचितात् शिशुपालवधमिति महाकाव्यात् पुराशब्दयोगेन भविष्यकाले लट्लकारस्य प्रयोगो दर्शितो यथा- “संधत्स्व पुरा न नश्यसि”[7]। शिष्टप्रयोगाणां व्याकरणशास्त्रानुगया व्याख्यया शिक्षार्थिनां तत्तद्काव्यनाटकादिविषये ज्ञानविवर्धनं च भवत्येव।

## “Helps to the Study of Sanskrit” इति ग्रन्थस्य भाषातात्त्विकगुरुत्वम्

“Helps to the Study of Sanskrit” इति ग्रन्थस्य तुलनामूलकभाषातत्त्वस्य चर्चायां प्रभूतावदानं वर्तते। आङ्गलभाषातः संस्कृतभाषायामनुवाद-कार्यसाधनार्थं संस्कृतभाषातः आङ्गलभाषायामनुवादकार्यसाधनार्थं च अस्मिन् ग्रन्थे बहुविधाः निर्देशिकाः विद्यन्ते। तत्र उभयोः भाषयोः व्याकरणशास्त्रस्य तुलनापि कृता ग्रन्थकारेण। ग्रन्थस्य परिशिष्टांशेऽपि उभयोः भाषयोः वाग्धाराव्यवहारविषये, धातुरूपादर्शविषये शब्दप्रयोगविषये च तुलनात्मिका समीक्षा सम्पादिता। अतः ग्रन्थोऽयं भाषाद्वयस्य तुलनात्मकभाषातत्त्वचर्चायां सोपानस्वरूपः।

[5] अभिज्ञानशकुन्तलम्, २.६.

[6] किरातार्जुनीयम्, ७.२०

[7] शिशुपालवधम्, १६.५६.

## छात्राणां कृते ग्रन्थस्यास्य उपयोगिता

बङ्गभाषाभाषिणां छात्राणां कृते ग्रन्थोऽयमतीव उपकारी वर्तते। सरलबङ्गभाषायां जटिलानां व्याकरणसूत्राणां नियमानां च सोदाहरणं व्याख्या अत्रोपलब्धा। बङ्गभाषाभाषिणां शिक्षार्थिनाम् आशुबोधाय ग्रन्थकारेण संस्कृतभाषालेखनमाध्यमरूपेण देवनागरीलिपिं विहाय अस्मिन् ग्रन्थे बङ्गलिप्याः व्यवहारः कृतः। ग्रन्थस्य पादटीकासु (Foot-notes) मूलविषयाश्रिताः विविधाः सन्दर्भाः उपस्थापिताः[8]। अपि च ग्रन्थे छात्राणां सुविधार्थं स्थाने स्थाने N.B. (Nota Bene) इति निर्देशमाध्यमेन विशेषरूपेण स्मर्तव्यविषयाः उल्लिखिताः वर्तन्ते[9]। अनया छात्रोपयोगितया ग्रन्थोऽयं अधुनापि विद्यालयेषु पाठ्यपुस्तकरूपेण सादरं गृहीतो भवति।

## उपसंहारः

“Helps to the Study of Sanskrit” इति ग्रन्थस्य “विज्ञापनम्” इत्याख्ये सूचनांशे ग्रन्थकारेण ग्रन्थरचनायाः उद्देश्यरूपेण सरलपद्धत्या संस्कृतव्याकरणशास्त्रोपपादनं, संस्कृतभाषया वाक्यरचनायाः दक्षतार्जनमनुवादशिक्षणं च उल्लिखितम्[10]।

[8] तत्रोदाहरणं यथा- “কামুক শব্দের প্রয়োগে ষষ্ঠী বিভক্তি হয়। যথা, ধনস্য কামুকঃ”+ Helps to the Study of Sanskrit, pg-51.

[9] तत्रोदाहरणं यथा- “Optative Sentence গুলিকে আশীর্লিঙ্ দিয়া অনুবাদ করিতে হয়। লোট্ দিয়াও এইরূপ sentence সকল অনুবাদ করা যায়।” -Helps to the Study of Sanskrit, pg-82.

[10] विज्ञापनांशे उक्तं यत्- “ইংরাজী-ভাষা হইতে সংস্কৃত-ভাষায় অনুবাদ, সংস্কৃত-ভাষায় বাক্যরচনা ও সংস্কৃত ব্যাকরণ সহজে শিখাইবার অভিপ্রায়ে কতিপয় প্রবীণ অধ্যাপক ও সংস্কৃতানুরাগী বন্ধুর অনুরোধে সম্পূর্ণ অভিনব প্রণালীতে এই

ग्रन्थरचनायाः उद्देश्यमिदं तु सर्वथा सफलं सञ्जातम्। जानकीनाथः स्वयमवदत् यत् बङ्गदेशे आसामप्रदेशे च ग्रन्थस्यास्य मौलिकत्वमभिनवत्वं च अध्यापकैः प्रशंसितमभवत्[11]। वस्तुतस्तु छात्राणां बोधसौकर्यविधानार्थं रचितोऽयं ग्रन्थः ग्रन्थकारस्य अतुलनीयशास्त्रज्ञानस्य परिचयमात्मकलेवरे निधाय अद्यावधि विश्ववन्दितो वर्तते।

## सहायकग्रन्थसूची


- भट्टाचार्यः, जानकीनाथः। (२००३)। Helps to the Study of Sanskrit (हेल्पस् टु दि स्टाडि अफ् स्यान्स्क्रिट्)। कलिकाता : संस्कृत वुक् डिपो।
- पाणिनिः। (१९७७)। अष्टाध्यायीसूत्रपाठः (नारायणमिश्ररचिता 'आभा' टीका सहिता)। वाराणसी : चौखाम्बा ओरियेण्टालिया।
- वोपदेवः। (१९८५)। मुग्धवोधव्याकरणम् ('सुवोधिनी' 'प्रमोदजननी' इति टीकाद्वययुक्ता)। ब्रह्मचारी, निरञ्जनस्वरूपः (सम्पा.)। कलिकाता : संस्कृत पुस्तक भाण्डार।


পুস্তকখানি লিখিত হইয়াছিল"+ Helps to the Study of Sanskrit, विज्ञापनांशः।

[11] विज्ञापनांशे उक्तं यत्- "ভগবৎকৃপায় সমগ্র বঙ্গদেশে ও আসামের বহু গুণগ্রাহী অধ্যাপক এই পুস্তকে অবলম্বিত শিক্ষাদানপ্রণালীর নূতনত্ব ও কার্য্যকারিতার সম্যক্ উপলব্ধি করিয়াছেন"+ Helps to the Study of Sanskrit, विज्ञापनांशः।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# मिताक्षरागतकारकाधिकारीयसूत्राणां प्रत्युदाहरणपर्यालोचनम्

**शुभमाझिः**

**सहायकाध्यापकः, संस्कृतविभागः, गभर्न्मेन्ट-जेनारेल-डिग्री-महाविद्यालयः**
**शालवनी, पश्चिममेदिनीपुरम्, पश्चिमबङ्गः**

**प्रबन्धसारः**

*प्रस्तुतेऽस्मिन् प्रबन्धे महामतिना अन्नंभट्टेन कृता मिताक्षरा इति अष्टाध्याय्याः वृत्तेः कारकाधिकारीयसूत्राणां प्रत्युदाहरणानाम् उपरि विशिष्टालोचना क्रियते। **व्याख्यानतो विशेषोत्तपत्तिः** इति नियमात् व्याख्यानं तावत् मुख्यमेकम्। तस्मिन् व्याख्याने प्रत्युदाहरणस्य भूमिकापि गुरुत्वपूर्णा वर्तते। अत्रादौ भूमिकांशे प्रत्युदाहरणविषये आलोच्यते ततः मिताक्षरायाः परिचयः दीयते। तदनन्तरं प्रत्युदाहरणानां समीक्षणञ्च क्रियते। अन्ते उपसंहारेण समाप्यते।*

**कुञ्चीशब्दाः** –

व्याख्या, उदाहरणम्, प्रत्युदाहरणम्, मिताक्षरा, उपयोगः।

## भूमिका -

महाभाष्ये पस्पशाह्निके सूत्रात् कथं साधुशब्दज्ञानं भविष्यतीत्यस्य समाधानरूपेण उच्यते सूत्राणाम् व्याख्यानेन। ततः व्याख्यानं कीदृशं विधेयमिति प्रश्ने पतञ्जलेः सिद्धान्तस्तावत् ‘उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत् समुदितं व्याख्यानं भवति’[1] इति। उत्पूर्वकः आङ्पूर्वकश्च हृधातोः ल्युटि उदाहरणमिति। स्वाभिप्रायस्य प्रतिष्ठापनाय प्रयुक्तं समर्थवचनमुदाहरणमिति। उदाहरणसम्बन्धे शास्त्रेषु कथितं -

यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात्।
साध्यन्ते निपुणैरर्थास्तदुदाहरणं स्मृतम्॥[2] इति।

न्यायनयेऽपि उदाहरणविषये उच्यते ‘साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्तः उदाहरणम्’[3] इति। प्रत्युदाहरणम् उदाहरणस्य विपरीतम्। यदा उदाहरणस्य सापेक्षे पूर्वपक्षः उपस्थाप्यते तदा प्रत्युदाहरणस्यावसरः। शास्त्रे प्रत्युदाहरणं फक्किकानाम्नापि अभिधीयते। अतः शास्त्रव्याख्याने प्रत्युदाहरणस्यापि समानमेव गुरुत्वम् उदाहरणस्येव। प्रस्तुतप्रबन्धे

---

[1] महाभाष्ये पस्पशाह्निके।

[2] नाट्यशास्त्रे १६ अध्याये अनुबन्धे ९ कारिका।

अपि तु आलंकारिकविश्वनाथेनापि प्रायः समानमेव घोषितं-

यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात्।
साध्यतेऽभिमतश्चार्थस्तदुदाहरणं मतम्॥
सा.द ६/१७४

उदाहरणविषये तस्यापरैकोक्तिः ‘उदाहरणमुत्कर्षयुक्तं वचनमुच्यते’ सा.द. ६/९९

[3] गौ.न्या.सू. १।१।३६

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

कारकाधिकारीयसूत्राणां मिताक्षरादिशा प्रत्युदाहरणानां पर्यालोचना क्रियते। अथादौ मिताक्षरासम्बन्धे किञ्चित् ज्ञातव्यम्।

**मिताक्षरायाः परिचयः -**

'मिताक्षरा' 'व्याकरणमिताक्षरा' 'पाणिनीयमिताक्षरा' वा इति पाणिनेः अष्टाध्याय्याः उपरि अन्नंभट्टस्य एका वृत्तिः। मिता अक्षरा यस्यां वृत्तौ, इति बहुव्रीहिसमासेन मिताक्षरा इति पदस्योत्पत्तिः। अर्थात् स्वल्पाक्षर-विशिष्टा इति। वृत्तिरियं सूत्रानुक्रमेण विरचिता। प्रायः सकलसूत्राणां वृत्तिः अत्रोपलभ्यते। महाभाष्यप्रदीपोद्द्योतने 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'[4] इति सूत्रस्य प्रदीपव्याख्याने अन्नंभट्टेन 'एक[5]सूत्रे भगवन्मतमेव सम्यगिति मिताक्षरायां प्रपञ्चितमस्माभिः' इति कथनाद् एषा उद्द्योतनस्य पूर्ववर्ती रचना इति सूचयति। काशीस्थे प्रकाशिते अस्य ग्रन्थस्य[6] भूमिकांशे (निवेदनमित्यंशे) सम्पादकेन भट्टनाथस्वामिविद्यारत्नेन उल्लिखितम्— 'अयं च प्रक्रियाकौमुदीकारान्नवीनः सिद्धान्तकौमुदीकारात् प्राचीनश्चेति निश्चेतुं शक्यते' इति। तथाहि कारकाधिकारे 'अकथितञ्च'[7] इति सूत्रस्य वृत्तौ द्विकर्मकधातूनां परिगणनविषये महोदयेन उक्तं— 'कौमुद्यां मन्थग्रह पचोपि संगृहीताः' इति। अत्र कौमुद्यामित्यनेन रामचन्द्राचार्यस्य प्रक्रियाकौमुद्याः बोधः न तु भट्टोजिदीक्षितस्य वैयाकरणसिद्धान्तकौमुद्याः। वस्तुतः मिताक्षरायां द्विकर्मकधातूनां मध्ये मन्थ्, ग्रह्, पच् इत्येषां धातूनां साक्षात् ग्रहणं न क्रियते। प्रक्रियाकौमुद्यां तु तेषां ग्रहणं साक्षात् दृश्यते एव। सिद्धान्तकौमुद्यां तु ग्रह्धातुः प्रत्यक्षतया न दृश्यते। अतः स्पष्टमेव इयं मिताक्षरा सिद्धान्तकौमुदीतः प्राक् रचिता। पण्डितयुधिष्ठिरमीमांसकेनापि उल्लिखितं यत् इयं तस्याः प्राचीनैवेति। तत्र 'संस्कृतव्याकरणशास्त्र का इतिहास' इति ग्रन्थे अष्टाध्याय्याः वृत्तिग्रन्थस्यालोचनावसरे तेनोक्तम्— "महामहोपाध्याय अन्नंभट्ट ने अष्टाध्यायी पर 'पाणिनीयमिताक्षरा' नाम्नी वृत्ति रची हे। यह वृत्ति काशी से प्रकाशित हो चुकी हे।" इति। तत्र सः अस्याः समयकालः १५५०-१६०० विक्रमाब्दः इति घोषितवान्। अन्यतः वैयाकरणसिद्धान्तकौमुद्याः कालः विक्रमाब्दः १५७०-१६५० इति लिख्यते।

**मिताक्षरायां कारकाधिकारीयसूत्राणां प्रत्युदाहरणसमीक्षणम् -**

अथ व्याकरणमिताक्षरायां कारकाधिकारीयसूत्राणामुपरि उपलब्धानि प्रत्युदाहरणानि प्रदीयन्ते। यद्यपि अत्र सकलसूत्राणामुपरि प्रत्युदाहरणं न कृतं अन्नंभट्टेन, अथ येषां सूत्राणामुपरि प्रत्युदाहरणं प्राप्यते तेषामुल्लेखपूर्वकं विचारः क्रियते।

**कारके[8] -**

---

[4] पा.सू. १।२।४५

[5] 'एकगोपूर्वाट्ठञ्नित्यम्' ५।२।११८।

[6] https://archive.org/details/in.ernet.dli.2015.345309/page/n927/mode/2up

[7] पा.सू.१।४।५२

[8] १।४।२३

*मिताक्षरा* – **'कारके किम्। वृक्षस्य पर्णं पतति। अकथितञ्च। पुत्रं पन्थानं पृच्छति। ब्राह्मणस्य पुत्रं पन्थानं पृच्छति। ब्राह्मणस्य वृक्षस्येव कारकत्वाभावान्न कर्मापादानत्वे'** इति।

अतः कारके इति सूत्रस्य आवश्यकता का इत्यभिप्रायेण उच्यते 'कारके किम्' इति। वस्तुतः 'कारके' इति सूत्रं निरर्थकमेव न मन्तव्यम्। अवश्यं तस्य सार्थकतास्ति। तत् प्रदर्शयन् आह 'वृक्षस्य पर्णं पतति' इति। सति कारके इति सूत्राभावे तत्र अपादानप्राप्तौ 'वृक्षस्य पर्णं पतति' इत्यादौ वृक्षस्यापि अपादानं प्राप्नोति तस्य ध्रुवतागमनात्। परन्तु कारके इति सूत्रस्य विद्यमानत्वे सति वृक्षस्य ध्रुवतासत्त्वेऽपि तस्य कारकत्वाभावात् अपादानं न प्राप्नोति। अपरमेकं दृष्टान्तं प्रदर्शयति 'अकथितञ्च'[9] इति सूत्रेण। अत्रापि अपादानादेः यदा अविवक्षा तदा अनेन कर्म भवेत्। तेन कारके इति सूत्राभावेऽपि 'पुत्रं पन्थानं पृच्छति' इत्यत्र पुत्रे अपादानस्याविवक्षावशात् कर्मत्वम्। परन्तु 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छति' इत्यादौ कारकसूत्रस्याभावे ब्राह्मणेऽपि कर्म प्राप्नोति, तेन अनिष्टापत्तिः भवति। तद्वारणार्थं कारकसूत्रस्य आवश्यकता स्यात्। इदं प्रत्युदाहरणं महाभाष्यानुसारं स्यात्[10]। काशिकायामपि च दृश्यते।[11] अन्यत्र भाषावृत्तौ प्रक्रियाकौमुद्यां सिद्धान्तकौमुद्यां च इदं नोपलभ्यते।

**भीत्रार्थानां भयहेतुः[12] -**

*मि* – **'भयहेतुः किम्? अरण्ये बिभेति'** इति।

नन्वत्र अरण्यात् न भयम्, तत्रस्थेभ्यः जन्त्वादिभ्यः। अतः अरण्यं भयहेतु न स्यात्। ततः अस्य अपादानसंज्ञा न भवति। सूत्रे यदि भयहेतुः इत्यस्य ग्रहणं न स्यात्, तर्हि अरण्यस्यापि अपादानसंज्ञाप्राप्तिरूपा अनिष्टप्रसङ्गोत्पत्तिः स्यात्। अतः सूत्रे भयहेतुरित्यस्य ग्रहणं क्रियते।[13] इदं च प्रत्युदाहरणं काशिकायां वैयाकरणसिद्धान्तकौमुद्यां च समानरूपेण दृश्यते। भाषावृत्तौ प्रक्रियाकौमुद्यां च अस्य सूत्रस्य किमपि प्रत्युदाहरणं नोपलभ्यते।

**पराजेरसोढः[14] –**

*मि* - **'असोढः किम्? शत्रून्पराजयते'** इति।

---

[9] १।४।५२

[10] द्र. महाभाष्ये कारक इति सूत्रम्।

[11] "कारक इति किम्? वृक्षस्य पर्णं पतति। कुड्यस्य पिण्डः पतति। 'अकथितञ्च'। अकथितं च कारकं कर्मसंज्ञं भवति। माणवकं पन्थानं पृच्छति। कारके इति किम्? माणवकस्य पितरं पन्थानं पृच्छति। कारकसंशब्दनेषु चानेनैव विशेषणेन व्यवहारो विज्ञायते।" इति।

[12] १।४।२५

[13] यद्यपि प्रस्तुतसूत्रस्य परत्वं भवति 'आधारोऽधिकरणम्' (१।४।४५) इति सूत्रम्। तेनैव अरण्यस्य प्राप्ताम् अपादानसंज्ञां बाधित्वा अधिकरणसंज्ञा भवति। तर्हि कथं सूत्रे भयहेतुः इत्यस्य ग्रहणं स्यात्? तदोच्यते कारकशेषत्वस्यापि विवक्षायामस्य वाक्यस्य प्रयोगः भवितुमर्हति। तद्यथा-
'अरण्यस्य व्याघ्राद् बिभेति' इति। अथ सूत्रे यदि भयहेतुः इत्यस्य ग्रहणं न क्रियते, तर्हि अरण्ये कदापि षष्ठी न प्राप्यते। सर्वदा अनेन सूत्रेण अरण्यस्य सम्बन्धविवक्षां बाधित्वा अपादानसंज्ञायाः प्राप्तिः भवति। अतः तद्वारणार्थं सूत्रे भयहेतुः इत्यस्य ग्रहणं युक्तियुक्तं स्यात्। एवं तत्त्वबोधिनीकारस्याशयः। द्रष्टव्यः सिद्धान्तकौमुद्याः तत्त्वबोधिन्याः टीकायाः प्रस्तुतसूत्रप्रसङ्गः।

[14] १।४।२६

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

अत्र सूत्रे असोढः इति पदस्याप्रयोगे सति यत्र असोढार्थस्य बोधः न भवति तत्रापि अपादानसंज्ञा प्राप्नोति। तद्यथा— 'शत्रून्पराजयते' इत्यादौ। शत्रून् तिरस्करोति अभिभवति वेति उक्तवाक्यस्याशयः स्यात्। अत्र तु ग्लानिबोधस्य विषयः शत्रुः इति न भवति। अथ यदि सूत्रे असोढपदं न स्यात् तर्हि शत्रौ अपादानं भूत्वा अनिष्टप्रसङ्गोत्पत्तिः भवेत्। तस्मात् सूत्रे असोढः इत्यस्य ग्रहणं समीचीनं वर्तते।[15] इदं प्रत्युदाहरणं काशिकायां वैयाकरणसिद्धान्तकौमुद्यां च समानरूपेण प्राप्यते।

**वारणार्थानामीप्सितः[16] –**

*मि* – **'ईप्सितः किम्? यवेभ्यो गां वारयति क्षेत्रे'** इति।

सूत्रे ईप्सितः इत्यस्य अग्रहणे वारणार्थाणामिति सूत्रे कृते वारणार्थधातूनां प्रयोगे ईप्सितभिन्नस्यापि अपादानसंज्ञा प्रसज्यते। तद्यथा— 'यवेभ्यो गां वारयति क्षेत्रे' इत्यत्र क्षेत्रं तु न ईप्सितं स्यात्। परन्तु सूत्रे ईप्सितपदाभावे तस्यापि अपादानं प्राप्नोति। तद्वारणार्थं सूत्रे ईप्सितः इत्यस्य ग्रहणं समीचीनं वर्तते।[17] प्रत्युदाहरणमिदं काशिकायां सिद्धान्तकौमुद्यां च समानरूपेण तिष्ठति। भाषावृत्तौ तु पृथक् प्रत्युदाहरणमस्ति। तद्यथा—'कथं कूपादन्धं वारयति। बुद्ध्या प्राप्य ततो निवर्त्तयतीत्यर्थः' इति। सूत्रस्यास्य भाष्ये प्रत्याख्यानात् ध्रुवमपाय इत्यनेनैव बुद्धिगतापायस्वीकारेण भवितुमर्हतीति।

**आख्यातोपयोगे[18] -**

*मि* - **'उपयोगे किम्? नटस्य गाथां शृणोति'** इति।

इह यदि उपयोगग्रहणं न क्रियते तर्हि नियमपूर्वकविद्यास्वीकारस्याभावस्थलेऽपि अपादानसंज्ञा प्राप्यते। तद्यथा— 'नटस्य गाथां शृणोति' इत्यादौ। अत्र तु सम्बन्धसामान्यस्य विवक्षावशात् नटे षष्ठीविभक्तिः स्यात्। सूत्रे उपयोगग्रहणाभावे तस्यापि अपादानस्य प्रसक्तिः स्यात्। तद्वारणार्थं सूत्रे उपयोगग्रहणं युक्तियुक्तम् भवतीति। प्रत्युदाहरणमिदं महाभाष्यानुसारं

---

[15] ननु च अत्र असोढग्रहणं व्यर्थं, यतो हि अस्मात् सूत्रात् परत्वात् 'कर्तुरीप्सिततमं कर्म' (१।४।४९) इत्यनेनैव शत्रोः कर्मसंज्ञा प्राप्यते। अथोच्यते अत्रापि शत्रोः कर्मत्वस्याविवक्षायां तस्य प्राप्तशेषषष्ठीं बाधित्वा अपादानं यथा न स्यात्, तस्मात् सूत्रे असोढः इत्यस्य ग्रहणं समीचीनं वर्तते। एवं तत्त्वबोधिनीकारस्याशयः। द्रष्टव्यः सिद्धान्तकौमुद्याः तत्त्वबोधिन्याः टीकायाः प्रस्तुतसूत्रप्रसङ्गः।

[16] १।४।२७

[17] वस्तुतः अस्मात् सूत्रात् परत्वेन 'आधारोऽधिकरणम्' (१।४।४५) इत्यनेनैव क्षेत्रस्य अधिकरणसंज्ञा भवति। तर्हि नास्ति ईप्सितग्रहणस्य सार्थकता। वस्तुतः, सूत्रे ईप्सितग्रहणमवश्यं युक्तियुक्तं स्यात्। तथाहि क्षेत्रस्याधिकरणत्वमविवक्षित्वा शेषत्वस्य विवक्षायामिदं प्रत्युदाहरणं वर्तते। अतः सूत्रे ईप्सितग्रहणाभावे सर्वत्र शेषत्वविवक्षास्थले अनेन अपादानसंज्ञा भूत्वा अनिष्टप्रसङ्गोत्पत्तिः स्यात्। एवं तत्त्वबोधिनीकारस्याशयः। द्रष्टव्यः सिद्धान्तकौमुद्याः तत्त्वबोधिन्याः टीकायाः प्रस्तुतसूत्रप्रसङ्गः।

[18] १।४।२९

स्यात्। काशिकायां सिद्धान्तकौमुद्यामपि च दृश्यते इदम्।

**श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः[19] –**

*मि* - **'ज्ञीप्स्यमानः किम्। देवदत्तं श्लाघते'** इति।

अत्र सूत्रे ज्ञीप्स्यमानः इत्यस्याभावे श्लाघादेः प्रयोगे यः बोधयितुमिष्टः न तस्यापि सम्प्रदानसंज्ञा भवति। तद्यथा— 'देवदत्तं श्लाघते' इत्यादौ। अत्र कर्त्रा देवदत्तस्य स्तुतिः इति वाक्यस्याशयः न तु स्तुतिपूर्विकाबोधना। अतः 'कर्तुरीप्सिततमं कर्म'[20] इत्यनेन देवदत्तस्य कर्मत्वं स्यात्। अथ प्रस्तुतसम्प्रदानसंज्ञाविधायके सूत्रे ज्ञीप्स्यमानः इति यदि न गृह्यते तर्हि कदापि प्रस्तुतोदाहरणवाक्ये देवदत्तस्य सम्प्रदानत्वं न प्रसज्यते। तद्वारणाय सूत्रे ज्ञीप्स्यमानः इत्यस्य ग्रहणं समीचीनं वर्तते। अस्य सूत्रस्य भिन्नं प्रत्युदाहरणं प्राप्यते अन्यत्र वृत्तौ। तद्यथा काशिकायाम्—'ज्ञीप्स्यमान इति किम्। देवदत्तः श्लाघते' इति। अत्र देवदत्तः स्वयमेव कस्मै अपि श्लाघते। न तु स स्तुतिविषये बोधयितुमिष्टः स्यात्। स तु स्तुतिकर्त्ता स्यादत्र। अतः सूत्रे ज्ञीप्स्यमानपदहेतोः न तस्य सम्प्रदानसंज्ञा च स्यात्। सिद्धान्तकौमुद्याम्— 'ज्ञीप्स्यमानः किम्? देवदत्ताय श्लाघते पथि' इति। अत्र तु सूत्रे ज्ञीप्स्यमानपदाभावे अधिकरणभूतस्य पथः अपि सम्प्रदानप्राप्तिरूपा अनिष्टप्रसङ्गोत्पत्तिः भवेदिति।

**क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः[21] –**

*मि* – **'यं प्रति कोपः किम्। भार्यामीर्ष्यति मैनामन्यो द्राक्षीदिति'** इति।

सूत्रे 'यं प्रति कोपः' इत्यंशस्याभावे क्रुधाद्यर्थानां धातूनां प्रयोगे कोपपूर्वकक्रोधादिस्थले कोपहीनक्रोधादिस्थले वापि सम्प्रदानं प्रसज्यते। तद्यथा— 'भार्यामीर्ष्यति' इत्यत्र कर्त्तुः मनोरमां परमासुन्दरीं भार्याम् अन्यः कश्चित् जनः न पश्येदिति अभिप्रायः स्यात्। नात्र भार्यां प्रति कोपः, परन्तु परेण दृश्यमानां तां न सहते क्षमते वा इति। एवञ्चात्र न कोपजन्या ईर्ष्या, किन्तु अन्यपुरुषदर्शनजन्येति भावः। अथ सूत्रे यदि 'यं प्रति कोपः' इति न स्यात् तर्हि अत्र भार्यास्थले सम्प्रदानसंज्ञा भूत्वानिष्टप्रसङ्गोत्तपत्तिः स्यात्। तद्वारणार्थं सूत्रे तत् ग्रहणं युक्तियुक्तं स्यादिति। इदं प्रत्युदाहरणं महाभाष्यप्रदीपटीकानुसारं स्यात्। प्रायः सर्वस्यां वृत्तौ इदं प्रत्युदाहरणं दृश्यते। भाषावृत्तौ केवलं 'स्त्रियामीर्ष्यति कामुकः' एवं प्रकारेण विद्यते।

**क्रुधद्रुहोरुपसृष्टयोः कर्म[22] –**

*मि* - **'उपसर्गयुक्तयोः किम्। देवदत्ताय क्रुध्यति'** इति।

अत्र सूत्रे 'उपसृष्टयोः' इति पदाभावे देवदत्तस्य कर्म न प्राप्नोति। पूर्वेणैव सम्प्रदानं भवति। अतः तद्वारणार्थं सूत्रे 'उपसृष्टयोः' इति ग्रहणं सार्थक्यं स्यात्। 'उपसर्गयुक्तयोः' इत्यनेन 'उपसृष्टयोः' इत्यस्यैव बोधः भवति।

---

[19] १।४।३४

[20] १।४।४९

[21] १।४।३७

[22] १।४।३८

काशिकायामेव प्रस्तुतप्रत्युदाहरणं दृश्यते अन्यत्र कुत्रापि वृत्तौ न।

**राधीक्ष्योर्यस्य विप्रश्नः** [23]–

*मि* – **'विप्रश्नः किम्। देवदत्तस्य राध्यत्योदनम्'** इति।

वस्तुतः देवदत्तसम्बद्धं यत् ओदनम् तत् राध्यति नाम सिद्ध्यतीत्युक्तवाक्यस्याशयः स्यात्। अत्र तु न कोऽपि विप्रश्नः। अथ सूत्रे यदि विप्रश्नः इति पदं न स्यात् तर्हि देवदत्तस्य सम्प्रदानं भूत्वानिष्टप्रसङ्गोत्पत्तिः स्यात्। अतः सूत्रे विप्रश्नः इति समीचीनं वर्तते। वस्तुतः इदं प्रत्युदाहरणं अन्यत्र कुत्रापि वृत्तौ न दृश्यते। मिताक्षराकारस्य इदं नूतनसंयोजनं मन्ये।

**साधकतमं करणम्** [24] –

मि - **'तमब्ग्रहणं किम्। गङ्गायां घोषः'** इति।

वस्तुतः प्रस्तुतसूत्रं कारकाधिकारे पठितत्वात् कारकपदस्यात्र अनुवर्तमाने साधकं कारकमेवार्थः भवति। प्रत्येकं कारकं तु साधकमेव इति वयं जानीमः। पुनः सूत्रे साधकपदस्य ग्रहणे साधकं (कारकं) साधकमित्यनेन प्रकृष्टसाधकस्यैव बोधः स्यात्। अतः सूत्रे तमब्ग्रहणेन साधकस्य यादृशः अर्थः स्यात् तादृशः अर्थः तमब्ग्रहणाभावेऽपि भवति। अतः तमब्ग्रहणस्य सार्थकता का इत्यभिप्रायेनैव आह— **तमब्ग्रहणं किमि**ति। अस्याः शङ्कायाः समाधाने मिताक्षराकारस्यान्नंभट्टस्याभिप्रायः एवं यत्— अस्मिन् कारकाधिकारे प्रकर्षार्थकप्रत्ययग्रहणमन्तरेण शब्दसामर्थ्य-गम्यार्थप्रकर्षः नाश्रीयते इति। अस्य समर्थने तेन उदहरणमेकं प्रदत्तम्— **'गङ्गायां घोषः'** इति। अतः प्रस्तुतसूत्रे यदि प्रकर्षप्रत्ययग्रहणं विना शब्दसामर्थ्यगम्यप्रकर्षः गृह्यते तर्हि 'आधारोऽधिकरणम्'[25] इत्यत्रापि एवं भवेत्। यतो हि आध्रियते अस्मिन्नित्याधारः तथा च अधिक्रियते अस्मिन्नित्यधिकरणम्। अतः यादृशः अर्थः आधारस्य तादृशः एवार्थः भवत्यधिकरणस्य। अतः अत्रापि प्रकर्षार्थप्रत्ययं विनापि शब्दसामर्थ्यगम्यप्रकर्षानुसारेण प्रकृष्टाधारः इत्यर्थः भवति। एवं च तस्य अधिकरणसंज्ञा भवति। एतेन 'तिलेषु तैलम्' इत्यादौ एव अधिकरणत्वमायाति तिलस्य सर्वत्र तैलव्याप्तत्वात् तस्य प्रकृष्टाधारसिद्धत्वात् च। परन्तु 'गङ्गायां घोषः' इत्यादौ गङ्गायाः अधिकरणसंज्ञा न सम्भवेत्। यतो हि गङ्गायाः एकदेशे घोषपल्ल्या विद्यमानत्वात् गङ्गायाः प्रकृष्टाधारत्वं न भवति। अतः साधकतमसूत्रे तमब्ग्रहणेन ज्ञापितः भवति कारकाधिकारे प्रकर्षार्थकप्रत्ययग्रहणमन्तरेण शब्दसामर्थ्यगम्यार्थप्रकर्षः नाश्रीयते इति। तेन आधारोऽधिकरणमिति सूत्रे प्रकर्षप्रत्ययाभावे 'गङ्गायां घोषः' इत्यादौ गौणाधारस्थलेऽपि अधिकरणत्वं सम्भवेत् इति। काशिकादौ सर्वत्र इदं प्रत्युदाहरणं दृश्यते। वस्तुतः इदं प्रत्युदाहरणं महाभाष्यगतं स्यात्।

**अभिनिविशश्च**[26] –

[23] १।४।३९

[24] १।४।४२

[25] १।४।४५

[26] १।४।४७

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

*मि* - **'इहान्यतरस्यांग्रहणस्य व्यवस्थितविभाषार्थमनुवृत्तेः क्वचिन्न। व्याकरणेऽभिनिवेशः। यस्मिन् यस्मिन्नभिनिविशति इति च'** इति।

तथाहि अभिनिविशतेराधारस्यानेन कर्मत्वमिति, तर्हि कथं 'व्याकरणेऽभिनिवेशः' इत्यादौ व्याकरणस्य कर्मसंज्ञा न स्यात्? तदोच्यते 'परिक्रयणे संप्रदानमन्यतरस्याम्'[27] इति सूत्रादत्र अन्यतरस्यामिति पदं मण्डूकप्लुत्या अनुवर्तते। एवं चात्र व्यवस्थितविभाषा स्वीक्रियते। तेन अभिनिविशतेराधारस्य क्वचित् कर्मसंज्ञा न भवति। तद्यथा प्रस्तुतोदाहरणे स्यात्। 'यस्मिन् यस्मिन्नभिनिविशते' इत्यत्रापि पूर्ववत्। प्रत्युदाहरणमिदं काशिकायां वैयाकरणसिद्धान्तकौमुद्यां च समानरूपेण दृश्यते। सिद्धान्तकौमुद्यां तु 'पापेऽभिनिवेशः' इति प्रत्युदाहरणवाक्यं प्राप्यते। काशिकायां 'कल्याणेऽभिनिवेशः' इति।

**कर्तुरीप्सिततमं कर्म[28] –**

*मि* - **'कर्तुः किम्? माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषाः न कर्तुः। ईप्सिततमं किम्। अग्नेर्माणवकं वारयति। कर्मेत्यनुवृत्तावपि पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम्'** इति।

सूत्रे 'कर्तुरि'ति पदाभावे 'ईप्सिततमं कर्मे'ति सूत्रे क्रियमाणे कर्मणः ईप्सितस्यापि कर्मसंज्ञा भवेत्। तद्यथा— 'माषेषु अश्वं बध्नाति' अत्र कर्तुः बन्धनक्रियायाः प्रधानेप्सितः भवति अश्वः, अतः तस्य कर्मसंज्ञा। कर्मणः अश्वस्यापि माषः ईप्सितः भवति। अथ सूत्रे यदि 'कर्तुः' इति पदं न स्यात्, तर्हि अश्वस्य ईप्सितवस्तुनि माषेऽपि कर्मसंज्ञा भूत्वा अनिष्टप्रसङ्गोत्पत्तिः भवेत्। तद्वारणार्थं सूत्रे 'कर्तुः' इति पदस्य ग्रहणं समीचीनं वर्तते इति। सूत्रे तमप्प्रत्ययग्रहणाभावे 'कर्तुरीप्सितम्' इति सूत्रे क्रियमाणेऽपि 'बालकः अन्नं खादति', 'छात्रः पुस्तकं पठति' इत्यादौ अन्ने पुस्तके च कर्मसंज्ञाप्राप्तौ कापि न हानिः स्यात्। तर्हि कथं प्रकर्षार्थकप्रत्ययस्य ग्रहणं स्यादित्यभिप्रायेणाह— **'ईप्सिततमं किम्'** इति। वस्तुतः एवं क्रियमाणे 'बालकः अन्नं खादति' इत्यादौ न कापि समस्या वर्तते, परन्तु 'अग्नेर्माणवकं वारयति' इत्यादौ तु समस्यायाति। वस्तुतः अग्निसंयोगजनितज्वलनादौ माणवकः पीडां कष्टं वा न प्राप्नुयात् इत्यभिप्रायेण वारणकर्तुः अग्निं प्रति गच्छन्तं माणवकं तस्मात् निवर्तयति। अतः वारणकर्तुः प्रधानेप्सितत्वात् माणवकस्य कर्मत्वम् स्यात्। अथोच्यते माणवकस्तु एकः सरलबालकः। औज्ज्वल्यवशात् स्वस्य क्रीडासामग्री इति मत्वा ज्वलन्तमग्निं प्रति स गच्छति। अतः अग्निः माणवकस्य ईप्सितवस्तु स्यात्। 'वारणार्थानामीप्सितः'[29] इति सूत्रेण 'अग्नेर्माणवकं वारयति' इत्यत्र वारणार्थधातोः प्रयोगे कर्मणः माणवकस्य ईप्सितवस्तुनि अग्नौ अपादानं स्यात्। अथ 'कर्तुरीप्सितं कर्म' इति सूत्रे क्रियमाणे 'अग्नेर्माणवकं वारयति' इत्यादौ ईप्सितत्वात् अग्नेरपि कर्मसंज्ञा भूत्वा अनिष्टप्रसङ्गोत्पत्तिः स्यात्। तद्वारणार्थं सूत्रे

[27] १।४।४४

[28] १।४।४९

[29] १।४।२७

ईप्सिततमग्रहणं युक्तियुक्तं स्यादिति। अथोच्यते 'अधिशीङ्स्थासां कर्म'[30] इति सूत्रात् प्रस्तुतसूत्रे 'कर्म' इति पदस्य अनुवृत्तिः भवेत्। तर्हि अत्र पुनः 'कर्म' इति पदग्रहणस्य सार्थक्यं किमिति। अस्याः शङ्कायाः निराकरणे आह **कर्मेत्यनुवृत्तौ** इति। यदि पूर्वसूत्रात् 'कर्म' इति पदस्य अनुवृत्तिः अत्र स्यात् तर्हि 'एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः'[31] इति परिभाषाबलात् 'अधिशीङ्स्थासां कर्म' इति सूत्रस्य पूर्वसूत्रात् 'आधारोऽधिकरणम्'[32] इत्यस्मात् आधारपदस्यापि अनुवृत्तिः भवेत् 'कर्तुरीप्सिततमं कर्म' इति सूत्रे। तेन 'गेहं प्रविशति' इत्यादौ कर्तुः ईप्सिततमाधारस्य हि कर्मसंज्ञा भवेत् 'ओदनं पचति' इत्यादौ तु न। अतः कर्मपदग्रहणे एवम् अव्याप्तिप्रसङ्गः नागच्छतीति। अस्य सूत्रस्य प्रत्युदाहरणानि काशिकायां सिद्धान्तकौमुद्यां च दृश्यन्ते। 'ईप्सिततमं किम्। अग्नेर्माणवकं वारयति' इति तु महाभाष्यगतं प्रत्युदाहरणं स्यात्।

**अकथितं च[33] –**

*मि* – **'परिगणनं किम्। नटस्य गाथां शृणोति। कृत्यानां कर्तरि वेति[34] सूत्रे क्रष्टव्या ग्रामं शाखेति प्रयोगात् कृषिरपि द्विकर्मकः। कौमुद्यां मन्थग्रहपचोपि संगृहीताः'** इति।

तथाहि धातुपरिगणनाभावे परिगणितधातूनामप्रयोगस्थलेऽपि अस्य सूत्रस्य प्रवृत्तिः यथा न स्यात् तस्मात् परिगणनं क्रियते। तेन 'नटस्य गाथां शृणोति' इत्यादौ श्रुधातोः परिगणनाभावे नटे कर्मत्वं न स्यात्। अतः परिगणनं समीचीनं वर्तते। 'क्रष्टव्या ग्रामं शाखा' इति तु 'शाखां ग्रामं कर्षति' इति वाक्यस्य कर्मणि तव्यप्रत्ययान्तं रूपमिति। एतेन कृष्धातुः द्विकर्मकः इति सूच्यते। कौमुद्यां इत्यनेन प्रक्रियाकौमुद्याः ग्रहणं न तु वैयाकरणसिद्धान्तकौमुद्यारित्यस्येति पूर्वमुक्तम्[35]। इदं प्रत्युदाहरणम् अन्यत्र कुत्रापि वृत्तौ न दृश्यते। वैयाकरणसिद्धान्तकौमुद्यां 'कारकं किम्? माणवकस्य पितरं पन्थानं पृच्छति' इति प्रत्युदाहरणं दृश्यते।

**उपसंहारः –**

**"**अर्थप्रवृत्तितत्त्वानां शब्दा एव निवन्धनम्
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते॥"[36]

इति आचार्यभर्तृहरेः कारिकानुसारं शब्दज्ञानं व्याकरणं विना कदापि न भविष्यति। पुनश्च व्याकरणं शब्दज्ञानस्य सरलतमः उपायः खलु। तत्र काशिकादिवृत्तिसदृशा अन्नंभट्टविरचिता 'मिताक्षरा'पि अष्टाध्याय्याः वृत्तिः एका। व्याकरणनिकाये कारकपर्यालोचनस्य विशिष्टस्थानमस्ति। सर्वेषु प्रायः शास्त्रेषु स्वसिद्धान्तस्थापनाय ग्रन्थकारैः प्रत्युदाहरणानि प्रदीयन्ते। प्रत्युदाहरणं कमपि सिद्धान्तं दृढयति। अतः शास्त्रव्याख्याने प्रत्युदाहरणस्य महती भूमिका वर्तते।

---

[30] १।४।४६

[31] परिभाषेन्दुशेखरः १७

[32] १।४।४५

[33] १।४।५१

[34] ३।३।७१

[35] द्र. शोधपत्रस्यास्य ४ संख्यकं पत्रम्।

[36] वा.प.ब्र.का १३

**सहायकग्रन्थाः**


- अन्नंभट्टः। १९०४ क्रैस्ताब्दे। व्याकरणमिताक्षरा। सम्पा. स्वामी, जगन्नाथः भट्टनाथस्वामी च। व्याकरणमिताक्षरा। वाराणस्यां विद्याविलासमुद्रणतः।
- वामन-जयादित्यः।१९८७ तमे क्रैस्ताब्दे। काशिका। सम्पा. त्रिपाठी-जयशङ्कर-लालः। काशिका, श्रीजिनेन्द्रबुद्धिविरचितया 'न्यासा' परपर्यायकाशिकाविवरणपञ्जिकाख्यया विद्वद्वरश्रीहरदत्तमिश्रविरचित-'पदमञ्जरी'-समाख्यया च व्याख्यया सहिता डा० जयशङ्करलालत्रिपाठिविरचितया 'भावबोधिनी' पिन्दीव्याख्यया च विभूषिता। द्वितीयभागः, प्रथमभागः,। वाराणस्याम्, तारा-प्रिंटिंग-वर्क्सतः।
- रामचन्द्राचार्यः। २००० क्रैस्ताब्दे। प्रक्रियाकौमुदी। सम्पा. मिश्रः, मुरलीधरः। प्रक्रियाकौमुदी द्वितीयो भागः। २२१००२वाराणस्यां सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयतः।
- पुरुषोत्तमदेवः।१९१८ क्रैस्ताब्दे। भाषावृत्तिः। सम्पा. चक्रवर्ती, श्रीशचन्द्रः। भाषावृत्तिः। राजशाही, वरेन्द्र-गवेषणा-सङ्घतः।
- भट्टोजिदीक्षितः।२०१० तमे खैस्ताब्दे पुनर्मुद्रणम्। वैयाकरणसिद्धान्तकौमुदी। सम्पा. चतुर्वेदः, गिरिधरशर्मा परमेश्वरनन्दशर्मा च। वैयाकरणसिद्धान्तकौमुदी [वालमनोरमा-तत्त्ववोधिनिसहित(कारकप्रकरणान्त)प्रथमो भागः, द्वितीयो भागः तृतीयो भागः, चतुर्थो भागः। कलकातायाम, मोतिलाल-वणारसीदासतः।
- पतञ्जलिः। १९८८ तमे खैस्ताब्दे। महाभाष्यम्। सम्पा. शर्मा, शिवदत्तः। व्याकरणमहाभाष्यम् [श्रीमदुपाध्यायकैयट-प्रणीतेन भाष्यप्रदीपेन श्रीमन्नागेशभट्ट-विरचितभाष्यप्रदीपोद्द्योतोद्भासितेन समुल्लसितम् विधिशेषरूपम् द्वितीयं खण्डम्]। ११०००७ दिल्लीनगर्य्याम्, चौखाम्वा-संस्कृत-प्रतिष्ठानतः।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# पदशक्तिस्वरूपविचारः

**विनयकुमारः**

**शोधविद्यार्थी, कर्णाटकसंस्कृतविश्वविद्यालयः**

**बङ्गालुरु**

**प्रबन्धसारः**

*सकलो लोकः शब्देनैव हेयोपादेयविवेकं लब्ध्वा जिहासितं जहाति। उपादित्सितमुपादत्ते। इष्टानिष्टे शब्दादेव प्रतीत्य इष्टेषु प्रवर्तते, अनिष्टान्निवर्तते च। शब्दादेव धर्माधर्मादिकमधिगच्छति। शब्दरूपप्रमाणाभावे नापि लौकिकवैदिकव्यवहारः। न च धर्माधर्मादिव्यवस्था। किं बहुना? सकलजीवराशिः अन्ध इव निरुद्धनिखिललोकव्यवहारः स्यादिति कविशिरोमणिना दण्डिना काव्यादर्शे उद्घोषितम्। यथा सूर्यादि-ज्योतिषामभावे अपरिमितेन तमसाऽस्कन्दिताः पदार्थाः अगृहीततया व्यवहारपथो विलुप्यन्ते। तथा शब्दाभावे जीवानां ऐहिकपारत्रिकव्यवहाराः विलुप्येरन्। तस्मात् शब्दोऽर्थप्रकाशनशीलं ज्योतिरिव महोपकारं जनयति लोकानाम्। तादृशशब्दस्य शक्तिविचारः अत्र निरूपितम्।*

**उपोद्घातः**

विदितमेव एतत् सर्वं हि वक्तव्यं श्रोतव्यं च शब्दाधीनमेव इति। शब्दास्तावत् मानवानां अनितरसाधारणा देवदत्ता निधिः इत्येव वक्तव्याः। तेनैव जीवानां लोकयात्रा सुलभा दृश्यते। यथा सूर्यादि-ज्योतिषामभावे अपरिमितेन तमसाऽस्कन्दिताः पदार्थाः अगृहीततया व्यवहारपथो विलुप्यन्ते तथा शब्दाभावे जीवानां ऐहिकपारत्रिकव्यवहाराः विलुप्येरन्। तस्मात् शब्दोऽर्थप्रकाशनशीलं ज्योतिरिव महोपकारं जनयति लोकानाम्। अत एव उक्तं दण्डिना -

**काव्यादर्शे -**

"इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥
इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥" इति।

(काव्यादर्शः १. ३-४)

लौकिकाः जनाः अर्थमनुसृत्य शब्दान् प्रयुञ्जते। वैदिकानामृषीणां च वाचमनुसृत्यार्था वाचि उपतिष्ठन्त इत्ययं लौकिकवैदिकशब्दयोर्व्यत्यासः उत्तररामचरितकृता भवभूतिना उपवर्णितः।

"लौकिकानां हि साधूनामर्थं वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥"

(उ.रा. चरितम् १.१०)

परब्रह्माधिगममात्रे लक्ष्यीकृतदृष्टीन् वेदान्तिन आलक्ष्य त्रिपुरातापिन्युपनिषत् मैत्रायण्युपनिषच्च शब्दब्रह्मवेदनस्याऽवश्यकतां विधत्ते, शब्दब्रह्मज्ञानेनैव परब्रह्माधिगम इति चाऽवेदयति।

"द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥” इति।

(त्रि. ता.उ. ४.१७, मैत्रा. ३.६ - २२)

शब्द एव वागिति वेदेषूच्यते। “वागर्थाविव सम्पृक्तौ” (१.१) इति रघुवंशे कालिदासोऽपि शब्दमेव वाचमिति व्यवाहरत्। वाक्तत्त्वस्य महिमानः परब्रह्मणो महिमान इवानन्ताः। यथा परं ब्रह्म विश्वव्याप्तं तथैव वागपि - इति ऋक्संहितायामुच्यते-

“सहस्रधा महिमानः सहस्रं यावद् ब्रह्म विष्ठितं तावती वाक्” इति। (ऋ.सं. १०.११४.८)

शब्दाभावे मित्राणि कथं सख्यप्रयुक्तसुखमवगच्छन्ति? चालिन्या सक्तुमिव ये ज्ञानेन पूतानि वचांसि वदन्ति तेषां मङ्गलकरसम्पदाप्तिर्भवतीति ऋक्संहिता वदति -

“सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।

अत्र सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि ॥” *इति।*

(ऋ.सं. १०.६१.२)

परन्तु दार्शनिकप्रपञ्चेषु शब्दः किं कथं च बोधयति इत्यत्र अस्ति महान् विवादः।

१.) तत्र प्रथमं शब्दानाम् अर्थासंस्पर्शित्वात् जात्यादीनां च शब्दार्थत्वानुपपत्तेः शब्दार्थयोः सम्बन्धस्य दुर्वचत्वात् वाक्यानां अर्थप्रत्यायकत्वासमर्थनाच्च शब्दः न प्रमाणमिति बौद्धाः।

२.) शब्दस्य प्रामाण्यमङ्गीकुर्वन्तोऽपि मीमांसकाः अपूर्वार्थबोधकः एव सः प्रमाणमिति उद्घोषयन्तोऽपि शब्दसमुदायरूपवाक्यस्य नियोगः अर्थः उत भावना इत्यत्र विवदन्ते।

३.) वैशेषिकास्तु शब्दप्रामाण्यमभ्युपगच्छन्तोऽपि न तस्य अनुमानापेक्षया अतिरिक्तत्वं मन्यन्ते।

४.) शब्दप्रामाण्ये एव दीक्षावन्तः शब्दब्रह्मवादिनः वैयाकरणाः तत्तत्पदाभिव्यक्तैः पदस्फोटादिभिः अर्थः अवबुध्यते इति वदन्ति। अतः तेषां मतेऽपि न साक्षादर्थबोधः।

**नैयायिकानाम् आशयः -**

५.) परन्तु नैयायिकास्तु सर्वमेतन्निराकृत्य विलक्षणां रीतिम् आतिष्ठन्ते। तेषां मते सर्वोऽपि शब्दः, “एकसम्बन्धिज्ञानं अपरसम्बन्धिस्मारक-विधया अर्थावबोधकः।” एवं च शब्दश्रवणेन वृत्त्या अर्थस्य स्मृतिः जायते। तदनन्तरं शाब्दबोधः इति तेषां सिद्धान्तः। तदुक्तं किरणावल्यां ‘पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः’ इति। तत्र पदपदार्थयोः सम्बन्धः वृत्तिशब्दवाच्यः मुख्यगौणभेदेन द्विविधः। तत्र मुख्यवृत्तेः शक्तिः इति गौणीवृत्तेः लक्षणा इति च व्यपदेशः। तत्र शक्तिस्तु अस्मात् शब्दात् अयमर्थो बोद्धव्यः इति ईश्वरेच्छैव। अथवा अर्थप्रकारकशब्दविशेष्यकरूपा “इदम् अर्थं बोधयतु” इत्याकारिका।

तत्र पदानां शक्तिः कुत्र इति विषये नैयायिकानां ‘जात्याकृतिव्यक्तयः पदार्थः’ इति सूत्रमेव प्रमाणम्। एतत्सूत्रगत-व्यावर्तक-तुशब्दानुसारेण (जात्याकृतिव्यक्तिषु) त्रिष्वपि एकैव शक्तिः इति वदन्ति। उदाः

१.) गां मुञ्च, गां बधान इत्यादौ गोपदोपस्थितव्यक्तेः प्राधान्यम्।

२.) ‘गौः न पदा स्पृष्टव्या’ इत्यत्र जातिः मुख्या।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

३.) 'पिष्टकमयी गौः' इत्यत्र आकृतेः मुख्यत्वम्। इति प्राचीननैय्यायिकाः भणन्ति। परन्तु नवीननैय्यायिकास्तु जात्याकृतिविशिष्टव्यक्तौ पदशक्तिं स्वीकुर्वन्ति। तत्रापि जाति-तद्वैशिष्ट्य-तदाश्रयेषु एका शक्तिः। आकृतौ पृथक् शक्तिः इति तेषां मतम्।

अत्र व्यक्तिशक्तिवादिनां मते केचन दोषाः सन्ति। व्यक्तिमात्रे शक्तिरुच्यते चेत् - व्यक्त्यानन्त्यात् शक्त्यानन्त्यापत्तिः। एवं जात्युपलक्षिते शक्तिः इत्युक्तेऽपि स एव दोषः। न च उपलक्षणैक्यात् शक्तैक्यं इति वाच्यम्। उपलक्षणैक्यस्य शक्त्यैक्यानियामकत्वात् यथा च हरिपदात् सूर्याश्वयोः एकत्वोपक्षितयोः शक्तिग्रहेऽपि शक्यतावच्छेदकस्य सूर्यत्वस्य च अश्वत्वस्य च परस्परं भेदात् उभयोः शक्तिः भिद्यते एव। तथा प्रकृतेऽपि व्यक्तिभेदात् शक्तिभेदः सम्भवत्येव। जातिविशिष्टे शक्तिः इत्यत्रापि शक्तिव्यक्तिसम्बन्धानाम् अनन्तत्वात् शक्त्यानन्त्यापत्तिः। अत्र नैय्यायिकानां समाधानन्तु जात्याकृतिविशिष्टायामेव शक्तिरित्युच्यते। न तु व्यक्तिमात्रे।

अपि च जात्युपलक्षिते शक्तिरित्यत्र यः दोषः उक्तः सोऽपि नास्ति। यतः जात्याकृत्योः उपलक्षणत्वं न स्वीकृतम्। वस्तुतस्तु उपलक्षणैक्येन शक्त्यैक्यं वक्तुं शक्यते। तदादिपदस्थले उपलक्षणीभूत-वक्तृबुद्धिविषयतावच्छेदकस्य ऐक्यात् शक्तैक्यम् उच्यते। परन्तु नैय्यायिकैः द्रव्यादिपदात् अभ्रान्तस्य घटत्वप्रकारकबोधवारणाय घटत्वोपलक्षिते घटे शक्तिः न स्वीक्रियते। अपि च जात्यादिविशिष्टे शक्तिरित्युच्यते चेदपि न शक्त्यानन्त्यापत्तिः। ईश्वरेच्छारूपायाः शक्तेः एकत्वाङ्गीकारात्। अत्र शक्त्यैक्यं च तत्पदजन्यबोधीयविषयत्वनिष्ठप्रकारतानिरूपित-विशेष्यत्वरूपम्। तस्य च एकत्वात् शक्त्यैक्यव्यवहारः। तथा च घटत्वनिष्ठघटविषयकबोधीयविषयतायाः एकत्वात् तादृशविषयताशालिसङ्केतरूपशक्तेः एकत्वव्यवहारः। सा च शक्तिः व्याकरणादिप्रमाणेन ज्ञायते इति नैयायिकरीतिः।

**द्वैतवेदान्तस्य आशयः -**

द्वैतवेदान्ते अस्माकम् अनुभवानुसारेण शब्दार्थयोः औत्पत्तिकः (स्वाभाविकः) कश्चन सम्बन्धः अङ्गीक्रियते। तदुक्तं आचार्यैः अनुव्याख्याने– 'नित्ययोगोऽपि शब्दानाम् अर्थेनैव निषिध्यते।' इति

परन्तु यदि शब्दार्थयोः स्वाभाविकः कश्चन सम्बन्धः अङ्गीक्रियते, तर्हि यथा व्युत्पन्नस्य शब्दार्थज्ञानं भवति तथा अव्युत्पन्नस्यापि बोधः भवतु इत्याक्षेपः, न हि अग्निगतदाहशक्तिः अविदितपुरुषस्य न दहतीति। इति शङ्का वर्तते। परन्तु चक्षुषः रूपप्रतीतिजनकत्वेऽपि आगन्तुकस्य पुरुषस्य सन्निकर्षस्य अभावे यथा चक्षुरिन्द्रियं रूपप्रतीतिं न जनयति। यथा च हेतोः साध्यसम्बन्धस्य सत्त्वेऽपि तदनुसन्धानाभावे न साध्यप्रतीतिजनकत्वं तथैव शब्दस्यापि अर्थेन

स्वाभाविकसम्बन्धवतः न बोधकत्वम् इत्युच्यते।

अस्मत्सिद्धान्ते न्यायसिद्धान्तोक्त-इच्छायाः एव शक्तित्वं न स्वीक्रियते।

यतः प्रियङ्गौ यवशब्दं म्लेच्छाः प्रयुञ्जते। अन्ये तु दीर्घशूकविशेषे। एवं त्रिवृच्छब्दं लताविशेषे आर्याः प्रयुञ्जते। ऋषयस्तु अन्यत्र। एवम् एकस्यैव शब्दस्य अनियतप्रयोगादेव इच्छायाः एव शक्तित्वे बाधकानि।

ईश्वरानीश्वरेच्छयोः शक्तित्वे व्याकरणादिशास्त्रवैय्यर्थ्यप्रसङ्गः। यतः अस्मदादिसङ्केतानामपि अर्थावगमाङ्गत्वेन साधुत्वदर्शनात् ईश्वरसङ्केतानामेव साधुत्वं न अन्येषाम् इति नियमाभावात् साध्वसाधुशब्दप्रयोगनियामकव्याकरणादिशास्त्र-वैय्यर्थ्यप्रसङ्गः अस्त्येव।

अतः सङ्केतः एव अस्मन्मते न नियमः। किन्तु क्वचित् सङ्केतात् बोधकत्वम् अर्थविशेषे तु स्वाभाविकशक्त्या बोधः इत्यङ्गीकारात्। अपि च द्वैतसिद्धान्ते भिन्नाश्च भिन्नधर्माश्च पदार्थाः निखिला अपि' इत्युक्तरीत्या अनुगतजात्यनङ्गीकरात् व्यक्तावेव शक्तिरित्यङ्गीक्रीयते।

ननु व्यक्तेः आनन्त्यात् तत्र शक्तिकल्पनापेक्षया जातावेव शक्तिकल्पने लाघवं किल इति चेत् न अस्माभिः जातेरपि अनुगतत्वं नाङ्गीक्रियते इत्युक्तत्वात् अपि च जातिविशिष्ठम् एकमेव शक्यं प्रवृत्तिनिमित्तं विशिष्ठत्वम् इति उच्यते। अथवा व्यक्तिरेव शक्या, जातिस्तु प्रवृत्तिनिमित्तमिति वा। नाद्यः विशिष्टत्वस्य अनुगतत्वाभावेन जातित्वाभावात्। द्वितीये च आकाशे जात्यादौ च प्रवृत्तिनिमित्तीभूतजातेरभावेन बोधाभावापत्तेः। यदि च आकाशादौ प्रवृत्तिनिमित्तान्तरं कल्प्यते तदा निमित्तद्वयकल्पनापेक्षया व्यक्तावेव शक्त्यङ्गीकारः लाघवम्। अपि च द्वैतसिद्धान्ते सकलपदानाम् इतरान्विततया स्वार्थबोधकत्वं विद्यते। न तु अभिहितान्वयबोधकत्वम्। अत्र अभिहितान्वयं नाम शक्त्या पदैः शुद्धाः अर्थाः अभिधीयन्ते। तादृशपदाभिहितैः अर्थैः अन्वयः प्रतीयते इति वादः अभिहितान्वयवादः भाट्टानाम्।

परन्तु अयं वादः असमीचीनः इति श्रीमदानन्दतीर्थैः प्रतिपादितम् अनुव्याख्याने। यतः शब्दास्तावत् शक्त्यपेक्षया अर्थगमकाः, प्राथमिकी शक्तिश्च वृद्धव्यवहारात्। स च व्यवहारः अन्विते एव। अतः पदानां योग्येतरान्विते एव शक्तिरित्यङ्गीकरणीयम्। अर्थात् पदार्थान्तरान्वितेन पदार्थेनैव अर्थबोधपुरस्सरं व्यवहारः युज्यते। न हि गौरिति गोशब्दप्रयोगमात्रेण व्युत्पित्सोः ज्ञानं भवति। किन्तु आनय, बधान इत्यादिप्रयोगे क्रियाद्यन्वितेनैव गोशब्देन व्युत्पित्सोः ज्ञानं भवति। ततश्च पदानां योग्येतरान्वितस्वार्था-भिधायकत्वम् अनुभवसिद्धत्वात् अङ्गीकृतम-स्मिन्मते। उक्तं च आनन्दतीर्थभगवत्पादैः, अनुव्याख्याने- "शक्तिश्चैवान्विते स्वार्थे शब्दानाम् अनुभूयते" इति विवृतं च एतत्, श्रीमन्न्यायसुधायां श्रीमज्जयतीर्थश्रीचरणैः।

**उपसंहारः -**

विषयोऽस्ति विशालः। तथापि यथामति अनेन प्रबन्धेन परिचयप्रयत्न एव कृतो मया।

गुणैकपक्षपातिनः विद्वांसः तान् दोषान् हंसक्षीरन्यायेन गृह्णन्तु इति सम्प्रार्थये।

ଔଷଧଉଓ

## सहायकग्रन्थाः


- ग्रन्थः – काव्यादर्शः। संवत्सरः - २००८। रचयिता - आचार्य दण्डी। प्रसादिनी हिन्दी व्याख्यासहित - सम्पादकः – शिवनारायण शास्त्री।
- ग्रन्थः –उत्तरामचरितम्। रचयिता – भवभूतिः। संवत्सरः -१९९८। सम्पादकः डा. मुरारिलाल् अग्रवाल्। प्रकशनसंस्था –भण्डार्कर् ओरियण्टल् रिसर्च इन्स्टिट्यूट्. पुणे।
- ग्रन्थः – ऋग्वेदसंहिता। संवत्सरः - २०१०। सम्पादकः –के. एस्. अर्जुन। प्रकशनसंस्था –चौखम्बा . दिल्ली, संस्कृतप्रकाशन।
- ग्रन्थः – अनुव्याख्यानम्। रचयिता - श्रीमदानन्दतीर्थः। सम्पादकः –पि .एस् शेशगिरि आचार्यः। प्रकाशनसंस्था – तत्वसंशोधनसंसत् उडुपि।
- ग्रन्थः –श्रीमन्न्यायसुधा। रचयिता – जयतीर्थमुनिः। संवत्सरः -२०१०। सम्पादकः – हरिदासभट्। प्रकशनसंस्था पूर्णप्रज्ञविद्यापीठम्. बेङ्गलूरु।

# अक्षपाददर्शनदिशा प्रमाणविचारः

**मिन्टु-दे**

**शोधच्छात्रः, नव्यन्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**नई दिल्ली-११००१६**

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्षस्यैव प्रधानपुरुषार्थत्वात् संसारदुःखनिवृत्ति-रूपत्वात् संसारदुःखानां चाऽसह्यत्वाद् अष्टादशविद्यास्थानेषु[1] च प्रकृष्टतमाम् अनुश्रवणादनु, इक्षामननं, अर्थात् "श्रोतव्यो मन्तव्यो"[2] इति श्रुतेर्मननस्य श्रवणानन्तर-कर्तव्यत्वात्, तन्निर्वाहिकाम् आन्वीक्षिकीं न्यायशास्त्रपरदुःख-प्रहीणेच्छावान् परम-कारुणिको मुनिः गौतमः निर्मितवान्। प्रतिपादितं चिन्तामणिकारेण श्रीमता गङ्गेशोपाध्यायेन "अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादश-विद्यास्थानेषु अभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय। तत्र प्रेक्षावत्प्रवृत्त्यर्थं "प्रमाणादीनां तत्त्वज्ञानान्निःश्रेय-साधिगमः" इत्यादावसूत्रयत।[3] तत्र प्रेक्षावतां विवेचकानां प्रवृत्तये "लक्षणप्रमाणाभ्यां वस्तुनिर्णयः" "त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः, उद्देशो लक्षणं परीक्षा चेति"[4] इति प्राचीनाचार्योक्तिं हृदि निधानेनैव "मानाधीना मेयसिद्धिः"[5] प्रमाणादीनां समेषां प्रमेयानां व्यवस्थितिरित्यत' प्रमाणप्रमेयादिषोडश-पदार्थान्तर्गतेषु प्रमाणपदार्थस्य तत्त्वज्ञानोपयोगित्वात् मोक्षप्रयोजकीभूतत्वात् प्रधानत्वाच्च भगवता अक्षपादगौतमेन "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"[6] इत्यस्मिन् सूत्रे लक्षणपरत्वेन विभागपरत्वेन च प्रमाणानां चतुष्टयत्वं प्रतिपादितम्। तत्रेदमवधेयम्-"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति। प्रमाणचतुष्टयस्य संकीर्तनेनापि तदतिरिक्तं किमपि प्रमाणान्तरमस्ति न वा इत्याकारकसंशयस्योत्पत्तिर्भवत्येव। सजातीयविजातीयाभ्यां व्यावर्त्तमानात्मक-लक्षणस्य सप्रयोजनत्वेऽपि प्रमाणसंख्यायाः निर्णयः नैव सम्भवतीत्यतः सूत्रकारेण महर्षिणा गौतमेन आदौ विभागमुखेनैव तृतीयसूत्रस्य

---

[1] अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः धर्मशास्त्रं पुराणं च विद्याह्येताश्चतुर्दशः॥

आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः अर्थशास्त्रं च विज्ञेयं विद्या ह्यष्टादशैव तु ॥

[2] आत्मा वा अरेद्रष्टव्यः श्रोतव्योमन्तव्यो निदिध्यासितव्यः - बृह. ३.२/५

[3] तत्त्वचिन्तामणिः, प्रामाण्यवादप्रकरणम् पृ.सं.-७

[4] न्या. भा. पृ. १७

[5] प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ताऽवयव-तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः॥

[6] न्यायसूत्रम्-१/१/३

निर्वचनं कृतम्। सूत्रकाराभिमतं स्पष्टयति उद्योतकरः-
“तस्मात्संशयनिवृत्त्यर्थं युक्तो विभागोद्देश” इति।[7]

सामान्यलक्षणज्ञानमन्तरा विशेषजिज्ञासानुदयाद् आदौ प्रमाणसामान्य-लक्षणं वक्तव्यमासीत् सूत्रकारैः। तथा नोक्तमिति सूत्रकारस्य न्यूनता इति ये खलु वदन्ति तेषां मतनिराकरणाय तात्पर्यटीकाकारः निगदति – “उक्तसूत्रस्य विभागपरत्वेऽपि चरमतः “प्रमाण” इति शब्देन प्रमाणसामान्यलक्षणं पर्यवस्यति सूत्राणां बह्वर्थवचनात्। उक्तञ्च शांकरभाष्यस्य भामतीव्याख्यायां “सूत्रञ्च बह्वर्थवचनाद् भवति।” यथाहुः-
“लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः॥”[8]
मिश्रमतमभ्युपेत्य जयन्तभट्टः कथयति-
“एकेनानेन सूत्रेण द्वयञ्चाह महामुनिः।
प्रमाणेषु चतुःसंख्या तथासामान्यलक्षणम् ॥”[9]

प्रमाणलक्षणं वक्तव्यमिति धिया उच्यते – प्रपूर्वकमाधातुना ल्युटा निष्पन्नोऽयं प्रमाणशब्दः प्रमारूपेऽर्थे साधनरूपेऽर्थे च प्रयुक्तो भवति। प्रमीयते इति भावव्युत्पत्त्या प्रमाणशब्दः प्रमापरकः, प्रमीयतेऽनेन इति करणव्युत्पत्त्या प्रमाणशब्दः प्रमासाधनपरको भवति। एतेन सिद्ध्यति यत् प्रमाकरणं प्रमाणमिति। अनधिगतार्थगन्तृत्वं प्रमाणमिति प्रमाणलक्षणे प्रमाणशब्दः प्रमापरतया प्रदर्शितः। न्यायसूत्रे प्रदर्शितं प्रमाणपदं प्रमाकरणत्वार्थकम्। तस्य लक्षणं प्रतिपादयति तर्कभाषाकारः- “प्रमाकरणप्रमाणमिति।”[10] “उपलब्धिसाधनानि प्रमाणानी”ति ‘प्रमाणलक्षणं वदति भाष्यकारः। "उपलब्धिहेतुत्वं प्रमाणत्वमिति ‘वार्त्तिककारः। “सम्यगनुभवसाधनं प्रमाणम्[11] इति भासर्वज्ञः। सम्यक् चासावनुभवश्चेति सम्यगनुभवः, तस्य साधनं करणं प्रमाणम्। प्रमीयते येन तत् प्रमाणमिति करणव्युत्पत्तेरिह विवक्षितत्वात् करणभूतस्य प्रमाणस्य लक्षणाभिधानमिति सुरिवासुदेवः पदपञ्चिकाटीकायां निगदति। न्यायसारकारोक्तप्रमाणलक्षणे संशयविपर्यादिज्ञानवारणाय सम्यग् पदमिति। “सम्यग्ग्रहणं संशयविपर्ययापोहार्थम्”[12] स्मरणज्ञानव्यवच्छेदाय अनुभवपदं प्रमाणलक्षणे उपात्तम् "स्मरणज्ञानव्यवच्छेदार्थमनुभवग्रहणम्"[13]। सम्यगनुभवः प्रमाणमित्युक्तेः फलभूतस्य अनुभवस्य प्रमाणत्वापत्तिः, तथापि सम्यगनुभवहेतुरिति सिद्धेः साधनमिति गुरुकरणं प्रमातृप्रमेयव्यवच्छेदाय साधनपदमुपात्तं न्यायसारकारेण भासर्वज्ञेन "प्रमातृप्रमेयव्यवच्छेदार्थं फलाद् भेदज्ञापनार्थं च साधनग्रहणम्।[14]

तत्र प्रमाणभेदविषये दार्शनिकानां महती विप्रतिपत्तिः दृश्यते। तत्र केवलं प्रत्यक्षमेव

---

[7] न्यायवार्तिकम् पृ. २८

[8] भामती, ब्रह्मविचारप्रकरणम् – पृ. २५

[9] न्यायमञ्जरी, प्र.प्रक. पृ-२५

[10] तर्कभाषा, पृ. १६

[11] न्यायसारः, पृ. ११

[12] न्यायसारः, पृ. ११

[13] न्या. भूष. पृ. ४३

[14] न्या. भूष. पृ. ४६

प्रमाणमिति चार्वाकाः। प्रत्यक्षानुमाने द्वे प्रमाणे इति बौद्धाः वैशेषिकाश्च। प्रत्यक्षानुमानशब्दास्त्रीणि प्रमाणानि कपिलाः योगाचार्याश्च। प्रत्यक्षानुमानोपमानशब्दार्थापत्तयः पञ्च प्रमाणानि भवन्तीति प्राभाकराः। प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धयः षट्प्रमाणानि इति तौतातिकाः अद्वैतवेदान्तिनश्च। अर्थापत्त्यादीनाम् अनुमानेऽन्तर्भावात् प्रत्यक्षानुमानोपमानशब्दात्मकानि चत्वारि प्रमाणानि भवन्तीति अक्षपादावलम्बिनः प्रतिपादयन्ति। किन्तु नैयायिकैकदेशिनः भासर्वज्ञाचार्याः उपमानस्य शब्दान्तर्गतत्वम् अभ्युपगत्य अक्षपादमतावलम्बिनः त्रिविधमेव प्रमाणं सूचितवन्तः। तथाहि – "त्रिविधं प्रमाणं प्रत्यक्षमनुमानमागमश्चे"ति।[15] उपमितिं प्रति सादृश्यज्ञानस्य करणवाद् अतिदेशवाक्यर्थस्य च व्यापारत्वात् उपमितिप्रमा प्रत्यक्षाद्यतिरिक्ता, तत्करणस्यापि प्रमाणान्तरत्वं सिद्ध्यति। अतः सूत्रकारस्य प्रमाणचतुष्टयाभिमतं मतं समीचीनमिति मे भाति। समानविधित्वात् शब्दोपमानयोः अनुमानान्तर्गतत्वं यद्वैशेषिकैः साधितं तन्न युक्तं यतः शाब्दबोधे पदोपस्थाप्यपदार्थस्य भासमानत्वात् सोऽयं नियन्त्रितार्थकत्वात् शाब्दीप्रमायाः शब्दप्रमाणस्य च अनुमानान्तर्गतत्वं नास्तीति नैयायिकाः प्रवदन्ति। उक्तञ्च जगदीशेन-

साकाङ्क्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः।
सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा॥[16]

एवञ्च शाब्दबोधानन्तरं शाब्दयामीत्याकारका-नुव्यवसायस्य सर्वानुभवसिद्धत्वात् शाब्दी प्रमा अनुमित्याद्यतिरिक्ता इति।

प्रमाणचतुष्टयसिद्धौ सति तत्र प्रत्यक्षप्रमाणस्य वरिष्ठत्वाद् सर्ववादिसम्मतत्वात् च[17] आदौ प्रत्यक्षसामान्यलक्षणं निर्वक्ति सूत्रकारः- "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्य-मव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्"[18] प्रत्यक्षसूत्रे अव्यपदेश्यम् अव्यभिचारि व्यवसायात्मकमिति पदत्रयं व्यभिचारवारकत्वेन विशेषणम्। लक्षणं तावत् इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वमर्थाद् इन्द्रियस्यार्थेन सह सन्निकर्षाद् यज्ज्ञानमुत्पद्यते तत्प्रत्यक्षमिति सिद्धान्तः। प्रत्यक्षे इन्द्रियं करणम् इन्द्रियार्थसन्निकर्षश्च व्यापारो भवति। चक्षुःश्रोत्रादिबाह्यपञ्चेन्द्रियगोचरैः पदार्थैः सह तत्तदिन्द्रियसन्निकर्षाज्जायमानं तत्तदर्थविषयक-ज्ञानं प्रत्यक्षं भवति।

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणं स्वीक्रियते चेत्तर्हि आत्मा मनसा संयुज्यते मनः इन्द्रियेण इन्द्रियमर्थेन साकं संयुज्य प्रत्यक्षं प्रसज्यते इत्येषां या न्यायशास्त्रसम्मता प्रक्रिया तस्याः अपलापो भविष्यतीति वक्तुं नैव शक्यते यतः सूत्रकारेण यदिदं प्रत्यक्षलक्षणमुक्तं तदिन्द्रियसन्निकर्ष एव प्रत्यक्षस्य कारणम्, तन्न इतरकारणानां व्यवच्छेदकः। अर्थाद् इदमेव

[15] न्यायसारः- पृ.सं. ७९

[16] श.श. प्रकाशिका, का.३

[17] अर्थविशेषप्राबल्यात् न्या. सू. २/१/२९, "पूर्वप्राधान्यात्' सर्वप्रमाणानां प्रत्यक्षपूर्वकत्वात् ' 'न्यायवार्त्ति. पृ.३०

[18] १८न्या. सू. १.१.४

कारणमेतदतिरिक्तमपि कारणमस्तीत्यवधारणमेव, येन इन्द्रियार्थसन्निकर्षातिरिक्ताऽऽत्मनःसंयोगादौ प्रत्यक्षकारणत्वस्य व्यवच्छेदः स्यात् किन्तु प्रत्यक्षस्य यद्विशिष्टं कारणमिन्द्रियार्थसन्निकर्षः सः अत्रोच्यते न तु ज्ञानसामान्यस्य। आत्ममनःसंयोगादीनामनुमानादिज्ञानसाधारणतया अनुमानादिज्ञानजनकतया च नानुमानादिस्थलेऽनुमेयादौ इन्द्रियसंयोगः सम्भवति, अपि च प्रत्यक्षमात्रे इन्द्रियसंयोगस्य कारणत्वमवश्यम्भावीति प्रत्यक्षमात्रावच्छिन्नं प्रति इन्द्रियार्थसन्निकर्षस्य विशिष्टकारणत्वं सुवचम्।

एवञ्च इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वमिति प्रत्यक्षस्य लक्षणस्वीकारे शाब्देऽतिव्यातिः, यतः घटपटादिपदार्थानां घटपटादयो नामधेयाः शब्दाः वर्तन्ते, तेभ्यस्तद्वाच्यार्थस्य पटपटादेः ज्ञानं जायते तेन चार्थज्ञानेनार्थस्यानयनादिव्यवहारो भवति, तादृशव्यवहारकाले रूपेण सहेन्द्रियसन्निकर्षाद उत्पन्नमर्थज्ञानं रूपविषयकं भवति। रसेन्द्रियसन्निकर्षाच्चोत्पन्नं रसज्ञानं रसविषयकं भवति, रूपरसादिशब्दाश्च रूपादिविषयाणां नामधेयभूता एव, तैश्च नामधेयशब्दैः रूपादिज्ञानं व्यपदिश्यते। यथा रूपशब्देन "रूपमिति जानीते" रसशब्देन च 'रस इति जानीते', तत्र रूपादिनामधेये शब्देन व्यपदिश्यमानं सत् रूपादिप्रत्यक्षज्ञानं शाब्दबोधात्मकं भवतीति तादृशशाब्दे अतिव्याप्तिवारणाय सूत्रकारः अव्यपदेश्यपदमुपात्तम्। तथा च शाब्दभिन्नत्वे सति इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति। तथा सति ग्रीष्मर्तौ चक्षुःसन्निकृष्टेषु मरुमरीचिषु जायमानस्य उदकमिति ज्ञानस्य भ्रमात्मकस्य प्रत्यक्षत्वव्यवच्छेदाय अव्यभिचारीति पदं सूत्रकारैः विशेषितम्। तथा च भ्रमभिन्नत्वे सति शाब्दभिन्नत्वे सति इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। एवं सत्यपि लक्षणे अनवधारणात्मकसंशयेऽतिव्याप्तिः, तद्वारणाय व्यवसायात्मकमिति विशेषितम्। तथा च व्यवसायात्मकत्वे सति शाब्दभिन्नत्वे सति भ्रमभिन्नत्वे सति इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति फलितं भवति। प्रत्यक्षं प्रति इन्द्रियं करणं सन्निकर्षश्च व्यापारो भवति। सन्निकर्षस्तु लौकिकालौकिकभेदेन द्विविधः। संयोग-संयुक्तसमवाय-संयुक्तसमवेतसमवाय-समवाय-समवेतसमवाय-विशेषणविशेष्यभावभेदात् लौकिकसन्निकर्षः षड्विधः। सामान्यलक्षणा -ज्ञानलक्षणा-योगजभेदादलौकिकसन्निकर्षः त्रिविध इति न्यायज्ञैः स्वीक्रियते। तर्कभाषाकारैस्तु इन्द्रियस्य इन्द्रियार्थसन्निकर्षस्य ज्ञानस्य च कारणत्वं साधितम्। यद्वा भवतु सूत्रकारैः प्रत्यक्षस्य यल्लक्षणं प्रतिपादितं तज्जन्यप्रत्यक्षस्यैव। यतः ईश्वरप्रत्यक्षे इन्द्रियार्थसन्निकर्षस्याभावात् तत्राव्याप्तिवारणाय जन्यनित्योभयसाधारणप्रत्यक्षलक्षणं प्रतिपादितं नव्यैः- "ज्ञानाकरणकं ज्ञानं प्रत्यक्षमि"ति[19]। तच्च प्रत्यक्षं सविकल्पकनिर्विकल्पकभेदाद् द्विविधं भवति न्यायशास्त्रे। भासर्वज्ञमते योगायोगजभेदाद् द्विविधं प्रत्यक्षं भवति। प्रकारान्तरेण भासर्वज्ञोऽपि प्रत्यक्षस्यैव द्वैविध्यं

[19] तत्त्वचिन्तामणिः पृ. सं. ५९५

 ISSN : 2583-2271
Vol. - 2, No. 1: 2022

सविकल्पकनिर्विकल्पकभेदात् स्वीकृतवान्।

न्यायशास्त्रे द्वितीयं प्रमाणं भवति अनुमानम्। तच्च अनुमितिकरणरूपम्। अनुमितेः करणं व्याप्तिज्ञानं न तु ज्ञानयमानलिङ्गम्। ज्ञायमानलिङ्गस्य करणत्वे अतीतानागतादिलिङ्गेन अनुमितिर्न स्यादित्यापत्तिः। अतः नव्यैः व्याप्तिज्ञानस्य करणत्वं स्वीक्रियते। व्याप्तिश्च हेतुव्यापकसाध्यसामानाधिकरण्यरूपा। अनुमितौ परामर्शः व्यापारो भवति। परामर्शस्तावद् व्याप्तिविशिष्टपक्षधर्मताज्ञानम्। परामर्शजन्यं ज्ञानमनुमितिरिति। तथा चानुमितेः सामान्यलक्षणं प्रतिपादितं मणिकारैः " **व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिः**[20] इति फलितं भवति। तृतीयं प्रमाणमुपमानम्, उपमितिकरणरूपम्। उपमितौ सादृश्यज्ञानं करणमतिदेशवाक्यार्थस्मरणं व्यापारो भवति, उपमितिश्च फलं भवति। चतुर्थं प्रमाणं शब्दप्रमाणम्, "आप्तोपदेशः शब्दः"[21] इति सूत्रकारैरभिहितम्। शाब्दबोधे पदज्ञानं करणं, पदार्थोपस्थितिश्च व्यापारः। तत्र वृत्तिज्ञानस्य आकाङ्क्षा-योग्यता-आसत्ति-तात्पर्यज्ञानस्य च सहकारिकारणत्वं भवति। उक्तञ्च-

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥[22]

अर्थापत्त्यादीनामनुमानादौ अन्तर्गतत्वाच्चतुर्विधं प्रमाणमभ्युपगतं नैयायिकैः ॥ इत्यलम् ॥

[20] तत्त्वचि. अनु. प्रक. ( गादा )पृ. २१

[21] न्या. सू. १/१/७

[22] कारिकावली, श्लोकसंख्या- ८१

## सहायकग्रन्थसूची


- Belvalkar, S.R.(Ed.). *The Abhijnasakuntalam*. New Delhi: Kalidas Sahitya Academy, 1965. English.
- Bhattacharjea, Ramsadaya. *A Tale from the Vikramorbashee of Kalidas*. Calcutta: The Sanskrit press, 1859. English.
- patra, benudhar. *New Horizons in History $ Culture*. Delhi: Pratibha Prakashan, 2015.
- त्रिपाठी,ब्रह्मानन्द (सम्पादित)। *कालिदास-ग्रन्थावली*। वाराणसी : चौखाम्वा सुरभारती प्रकाशन्, 2014
- पाण्डेय,रमाशंकर (सम्पादित)। *मालविकाग्निमित्रम्।* वाराणसीः चौखाम्वा सुरभारती प्रकाशन्, 2012।
- पाण्डेय,परमेश्वरदीन (सम्पादित)। *विक्रमोर्वशीयम्*। वाराणसीः चौखाम्वा सुरभारती प्रकाशन्, 2013।
- दुवे,सीताराम। *वैदिक संस्कृति और उसका सातत्य*। दिल्लिः प्रतिभा प्रकाशन्, 2006।

# न्याय-वैशेषिकदर्शनयोः अदृष्टतत्त्वविमर्शः

**मलय-दे, डॉ उत्तमविश्वासः च**

**मलय-दे – शोधछात्रः संस्कृतसंकायस्य विद्यासागर-विश्वविद्यालयस्य**

**डॉ उत्तमविश्वासः - सहकारी अध्यापकः संस्कृतसंकायस्य विद्यासागर-विश्वविद्यालयस्य**

जगति अस्मिन् सर्वेऽपि मनुष्याः सर्वविधसुखप्राप्तये सततं प्रयतन्ते। यतो हि प्रत्येकं मनुष्याणाम् इयं स्वाभाविकी प्रवृत्तिः भवति यत् – मम दुःखस्य निवृत्तिः सुखप्राप्तिश्च भवतामिति। प्रयत्ने कृतेऽपि ते सर्वथा सुखं न प्राप्नुवन्ति। सर्वेषां पार्श्वे कोऽपि कोऽपि अभावः अवश्यमेव भवति। सर्वे जनाः अभावग्रस्थान् आत्मनः मन्यन्ते। एतत् दृष्ट्वा विचारकाः आत्मचिन्तनं स्वाध्यायं च आधारीकृत्य दुःखानां कारणानि विज्ञाय दुःखत्रयबन्धनेभ्यः प्राणिनः मोचयितुं स्वस्वसिद्धान्तान् प्रतिपादितवन्तः।

अनेन प्रकारेण तत्तत्सिद्धान्तानुसारेण तत्तत्सम्प्रदायानां तत्तद्दर्शनानां च प्रादुर्भावः सञ्जातः। संक्षेपतः अयमेव दर्शनशास्त्राणां समुदयस्य हेतुरिति वक्तुं शक्यते।

दृशिर् प्रेक्षणे-इति दर्शनार्थकदृश्-धातोः उत्तरं दृश्यतेऽनेनेति 'करणाधिकरणयोश्च'[1] करणवाच्ये ल्युट्-प्रत्यययोगे दर्शनशब्दः निष्पद्यते। येन साधनेन दृश्यते तत् दर्शनमित्युक्ते चक्षुरिन्द्रियं दर्शनमित्यपि वक्तुं शक्यते। परन्तु अयमर्थः अत्र नाभिप्रेतः। ज्ञानदृष्ट्या दर्शनमेव दर्शनशब्दस्य वास्तविकः अर्थः। अतः भारतीयदर्शने दर्शनशब्दस्यार्थः तत्त्वदर्शनम्। माधवाचार्यमते सूक्ष्मवस्तुनः व्यवधानयुक्तवस्तुनः दूरवर्तिवस्तुनश्चाक्षुषज्ञानं तथा स्पर्शादिविषयकज्ञानं हि दर्शनम्। उच्यते- 'सूक्ष्मव्यवहितविप्रकृष्टाशेषचाक्षुषस्पर्शादिविषयं ज्ञानं दर्शनम्'[2]

आस्तिक-नास्तिकभेदेन भारतीयदर्शन-शास्त्रं द्विविधम्। कथम् आस्तिकनामधेयत्वं कथं च नास्तिकनामधेयत्वम्? इति पृच्छायां केचन कथयन्ति ये ईश्वरस्य प्रामाण्यं स्वीकुर्वन्ति ते आस्तिकाः ये च न स्वीकुर्वन्ति ते नास्तिकाः इति। परन्तु एतत् मतं सर्वथा भ्रान्तमेव। तथा सति सांख्य-मीमांसयोः नास्तिकत्वप्रसङ्गः स्यात्। अतः उक्तं स्मृतिकारेण-

योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः।
स साधुभिर्वहिष्कार्यो नास्तिको वेदनिन्दकः॥[3]

ये तावत् वेदनिन्दकाः अथवा वेदस्य प्रामाण्यं न स्वीकुर्वन्ति ते नास्तिकाः, ये च स्वीकुर्वन्ति ते आस्तिकाः। एतेन चार्वाक-बौद्ध-जैनाः सम्यक् नास्तिकपदवीं लभेयुः। तत्र सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसा-उत्तरमीमांसाभेदे च

[1] पाणिनिसूत्रम्-३.३.११७

[2] न्यायकोशः,भीमाचार्यः- पृ ३४९

[3] मनुस्मृतिः-२.११

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

आस्तिकदर्शनानि षट्। नास्तिकदर्शनानि तु त्रीणि-चार्वाकबौद्धजैनभेदेन।

**भारतीयदर्शने अदृष्टस्य गुरुत्वम्**

सामान्यतः दर्शनशास्त्रं हि मोक्षप्रतिपादकं शास्त्रम्। मोक्षविषये वैशेषिकदर्शने महर्षिणा कणादेन –"तदभावे संयोगाभावोऽप्रादुर्भावश्च मोक्षः"[4] इति प्रयुक्तं तत्र तच्छब्देन अदृष्टार्थः एव गृहीतः, तत्पूर्वसूत्रे (अपसर्पणमुपसर्पणमशित-पीतसंयोगाः कार्यान्तरसंयोगाश्चेत्यदृष्टकारितानि[5]) अदृष्टकार्यस्योल्लेखात्। तस्मात् जीवात्मनः धर्माधर्मः गुणविशेषः एव अदृष्टम्। अतः कणादोक्तसूत्रेण बोध्यते यत्- जीवस्य धर्म-अधर्मरूपादृष्टस्य अभाववशात् तच्छरीरेण सह तस्य यत् विलक्षणसंयोगस्य अभावः, पुनः शरीरान्तरेण सह विलक्षणसंयोगस्य अप्रादुर्भावः अनुपपत्तिः वा सैव मोक्षः इत्युच्यते। अतः एतत् वक्तुं शक्यते यत् अदृष्टं विहाय मोक्षः भवितुं नार्हतीति। तस्मात् भारतीयदर्शने अदृष्टस्य महत्स्थानं महत्वञ्च वर्तते एव।

**अदृष्टशब्दस्य व्युत्पत्तिः**

न दृष्टम् इत्यस्मिन् विग्रहे अन्यार्थे 'नञ्'[6] इति सूत्रेण नञ्तत्पुरुषसमासे 'सुपो धातु-प्रातिपदिकयोः'[7] इत्यनेन समस्यमानपदस्य विभक्तिलोपे 'न दृष्ट' भवति। तदवस्थायां 'नलोपो नञः'[8] इति सूत्रेण 'न दृष्ट' इत्यस्य दृष्ट-इति उत्तरपदे परे पूर्वस्य न्-कारस्य लोपे 'अदृष्ट' इति समस्तपदं प्राप्यते। पुनः 'कृत्तद्धितसमासाश्च'[9] इति सूत्रेण समासबद्धपदस्य प्रातिपदिकसंज्ञायां 'ङ्याप्प्रातिपदिकात्'[10] इति अधिकारसूत्रयोगेन पुंलिङ्गे प्रथमपुरुषे एकवचने 'स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्याम्भ्यस्ङसि-भ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्'[11] इत्यनेन 'सु'-प्रत्यययोगेन 'अदृष्ट सु' इति स्थितौ अदृष्ट इति प्रातिपदिकस्य अकारान्तक्लीबलिङ्गत्वात् 'अतोऽम्'[12] इति सूत्रेण 'सु' स्थाने अम्-आदेशे अदृष्ट अम् इति स्थितौ 'अमि पूर्वः'[13] इत्यनेन पूर्वरूपैकादेशे अदृष्टम् इति पदं निष्पद्यते।

दृष्टशब्दश्च पुनः 'दृशिर् प्रेक्षणे' इति दर्शनार्थक-दृश्-धातोः कर्मवाच्ये अतीतकालार्थे 'निष्ठा'[14] इति सूत्रयोगेन 'क्त'-प्रत्यये अनुबन्धलोपे 'लशक्वतद्धिते'[15] इत्यनेन क्-लोपे दृश् त इति स्थितौ 'व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राज-च्छशां षः'[16] इत्यनेन श्-स्थाने ष्- आदेशे दृष् त इति स्थितौ 'ष्टुना ष्टुः'[17] इति सूत्रयोगेन दृष् ट्, एतदवस्थायां 'हलोऽनन्तराः संयोगः' इत्यनेन ष्-ट्-कारयोः संयोगसंज्ञायां संयोगे च निष्पद्यते।

**न्याय-वैशेषिकदर्शनयोः अदृष्टस्य स्वरूपम्**

---

4 वैशेषिकसूत्रम्- ५.२.१८

5 वैशेषिकसूत्रम्- ५.२.१७

6 अष्टाध्यायी-२.२.६

7 अष्टाध्यायी-२.४.७१

8 अष्टाध्यायी-६.३.७३

9 अष्टाध्यायी-१.२.४६

10 अष्टाध्यायी-४.१.१

11 अष्टाध्यायी--४.१.२

12 अष्टाध्यायी-७.१.२४

13 अष्टाध्यायी-६.१.१०७

14 अष्टाध्यायी-३.२.१०२

15 अष्टाध्यायी-१.३.८

16 अष्टाध्यायी-८.२.३६

17 अष्टाध्यायी-४.४.४१

साधारणतया अदृष्टशब्दस्य नियत्याद्यर्थेषु व्यवहारः दरीदृश्यते परन्तु दार्शनिकैः विशिष्टार्थे अदृष्टशब्दस्य प्रयोगः क्रियते। पूर्वजन्मनि कृतं कर्म इह जन्मनि संसारे दुःखस्य हेतुर्भवति। कार्यमात्रमेव फलमुत्पादयति। एतत् फलं द्विविधम् प्रत्यक्षं परोक्षञ्च। यथा अग्नौ हस्तस्थापनरूपं कार्यं हस्तदहनरूपं फलमुत्पादयति। अत्र दहनरूपफलस्य दर्शनयोग्यत्वात् प्रत्यक्षं फलम्। किन्तु सर्वदा कर्मणः फलं प्रत्यक्षगोचरं न भवति। कर्मणः कानिचन परोक्षफलानि अपि विद्यन्ते यानि तु अदृष्टनाम्ना अभिधीयन्ते। शरीरसृष्टिः आत्मनः पूर्वकृतकर्मफलजन्यम् उत निरपेक्षभूतमात्र-जन्यमिति प्रश्ने उच्यते-पूर्वकृतफलानुबन्धात् तदुत्पत्तिः[18]। अर्थात् शरीरोत्पत्तिः आत्मनः कर्मजन्या अदृष्टजन्या वा। वस्तुतस्तु धर्माधर्मरूपादृष्टात्मकेन पूर्वकृतकर्मफलेन सहसम्बन्धप्रयुक्तस्य शरीरस्य एव उत्पत्तिर्भवति। अत जीवस्य शरीरसृष्टेः निमित्तमेव अदृष्टम्। महर्षिगौतमाभिमतस्य व्याख्याप्रसङ्गे भाष्यकारस्य अभिमतं यत् – पूर्वकृतशब्देन पूर्वशरीरे अर्थात् पूर्वजन्मनि परिगृहीतशरीरे अनुष्ठितं शुभाशुभकर्म एव गौतमस्य विवक्षितम्। अतः पूर्वकृतकर्मजन्यधर्माधर्मौ एव कर्मणः फलम्। सूत्रे पूर्वकृत-शब्दात् उत्तरं फल-शब्दप्रयोगेण सूच्यते यत् जीवस्य पूर्वजन्मकृतशुभाशुभकर्मजन्यधर्माधर्म एव जन्मनः साक्षात्कारणम्। एतौ धर्माधर्मौ एव न्यायमते अदृष्टपदवाच्यौ। अदृष्टनिरूपणप्रसङ्गे भाषापरिच्छेदकारेण विश्वनाथन्यायपञ्चाननेन उक्तम्- "धर्माधर्माविदृष्टं स्याद् धर्मः स्वर्गादिसाधनम्।"[19] अर्थात् भाषापरिच्छेदकारस्य मते धर्माधर्मौ अदृष्टम् इत्युच्यते।

तत्र तावत् को नाम धर्मः? किं वा तस्य लक्षणम्? इति जिज्ञासायां भाषापरिच्छेदकारेण उक्तम्- 'धर्मः स्वर्गादिसाधनम्।'[20] अर्थात् याग-भाविस्वर्गादिफलयोः मध्ये व्यापारतया यत् साधनं कल्प्यते तत् धर्मः इत्युच्यते। महर्षिकणादेन उक्तं- 'यतोऽभ्युदयनिःश्रेयस-सिद्धिः स धर्मः'। 'अभ्युदयः' इति पदस्यार्थः तत्त्वज्ञानम्। निःश्रेयसं निश्चितं श्रेयः। अथः न्यायवैशेषिकनये निःश्रेयसं नाम दुःखस्य आत्यन्तिकी निवृत्तिः। तथा चोक्तं शङ्करमिश्रेण- 'निःश्रेयसमात्यन्तिकी दुःखनिवृत्तिः'[21] । 'अभ्युदयश्च निःश्रेयसञ्च' इति विग्रहे अभ्युदयनिःश्रेयसे , 'तयोः सिद्धिः' इति विग्रहेण 'अभ्युदयनिःश्रेयससिद्धिः' इति पदं द्वन्द्व-षष्ठीतत्पुरुषसमासद्वयेन निष्पद्यते। पुनः 'द्वन्द्वादौ द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति नियमानुसारं 'यतः' इति पूर्वपदार्थेन सह उभयपदार्थस्य अन्वयः भवति। अतः सूत्रस्य अर्थो भवति अभ्युदयरूपपदार्थतत्त्वज्ञानं निःश्रेयसरूपा-त्यन्तिकी दुःखनिवृत्तिश्च उभौ यस्मात् प्रादुर्भवति स एव धर्मपदवाच्यः

---

[18] न्यायसूत्रम्-३.२.६०

[19] भाषापरिच्छेदः-कारिका-१६१

[20] भाषापरिच्छेदः-कारिका-१६१

[21] वैशेषिकसूत्रम् १.१.२ पृ-२३

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

उपस्कारटीकायामपि उच्यते 'तदुभयं यतः स धर्मः'।[22]

अधुना प्रश्नः उदेति यत् – धर्मस्य तथाविधे लक्षणे कृते जन्यमात्रं प्रति कालस्यापि कारणत्वकल्पितत्वात् कालस्यापि धर्मत्वापत्तिः स्यात्। अस्याः आशङ्कायाः उत्तररूपेण उच्यते- 'अभ्युदयद्वारकमि'ति पदम्। अर्थात् अभ्युदयः निःश्रेयसमिति पदार्थद्वयं प्रति कालस्य कारणत्वे यदा अभ्युदयः द्वाररूपेण व्यापाररूपेण वा गृह्यते तदा निःश्रेयसं प्रति कालस्य कारणत्वं न भवति। किन्तु धर्मः अभ्युदयद्वारकनिःश्रेयसस्य जनको भवति। अनेन प्रकारेण काले धर्मलक्षणस्य अतिव्याप्तिः निरस्यते। अथवा 'अभ्युदयात् निःश्रेयससिद्धिः अभ्युदयनिःश्रेयससिद्धिः' इति पञ्चमीतत्पुरुषसमासेनापि काले धर्मलक्षणस्य न अतिव्याप्तिप्रसङ्गः। यतो हि स्वजन्यतत्त्वज्ञानवत्त्वसम्बन्धेन कालः निःश्रेयसजनकः न भवति। तथा हि उच्यते परिस्कारटीकायाम्- 'नन्वेवं कालेऽतिव्याप्तिः जन्यमात्रं प्रति कालस्य कारणत्वादित्यत आह,- अभ्युदयद्वारकमिति। स्वजन्यतत्त्वज्ञानवत्त्व-सम्बन्धेन निःश्रेयसजनको यः स धर्म इति फलितम्'।

**अदृष्टस्य अस्तित्वप्रतिपादनम्-**

अदृष्टस्य अस्तित्वप्रतिपादनावसरे मुक्तावलीकारेण उक्तं- गङ्गास्नानादिशुभकर्मणां यागादीनाञ्च व्यापाररूपेण धर्मः कल्प्यते। यागादेः व्यापाररूपधर्मे अस्वीकृते बहु पूर्वम् अनुष्ठितस्य यज्ञस्य विनष्टवशात् व्यापाररहितयज्ञादिः कालान्तरभाविस्वर्गादेः जनकत्वेन न गृह्यते। तथा हि उच्यते- 'यागादिव्यापारतया हि धर्मः कल्प्यते, अन्यथा यागादीनां चिरविनष्टतया निर्व्यापारतया च कालान्तरभाविस्वर्गजनकत्वं न स्यात्।[23] नरकादिसकलदुःखानां रोगविशिष्टेदानीन्तन-शरीरप्रभृतिलभ्यदुःखानाञ्च कारणम् अधर्मः। स च वेदादिशास्त्रनिषिद्धकर्मेभ्यो जायते। मनुप्रभृतिशास्त्रेषु विहितप्राजापत्यादिप्राय-श्चित्यादिना अधर्मस्य विनाशकल्पना-अधर्मस्य अस्तित्वे प्रमाणम्। अधर्मः न स्वीक्रियते चेत् प्रायश्चित्तादिना कस्यापि नाशत्वं न भवति। तदा शास्त्रोपदिष्टप्रायश्चित्तवैयर्थ्यापत्त्या तदुपदेष्टुः अप्रामाण्यापत्तिः स्यात्। मुक्तावलीकारेणोक्तम् - 'नरकादिसकलदुःखानां नारकीयशरीरादीनाञ्च साधनमधर्म इत्यर्थः। तत्र प्रमाणमाह- प्रायश्चित्तेति। यदि ह्यधर्मो न स्यात्, तदा प्रायश्चित्तादिना नाश्यत्वं न स्यात्।'[24]

**अदृष्टस्य भेदाः**

इदम् अदृष्टम् अपूर्वं वा कलिकापूर्व-समुदायापूर्व-परमापूर्वभेदेन बहुधा विभज्यते। अपूर्वस्य भेदविषये दिनकरीटीकायां मतत्रयं विद्यते-

१. दर्शयागस्य त्रिभ्यः अङ्गकर्मभ्यः त्रीणि कलिकापूर्वाणि उत्पद्यन्ते। तत्पश्चात् त्रिभिः कालिकापूर्वैः एकं समुदायापूर्वं जायते। पुनः पूर्णमासयागस्य त्रिभ्यः अङ्गकर्मभ्यः त्रीणि कालिकापूर्वाणि उत्पद्यन्ते। तस्मात् त्रिभिः

[22] वैशेषिकसूत्रम्- १.१.२ पृ-२६

[23] भाषापरिच्छेदः-१६२ ,मुक्तावली,

[24] भाषापरिच्छेदः-१६३ ,मुक्तावली,

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

कालिकापूर्वैः एकं समुदायापूर्वं जायते। तदनन्तरं समुदायापूर्वद्वयेन एकं परमापूर्वं जायते। तत्परमापूर्वं फलशिरस्कापूर्वम् इत्युच्यते। अनेन नवापूर्वं सिद्धम्। कलिकापूर्व-परमापूर्वयोः मध्ये यत् समुदायापूर्वम् अवान्तरापूर्वरूपेण कार्यं क्रियते। उक्तञ्च टीकायाम्- 'अत्र त्रयात्मकदर्शजन्यमपूर्वमेकं कलिकापूर्वत्रयव्यापारकम्। एवं त्रयात्मकपूर्णमासजन्यमेकमपूर्वं कलिकव्यापारकं ताभ्यां स्वर्गजनकापूर्वोत्पत्तिस्तच्च परमापूर्वं फलशिरस्कापूर्वमित्युच्यत इति नवापूर्वीपक्ष इत्येके।'[25]

२. केषाञ्चित् मते फलशिरस्कापूर्वं अस्वीकृतं प्रमाणाभावात्। एषां मते अष्टौ अपूर्वाणि सन्ति। समुदायापूर्वेण परमापूर्वस्य कार्यं क्रियते यस्मात् फलनिष्पत्तिः भवति। तथा हि उक्तम्- तत्रैव फलशिरस्कापूर्वे मानाभावादष्टापूर्वीत्यन्ये[26]

३. नव्यनैयायिकैः सप्त अपूर्वाणि स्वीकृतानि। तैः अवान्तरव्यापाररूप-समुदायापूर्वं न स्वीकृतम्। समुदायापूर्वे प्रमाणाभावात् । तेषां मते षड्कलिकापूर्वेण परमापूर्वस्य उत्पत्तिः जायते। उच्यते यत्- 'कलिकापूर्वषट्केनैव परमापूर्वसम्भवात् व्यापारभूतापूर्वद्वये मानाभावात् पूर्वोक्ता सप्तापूर्व्येव युक्तेति नव्याः। [27]

**अदृष्टविषयकमीमांसा**

शास्त्रविहितकर्मणः जीवात्मनि धर्मः उत्पद्यते। अनुरूपतया निषिद्धकर्मणः अधर्मः उत्पद्यते। इमौ धर्माधर्मौ जीवस्य प्रत्यक्षयोग्यत्वात् अदृष्टमित्युच्यते। ईश्वरस्य प्रत्यक्षगोचरेऽपि जीवात्मनः अतीन्द्रियग्राह्यत्वात् धर्माधर्मौ अदृष्टशब्देन सम्बोध्येते।

चार्वाकदार्शनिकैः परलोकः तदलौकिककारणञ्च न स्वीक्रियेते। परलोकस्य अलौकिककारणं नास्तीति मतखण्डनार्थम् उदयनाचार्येण उक्तम्-

"सापेक्षत्वादनादित्वात् वैचित्त्याद् विश्ववृत्तितः।
प्रत्यात्मनियमात् भुक्तेरस्ति हेतुरलौकिकः॥"[28]

उपर्युक्तकारिकायाम् उदयनाचार्येण प्रथमं कार्यस्य कारणसामान्यसाधनानन्तरम् अलौकिककारणं साध्यते। अलौकिककारणसाधनार्थं प्रथमं कारणसामान्यं साधितव्यम्। कारणसामान्ये साधिते अलौकिककारणं कथं साधयिष्यते इति प्रश्नस्योत्तररूपेण उच्यते- "तत्र प्रथमतः कारणसामान्यसाधनायाह सापेक्षत्वादिति।"[29] टीकाकारहरिदासस्य मते सापेक्षत्वस्य अर्थः कादाचित्कत्वम्। किञ्चित्कालस्थायिपदार्थः कदाचित्कः तस्य भावः कादाचित्कत्वम्। अनेन कादाचित्कत्वहेतुना कार्यस्य सकारणत्वं

---

[25] कारिकावली-(दिनकरी) पृ-८४८

[26] कारिकावली-(दिनकरी) पृ-८४८

[27] कारिकावली-(दिनकरी) पृ-८४८

[28] न्यायकुसुमाञ्जलिः कारिका.१.४

[29] न्यायकुसुमाञ्जलिः, (हरिदासी), कारिका. १.४

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

साध्यते। तथा हि उक्तं टीकाकारेण- "कार्य्यं सहेतुकं कादाचित्कत्वाद् भोजनजन्यतृप्तिवत्।"[30] इयं तृप्तिः क्षणस्थायी भोजनरूपकारणजन्या च – एतत् सर्वैः ज्ञायते। अस्मिन् हेतुवाक्ये कादाचित्कत्वं हेतुः। सकारणकत्वं साध्यम्। अस्मिन् दृष्टान्ते कादाचित्कत्वहेतौ सकारणकत्वसाध्यस्य व्याप्तिनिश्चयत्वात् जगति कार्यसामान्यरूपपक्षे कादाचित्कत्वहेतुना सकारणकत्वरूपसाध्यः अनुमीयते।

पूर्वपक्षिणाम् आशङ्का जायते यत् – यत् यत् कादाचित्कत्वं तत् तत् सहेतुकत्वमिति स्वीकृते घटादिकार्यस्य कारणानां कादाचित्कत्वात् कपालादीनामपि कारणं स्वीकर्तव्यम्। पुनः तत्कारणे कादाचित्कस्वीकृते तत्कारणस्यापि कारणं स्वीकर्तव्यम्। अनेन अनावस्थादोषापत्तिः भवेत्। किञ्च, घटादिकारणस्य नित्यमिति स्वीकारे (सदातनत्वस्वीकारे) घटादीनामपि सदातनत्वापत्तिः भवेत्। तस्मात् घटादिकारणं कादाचित्कत्वमिति स्वीकरणीयम्। उक्तञ्च हरिदासेन- "ननु घटादिहेतोः सदातनत्वे घटादेरपि सदातनत्वापत्तिः, तथा च तस्य कादाचित्कत्वं वाच्यम्, एवं तत्कारणपरम्परापि कादाचित्की सहेतुका वाच्या इत्यनवस्थायाम्"।[31]

पूर्वपक्षिणाम् आशङ्कायाः उत्तरे उदयनाचार्येण उक्तं यत् – कार्य्य-कारणप्रवाहः अनादिः। यत्र कार्य्य-कारणयोः ज्ञानं न भूयते तत्र अनावस्थादोषः भवति। यथा- हिमालय-सर्षपयोः मध्ये परिमाणगततारतम्यं सर्वैः प्रत्यक्षीक्रियते। अधुना परमाणोः अवयवः, पुनः तदवयवस्यापि अवयवस्वीकारे हिमालय-सर्षपयोः अवयवधारा अनन्ता भवेत्। उभयोः परिमाणस्य संख्यापत्तिः परिलक्षिष्यते। तदा प्रत्यक्षतः वैषम्यविरोधः जायते। अतः इयं अनावस्था दोषयुक्ता परन्तु बीजाङ्कुरयोः अनावस्था न दोषयुक्ता। यतो हि बीजात् अङ्कुरः, पुनः तदङ्कुरस्य कारणीभूतबीजं तस्य पूर्वाङ्कुरात् जायते- इति प्रत्यक्षप्रमाणसिद्धत्वात् बीजाङ्कुरवत् कार्य्य-कारणयोः अनावस्थापि न दोषुयुक्ता। हरिदासभट्टाचार्येण उक्तम्- "उक्तमनादित्वादिति बीजाङ्कुरवत् प्रामाणिकी इयमनवस्था न दोषाय इत्यर्थः।"[32]।

इत्थं कार्य्य-कारणप्रवाहे अनादिरूपेण प्रतिपादिते पुनः आशङ्का उदेति यत्-ब्रह्मैव जगतः कारणमस्तु अथवा नाना बुद्ध्यात्मिका प्रकृतिः कारणं भवतु। अस्याः आशङ्कायाः समाधाने उच्यते – जगत् वैचित्र्यमयम्। अतः विचित्रकार्यस्य विचित्रकारणं स्वीकरणीयम्। अविचित्रब्रह्मणः प्रकृतेः वा कार्यवैचित्र्यं न सिद्ध्यते। घटरूपकार्यं वस्त्ररूपकारणात् विजातीयकारणजन्यम्। यतो हि वस्त्ररूपकार्यस्य विजातीयकार्यत्वं घटे अस्ति। ईदृशानुमानेन विभिन्नविजातीयकारणं विभिन्नविजातीयकार्यस्य जनकः इति स्वीकर्तव्यः।

इत्थम् उदयनाचार्येण पूर्वपक्षिणां युक्तिखण्डनपूर्वकं विचित्रकार्य्यं प्रति

---

[30] न्यायकुसुमाञ्जलिः, (हरिदासी), कारिका.१.४

[31] न्यायकुसुमाञ्जलिः, (हरिदासी), कारिका.१.४

[32] न्यायकुसुमाञ्जलिः (हरिदासीटीका)- १.४

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

विचित्रकारणं स्वीकार्यम् इत्युक्तम्। पूर्वपक्षिणा पुनः आशङ्का क्रियते यत् –विचित्रकार्य्यं प्रति विचित्र्यकारणम् आवश्यकम्। अतः घटादि-लौकिककार्येषु दण्डादिहेतुरस्ति। प्रमाणाभावात् अलौकिकस्वर्गादौ तद्धेतुत्वं यागादेः असिद्धम्। अस्याः आशङ्कायाः समाधाने उच्यते- विफला विश्ववृत्तिर्नो न दुःखैकफलापि वा। दृष्टलाभफला वापि विप्रलम्भोऽपि नेदृशः॥[33] वेदप्रामाण्यवादिनां यागादिकर्मणि प्रवृत्तिः दृश्यते। तेषां यागादौ प्रवृत्तिः न विफला। यतो हि शिष्टव्यक्तिः इष्टसाधनताज्ञानवशात् कर्मणि प्रवर्त्तते। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते। अतः तेषां प्रवृत्तिः सफला। 'विश्वेषां परलोकार्थिनां यागादौ प्रवृत्तिर्विफला न।'[34]

तेषां प्रवृत्तिः दुःखमात्रफला नापि सुखमात्रफला। प्रमादग्रस्तव्यक्तिं विहाय कोऽपि दुःखार्थं न कर्मणि प्रवर्त्तते। प्रवृत्तिं प्रति इष्टसाधनताज्ञानमेव कारणम्। इदं कर्म मम इष्टसाधकम् इति ज्ञानवशात् व्यक्तेः कर्मणि प्रवृत्तिः जायते। अतः विश्वेषां प्रवृत्तिः न दुःखमात्रफलिका। उच्यते च हरिदासीटीकायाम्-'न वा दुःखमात्रफलिका, प्रवृत्तेरिष्टसाधनताधीसाध्यत्वात्।'[35] अर्थ-पूजा-ख्याति-धनादि-ऐहिकसुखलाभार्थं परलोकार्थिनां यागादिकर्मणि प्रवृत्तिः न जायते। यतो हि वहूनि वैदिककर्माचरणकारिणः सन्ति। ये कस्मादपि अर्थं न गृह्णान्ति। ते अर्थ-पूजा-ख्याति-धनादिम् अनपेक्ष्य यागादिम् आचरन्ति। अतः यागादौ तेषां प्रवृत्तिः न अर्थादिलाभजनितसुखफला। 'न च दृष्टलाभफला पूजाख्यातिधनादिफला, तन्निरपेक्षैरपि तदाचरणात्।[36]

पुनः आशङ्का जायते यत्- परप्रतारणार्थं यागादौ विश्वेषां परलोकार्थिनां प्रवृत्तिः जायते। कैश्चित् जनैः पूर्वं परप्रतारणार्थं यागादिकर्म कृतम्। तान् अनुसृत्य अन्येषामपि कर्मणि प्रवृत्तिः परिलक्ष्यते। अस्याः आशङ्कायाः समाधानरूपेण उच्यते- इयं प्रतारणा न सम्भवति। यतो हि इह जगति कोऽपि मनुष्यः नास्ति यः परप्रतारणार्थं नानाविधक्लेशकर्मभिः आत्मानं अवसादयति। अतः स्वर्गादिसुखमेव यागप्रवृत्तेः फलम्- विषयेऽस्मिन् यागादौ प्रवृत्तिरेव प्रमाणम्। - 'कैनचित् प्रतारकेण स्वर्गादिफलकतया........[37]

पुनः आशङ्का जायते यत् – स्वर्गादिपरलोकः स्वीकृतः, तस्य साधनं यागाद्यपि स्वीकृतम्। अतः यागादिकं स्वर्गादिहेतुः भवतु, न तु तज्जन्यादृष्टम्। अस्याः आशङ्कायाः समाधानरूपेण उच्यते- चिरध्वस्तं फलायालं न कर्मातिशयं विना। सम्भोगो निर्विशेषाणां न भूतैः स्वंस्कृतैरपि॥[38] यागादिक्रिया अल्पकालस्थायिनी, उत्पत्तेः परक्षणे विनश्यते। किन्तु यागात् अव्यवहितपरं स्वर्गरूपफलं नोत्पद्यते। कारणं कार्यस्य

[33] न्यायकुसुमाञ्जलिः का. १.८
[34] न्यायकुसुमाञ्जलिः (हरिदासीटीका)- १.८
[35] न्यायकुसुमाञ्जलिः (हरिदासीटीका)- १.८
[36] न्यायकुसुमाञ्जलिः (हरिदासीटीका)- १.८
[37] न्यायकुसुमाञ्जलिः (हरिदासीटीका)- १.८
[38] न्यायकुसुमाञ्जलिः का. १.९

अव्यवहितपूर्ववृत्तिः भवति। अतः यागात् कथं स्वर्गादिफलं प्राप्यते? अथः यागादिजन्यः एकः अतिशयः स्वीकर्तव्यः। अतिशयम् अदृष्टमित्युच्यते। यागादिजन्यम् अदृष्टं विहाय यागादिः स्वयं क्षणिकत्वात् स्वर्गादिफलोत्पादने असमर्थः। यथा अस्माकम् अनुभूतविषयाणां स्मृतिः किञ्चित्कालानन्तरं भूयते। परन्तु अनुभवः त्रिक्षणं स्थायी विद्यते। तदनन्तरं विनश्यते। अनुभवात् संस्कारः उत्पद्यते इति सर्वजनस्वीकृतम्। अनुभवः तेन संस्काररूपव्यापारेण स्मृतेः कारणं भवति। एकमेव यागादिकर्मापि स्वजन्यादृष्टेन स्वर्गादिरूपफलस्य जनकं भवतीति स्वीकार्यम्।–चिरध्वस्तं यागादि कर्म अतिशयं तत्फलानुकूलव्यापारं विना फलाय न अलं न समर्थम्, चिरध्वस्तकारणस्य व्यापारद्वारैव हेतुत्वं, यथा अनुभवस्य संस्कार-द्वारकस्य स्मृतौ'[39]

पुनः आशङ्का जायते यत् –चिरविनष्टकर्म अतिशयं अर्थात् स्वजन्यादृष्टं विना फलोत्पादने असमर्थत्वात् चिरविनष्टकर्मजन्यादृष्टस्य अस्तित्वं स्वीकार्यम्। तथापि तददृष्टं शरीरादिषु भोग्यपदार्थेषु स्वीकरणीयं न तु आत्मनि।

अस्याः आशङ्कायाः समाधानरूपेण उच्यते – अदृष्टरूपविशेषरहितात्मनः भोगः न सम्भवति। आत्मनि अदृष्टे अस्वीकृते, शरीराद्याकारे परिणतभूते च अदृष्टस्य स्वीकारे तददृष्टेन संस्कृतभूतेन अदृष्टशून्यात्मनः भोगः न सम्भवति। भोगरूपफलं (कार्यम्) आत्मनि भवति। शरीरादौ अदृष्टे स्वीकृते कार्य-कारणयोः ऐकाधिकरणाभावात् कार्य्यकारणभावः न सिद्ध्यति।

पुनः आशङ्का जायते यत् शरीरादौ स्थितादृष्टम् आत्मनि स्वाश्रयसंयोगसम्बन्धे विद्यमानत्वात् कार्य्य-कारणयोः समानाधिकरण्यं सिद्ध्यते। 'स्व' शब्देन अदृष्टं बोध्यते, तस्य आश्रयः शरीरम्, शरीरस्यास्य संयोगः आत्मनि विद्यते।

उत्थापिताशङ्कायाः समाधानरूपेण उच्यते- आत्मनि अदृष्टे अस्वीकृते सर्वे आत्मानः विशेषरहितत्वात् आत्मसु पृथक् पृथक् भोगः न सिद्ध्यते। अर्थात् शरीरे अदृष्टं स्वीकृत्य स्वाश्रयसंयोगसम्बन्धे आत्मनि तददृष्टस्य सम्बन्धस्वीकारे आत्मा सर्वव्यापी इति कारणवशात्, अदृष्टस्य आश्रयीभूतस्य एकशरीरस्य संयोगः सर्वेषु आत्मसु विद्यमानत्वात् सर्वेषाम् आत्मनां तुल्यभोगापत्तिः भवेत्। किन्तु प्रत्येकम् आत्मनः भोगः व्यवस्थितः। अर्थात् एका व्यक्तिः यथा सुखं दुःखं च भुङ्क्ते, अपरजनः तथा न भुङ्क्ते। अनेन बोध्यते यत् पृथक् पृथक् आत्मनः विलक्षणभोगः व्यवस्थितः। भोगस्य वैलक्ष्यणवशात् पृथक् पृथक् आत्मनि पृथक् पृथक् अदृष्टं स्वीकार्य्यम्। पृथक् पृथक् आत्मनि अदृष्टेन जातशरीरादिभिः पृथक् पृथक् भोगः स्वीकर्तव्यः।

### सहायकग्रन्थपञ्जी


- महर्षिकणादः, *वैशेषिकदर्शनम्,* सम्पा. श्रीपञ्चाननतर्करत्नभट्टाचार्य्यः, कलकाता, बङ्गवासी-इलेक्ट्रोमेसिन प्रेस, १३१३।


[39] न्यायकुसुमाञ्जलिः (हरिदासीटीका)- १.९

ISSN : 2583-2271
Vol. - 2, No. 1: 2022


- महर्षिगौतमः, *न्यायदर्शनम् (न्यायसूत्रम्),* (भाष्य-वात्तिक-तात्पर्यटीका-वृत्तिसहितञ्च), सम्पा. तारानाथतर्कतीर्थः, अमरेन्द्रमोहनतर्कतीर्थश्च, नवदेहली, मुन्सीराममनोहरलालपाव्लिशार्स-प्राइभेट्-लिमिटेड्,२००३।
- महर्षिगौतमः *न्यायदर्शनम्(न्यायसूत्रम्)* (खण्डः-३), सम्पा. फणिभूषणतर्क-वागीशः, कलकाता, पश्चिमबङ्गराज्य-पुस्तकपर्षत्, २०११ (चतुर्थसंस्करणम्)।
- महर्षिपाणिनिः, *अष्टाध्यायी,* सम्पा. ड. तपनशङ्करभट्टार्चार्य्यः, कलकाता, संस्कृत वुक डिपो, २०१२, (पुनर्मुद्रणम्)।
- विश्वनाथपञ्चाननभट्टाचार्य्यः, कारिकावली, द्वितीयखण्डः (मुक्तावलीसहिता सा च प्रभा- मञ्जुषा-दिनकरी-रामरुद्री-गङ्गारामीतिव्याख्यापञ्चकसमन्विता), सम्पा. श्री सी. शङ्कररामशास्त्री, दिल्ली, चौखम्बा संस्कृत प्रतिष्ठान, २०१०
- विश्वनाथपञ्चाननभट्टाचार्य्यः, *भाषापरिच्छेदः,* (सिद्धान्तमुक्तावली-सहितः), सम्पा. ड. अनामिकारायचौधुरी, कलकाता, संस्कृत पुस्तक भाण्डार, २०११ (तृतीयसंस्करणम्)
- वागची दीपककुमारः, *भारतीयदर्शनम्,* कलकाता, प्रग्रेसिभ् पाव्लिशार्सः, २००६.पुनर्मुद्रणम्।
- विश्वनाथपञ्चाननभट्टाचार्य्यतर्कतीर्थः,*भाषा परिच्छेदः,* (सिद्धान्तमुक्तावलीसहितः), सम्पा. ड. श्रीगोपालचन्द्रमुखोपाध्यायः, वर्धमान, वर्धमानविश्वविद्यालयः, १९९८, (द्वितीयसंस्करणम्)।
- श्रीमद्उदयनाचार्य्यः, न्यायकुसुमाञ्जलिः (हरिदासीव्याख्यासहितः), सम्पा. श्रीश्यामापदमिश्रः, कलकाता, संस्कृत पुस्तक भाण्डार, १३९०।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# रूपकालङ्कारनिरूपणे प्राचीन-नव्यमतयोः तुलनात्मकं विवेचनम्

**डॉ रत्नाकर-खुण्टिआ**

**अध्यापकः, नीलगिरिसंस्कृतमहाविद्यालयः**

**राजनीलगिरिः, बालासोरः, ओडिशा, ७५६०४०**

सामान्यतः रूपयतीति रूपकम् इति व्युत्पत्त्या उपमेयस्य रूपणकर्तृ= रूपवत्त्वसम्पादकमुपमानं रूपकमित्यन्वर्थं नाम। एवञ्च उपमेये उपमानतादात्म्यवर्णनं रूपकमिति सामान्यतो रूपकस्वरूपकम्। निष्कृष्टं रूपकलक्षणं तु पण्डितराजेनेत्थं प्रत्यपादि –

"उपमेयतावच्छेदकधर्मपुरस्कारेणोपमेये शब्दान्निश्चीयमानमुपमानतादात्म्यं रूपकं तदेव चोपस्कारकत्वविशिष्टमलङ्कारः॥"[1]

इदञ्च रूपकलक्षणं तादात्म्यघटितम्, सर्वालङ्कारिकलक्षणापेक्षया जागरूकतया प्रतिपादितञ्च लक्षणम्। लक्षणेऽस्मिन् वैशिष्ट्यस्य परिज्ञानाय पण्डितराजपूर्ववर्तिनां प्राचीनानां नवीनानां लक्षणानि लेशतस्समाकलनीयानि।

**प्राचीननवीनालङ्कारिकोक्तानि रूपकलक्षणानि –**

रूपकलक्षणनिरूपणे च प्राचीननवीनयोः प्रधानतया पञ्च प्रकाराः दृश्यन्ते। तत्र –

१. उपमेये उपमानाभेदो रूपकमित्येका सरणिः।

२. तत्राप्यभेदप्रतिपत्तौ आरोपमर्यादा अध्यवसानमर्यादा चेति प्रकारद्वयसम्भवात् आरोपमर्यादयाऽभेदप्रतिपत्तिरिति स्पष्टीकर-णायारोपपदमन्तर्भाव्य रूपकलक्षणकथनम् इति द्वितीया सरणिः।

३. **मुखं चन्द्रः** इत्यादौ रूपके नामार्थयोरभेदान्वयस्यैव वक्तव्यतया मुखे चन्द्राभेदस्य च बाधितत्त्वात् रूपके लक्षणा अङ्गीकार्या। एवं लक्षणावृत्तिमन्तर्भाव्य रूपकलक्षणप्रतिपादनसरणिस्तृतीया।

४. सादृश्यासम्बद्धे केवले विषयेऽपि विषयिणः आरोपे रूपकमिति चतुर्थी सरणिः।

५. विषये अथवा उपमेये विषयिणः अथवा उपमानस्य ताद्रूप्यं दृष्टौ निक्षिप्य लक्षणकथनसरणिः पञ्चमी।

एतेषां पञ्चप्रकाराणां क्वचिदेतदन्यतम-प्रकारसाङ्कर्येण लक्षणनिरूपणमपि प्रचलति। तदेवमत्र पञ्चप्रकाराः। यथा-

१. अभेदघटितानि लक्षणानि।

२. आरोपघटितानि लक्षणानि।

३. लक्षणाघटितानि लक्षणानि

४. उपमानोपमेयभावस्यैच्छिकतानिरूपक-लक्षणानि।

५. ताद्रूप्यघटितानि लक्षणानि।

तत्र भरतस्तावत् -

[1] र. गं. पृ. २९६॥

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

**स्वविकल्पेन रचितं तुल्यावयवलक्षणम्**
**किञ्चित्सादृश्यसम्पन्नं यद्रूपं रूपकं तु तत्।**
**नानाद्रव्यानुरागाद्यैर्यदौपम्यगुणाश्रयम्**
**रूपनिर्वर्णनायुक्तं तद्रूपकमिति स्मृतम्॥**[2]

इति कारिकया विशिष्टतया रूपकस्वरूपं निर्वक्ति अत्र **यद्रूपं रूपकं तु तत्** इति भरतोक्त्या उपमानोपमेययोस्ताद्रूप्यमेव रूपकमिति प्रतीयते उपमानोपमेयभावश्च रूपकत्वप्रयोजकस्य रूपस्य मूलतया अस्तीति च ज्ञायते।

**१. अभेदघटितानि लक्षणानि**

प्राचीनालङ्कारिकेषु भामहलक्षणे -

उपमेये उपमानस्य तत्त्वरूपणं रूपकमिति स्फुटीकृतम्।[3] तत्त्वं नाम अभेदः। एवञ्च अभेदघटितमिदं रूपकलक्षणम् पण्डितराजोक्तं तादात्म्यघटितं रूपकलक्षणमप्यस्मिन्नेव वर्गेऽन्तर्भवति।

**उपमैव तिरोभूतभेदा रूपकमुच्यते**[4] इति दण्डिलक्षणमपि तिरोभूतभेदप्राधान्यस्योपम्यस्य रूपकत्वं समर्थयति, इत्यभेदघटितमेव रूपकलक्षणं भविष्यति अत्र तु कस्याभेदः कुत्र वर्ण्यते इति शङ्कायाः भामहलक्षणम् इव स्पष्टं समाधानं नोपलभ्यते। एवं रुद्रटोऽपि -

*यत्र गुणानां साम्ये सत्युपमानोपमेययोरभिदा अविवक्षितसामान्या कल्प्यत इति रूपकं प्रथमम्॥*[5]

इत्यभेदघटितमेव रूपकस्य लक्षणं निर्वक्ति किन्त्वत्राप्यभेदस्य प्रतियोग्यनुयोगिनाविमाविति पृथङ्निर्देशो न कृतः। नवीनेषु मम्मटाचार्योक्तम्-

**तद्रूपकमभेदो य उपमानोपमेययोः** ‘[6]

इति रूपकलक्षणमप्येतादृशीं कोटिमेवाधिरोहति।

**२. आरोपघटितानि लक्षणानि**

प्राचीनलक्षणेषु-

**उपमानोपमेयस्य गुणसाम्यात्तत्त्वारोपो रूपकम्॥**[7]

इति वामनोक्त रूपकलक्षणे, नवीनेषु –

**अभेदप्राधान्ये आरोपे आरोपविषयानपवे रूपकम्॥**[8]

इत्यलङ्कारसर्वस्वकारोक्तरूपकलक्षणे आरोपो रूपकम्’[9] इति शोभाकरमित्रोक्तलक्षणे रूपकं रूपितारोपाद्विषये निरपह्नवे’[10] इति दर्पणकारोक्तलक्षणे च आरोपपदस्य श्रुतिः।

**३. लक्षणाघटितानि लक्षणानि**

“श्रुत्या सम्बन्धविरहाद्यत्पदेन पदान्तरम्।
गुणवृत्तिप्रधानेन युज्यते रूपकं हि तत्॥[11]
यदोपमानशब्दानां गौणवृत्तिव्यपाश्रयात्।
उपमेये भवेद्वृत्तिस्तदा तद्रूपकं मतम् ॥”[12]

इत्युभोजराजाभ्यामुक्ते रूपकलक्षणे लक्षणावृत्तिघटिते।

---

[2] ना. शा. भा. २ पृ. १३०४, पृ. १३०५॥

[3] काव्या. पृ. २८ - उपमानेन यतत्त्वमुपमेयस्य रूप्यते।
गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः॥

[4] का. आ. पृ. १००

[5] काव्यालं. पृ. १०६॥

[6] का.प्र. पृ. २३४॥

[7] का. सू. पृ. १६१॥

[8] अ.स.पृ. ११५॥

[9] अ.र. पृ. ३२॥

[10] सा.द. पृ. ५२१॥

[11] का.स. पृ. ११ ॥

[12] स.कं. प ४ पृ. १७९॥

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

**४.उपमानोपमेयभावस्य ऐच्छिकतानिरूपक-लक्षणानि**

**आरोप रूपकम्**[13] इति लक्षयता शोभाकरमित्रेण तु सादृश्यमूलकस्येव सम्बन्धान्तरमूलकस्य अप्यारोपस्य रूपकत्वं प्रतिपादितम् एवम् -

**तद्रूपकमारोपे यत्रापह्नयते न तद्विषयः॥**[14]

इति विद्याधरोक्तरूपकलक्षणेऽपि विषयपदस्यैव निर्देशात् उपमेयपदस्यानिर्देशाद् उपमानोपमेयभावस्य लक्षणेऽस्मिन् ऐच्छिकत्वमेव।

**५. ताद्रूप्यघटितानि लक्षणानि**

**विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्**[15]

इति कुवलयानन्दे अप्पय्यदीक्षितोक्तं जयदेवरूपकलक्षणमभेदताद्रूप्यान्यतरघटितम्।

**आरोपविषयस्य स्यादतिरोहितरूपिणः**
**उपरञ्जकमारोप्यमाणं तद्रूपकं मतम्॥**[16] इति विद्यानाथोक्तलक्षणे

**बिम्बाविशिष्टे निर्दिष्टे विषये यद्यनिह्नुते।**
**उपरञ्जकतामेति विषयो रूपकं तदा॥**[17]

इति चित्रमीमांसोक्तलक्षणे च **उपरञ्जकम्, उपरञ्जकताम्** इति पदयोर्यथाक्रमम् **ताद्रूप्यबुद्धिजनकम्, आहार्यताद्रूप्यनिश्चय-गोचरताम्** इति व्याख्यानात् इदं लक्षणद्वयमपि ताद्रूप्यघटितमेव।

एवमनेकप्रकारैः रूपकलक्षणानि प्राचीननवीनालङ्कारिकैर्निरूपितानि।

प्रचीननवीनालङ्कारिकेषु पञ्चधा वर्गीकृतेषु रूपकलक्षणेषु यद्यप्यभेदघटितलक्षणापेक्षया आरोपघटितलक्षणेषु काचित् स्पष्टताऽस्ति यत् - रूपकेऽभेदः आरोपमर्यादयैव, न तु अध्यवसायमर्यादया इति स्पष्टीकरणम्, तथाऽपि आरोपो नाम **अतस्मिन् तद्बुद्धिः**। स च कदाचित्प्रत्यक्षतो जायेत कदाचिच्च शब्दतो जायेत। तत्र शब्दजन्याभेदबुद्धिरेव निश्चयात्मिका रूपकव्यवहारस्याङ्गं भवति। न त्वन्यादृशी प्रात्यक्षिकी निश्चयात्मिकाभेदबुद्धिः। एतदभिप्रायेणैव पण्डितराजः रूपकलक्षणे शब्दान्निश्चीयमानमुपमानतादात्म्यम् इत्याह। एवं सुसूक्ष्मचिन्तनपुरस्सरं रूपकालङ्कारलक्षणनिर्माण पण्डितराजपूर्ववर्तिष्वालङ्कारिकेषु न क्वचिदपि दृश्यते इति शम्॥

---

[13] अ.र. पृ. ३२॥

[14] ए. आ. पृ. २७७॥

[15] कु. आ. पृ. १५॥

[16] प्र.रु. पृ. २५०॥

[17] चि.मी. पृ. १७१॥

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# भगवद्ब्रह्मविरचिते गुण्डिचाशतके साहित्यश्रीः

**डॉ. भारतभूषणरथः**

**सहाचार्यः, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः**

**तिरुपतिः, आन्ध्रप्रदेशः**

"गुण्डिचाशतकम्" ओडिशाराज्ये प्रतिष्ठितस्य श्रीजगन्नाथदेवस्य स्तोत्रवर्णनपूर्वकम् एकं शतककाव्यम्। शतककाव्यस्यास्य कर्ता भगवान् ब्रह्मा। खीष्टीय-अष्टादशशतके ओडिशाराज्यस्य गञ्जाममण्डले कविः जन्म लब्धवान्। संस्कृतभाषया देवनागरीलिप्या लिखितमिदं शतककाव्यं जगन्नाथदेवस्य भक्तिपरकमेकं भक्तिकाव्यम्। ओडिशाराज्यसंग्रहालये मातृका इयम् उपलभ्यते। यत्र आहत्य 102-पत्राणि सन्ति। ताडपत्रेषु लिखिता एषा मातृका सुरक्षिता पठनयोग्या चास्ति।

Ref: Descriptive catalogue of Sanskrit Manuscript of Odisah-BBSR, page – CLXXI, L-166

**कविपरिचयः**

प्रस्तुतगुण्डिचाशतकाभिधेयस्य शतककाव्यस्य रचयिता भगवद्ब्रह्मेति। स्वयमेव कविना काव्यस्यैतस्य प्रस्तुतस्यान्तिमे लिखितं यत्- "इति श्रीभगवद्ब्रह्मणा विरचितं गुण्डिचावर्णनशतकम्" इति। परवर्त्तिभिः पण्डितैरपि एतस्य काव्यस्य रचयिता "भगवद्ब्रह्मा" इति कथ्यते। अयं कविः उत्कलदेशे गञ्जाममण्डले धराकोटाख्ये जनपदे गङ्गापुरशासने जनिं लब्धवान्।

कवेः भगवद्ब्रह्मणः कालविषये कविः स्वयम् किमपि न सूचयति। पण्डितकुलमणिमिश्रस्तस्य सूक्तिरत्नावल्यां लिखति कवेर्जन्मसमयः 'अष्टादशशतकमि'ति। ऐतिहासिकः केदारनाथमहापात्रो लिखति- कविरयं ब्रह्ममहोदयः प्रसिद्धकवेः चक्रपाणि-पट्टनायकस्य सामसमयिकः इति। चक्रपाणि-पट्टनायकरचितां गुण्डिचाचम्पूं विलोक्यैव प्रस्तुतकाव्यमिदं रचयामास ब्रह्मनामकः कविः। एवं बहुविधप्रमाणेन ज्ञायते भगवान् कविराजब्रह्मा उत्कलेषु गञ्जाममण्डले गङ्गापुरशासने ख्री. अष्टादशशतके जन्म लब्धवान्।

एतस्य प्रमाणरूपेण मिलति यद् -
Kaviraj Bhagaban Rath, who was a rival of Chakrapani in the field of Sanskrit culture also belonged to the Ganjam area like the latter.

Ref: Descriptive catalogue of Sanskrit Manuscript of Orissa.

कविभगवद्-ब्रह्मणः कृतिद्वयं गुण्डिचाशतकम्, मृगयाचम्पूः चेति प्रसिद्धम्। मृगयाचम्पूमातृका वर्षद्वयात् पूर्वं मया

ओडिशाराज्यसंगहालयस्य मातृकाविभागात् संगृहीता अस्ति।

**गुण्डिचाशतकस्य रचनाविन्यासः**

कविना संस्कृभाषया काव्यमिदं व्यलेखि। काव्यस्यास्य भाषा प्रौढा कठिना च। काव्यस्यास्यामूलचूलं कविना दीर्घसमासरचनात्रावलम्बिता। यदि कश्चिद् विद्यार्थी एतादृशकाव्यस्य यत्नपूर्वकमध्ययनं कृत्वा शतश्लोकानां भावं सम्यक्तयावगम्य प्रत्येकं पदस्य व्याकरणशास्त्रदृष्ट्या निर्वचनं विधाय कोषादिकं समुद्धृत्य अलङ्कारशास्त्रदृष्ट्या ध्वनि-गुण-दोष-रीत्यलङ्काराणामपि विवेचनं विदधाति तर्हि स पण्डितो भवति। अतः आभाणकं वर्तते – शतश्लोकेन पण्डित इति।

गुण्डिचाशतके पृथ्वीछन्दः प्रयुक्तमस्ति। पृथ्वीछन्दसः प्रत्येकं पादे सप्तदशसंख्यकानि अक्षराणि वर्त्तन्ते। पृथ्वीलक्षणं यथा – "जसौ जसर्यला वसग्रहयतिश्च पृथ्वी गुरुः॥" यथा –

"यदीयसुषमावलोकनमुदः शरत्कौमुदी –
कदम्बपरिशीलनप्रमदघाटिकाचेटिका।
तदम्बुदकदम्बडम्बरविडम्बिकिञ्चिच्छर-
त्सरोजदुरहंकृते रनवकाशिनेत्रं भजे॥"

शतककाव्यस्यास्य अलङ्कारविन्यासः शोभां धरति। यत्र विशेषतया अतिशयोक्तिः, स्वभावोक्तिः, परिकरः तथा काव्यलिङ्गप्रभृतयः अलङ्काराः शोभन्ते। तत्र मालादीपकालङ्कारस्य एकमुदाहरणं यथा –

"रथो मुरहरत्विषा विकशिता विलासेन सा
स लोचनचयेन सप्रमदसम्भवेनाम्भसा।
तदप्यमितवीचिभिर्गहनतां जगाहे यतः
स तर्पयतु दर्पहृत्कलिमदस्य कोपि क्षणः॥"

गुण्डिचाशतकम् – 82

कविः लिखति यद् रथः यतः यस्मात् उत्सवात् मुरहरस्य जगन्नाथस्य त्विषा कान्त्या गहनतां सान्द्रतां प्राप। नन्दिघोषनामकः रथः श्रीजगन्नाथस्य कान्त्या शोभितः इति भावः। विकशन्ती या मुरहरत्विट् जगन्नाथदेवस्य कान्तिः सा विकशता विकासं प्राप्तेन विलासेन जगाहे जगन्नाथकान्तिः विलासेन शोभिता इत्यर्थः। सः विलासः लोचनचयेन शोभितः इति। सः लोचनचयः प्रमदसम्भवेन आनन्दजातेन अम्भसा जलेन आनन्दाश्रुणा गहनतां जगाहे। तदपि आनन्दाश्रु अमितविचिभिः बहुलहरीभिः गहनतां जगाहे। आनन्दाश्रु अप्रमितलहरीभिः शोभितम्। कलिमदस्य कलियुगस्य मदः तस्य दर्पहृत् दर्पहारी कोऽपि क्षणः उत्सवः कालो वा तर्पयेत् तृप्तिं कुर्यात्। अत्र काचित् शृङ्खला रमणीया प्रदर्शिता कविवरेण इति व्याख्याकारस्य आचार्यव्रजकिशोरनायकमहोदयस्य चिन्तनम्। अतः अत्र मालादीपकमिति मतम्। एवमेव उत्प्रेक्षायाः उदाहरणं यथा –

"प्लवत्परमरामणीयक इवाभिलुण्ठ्योत्थितं
सुधामयमरीचिमण्डलपिचिण्डमध्यात्किमु।
घनप्रमदमर्मतः किमु समुद्धृतं शर्म तत्
करोतु करुणानिधेरभिनवाक्षियुग्मं मम॥"

गुण्डिचाशतकम् – 79

अत्र कविः भगवतो जगन्नाथस्य नेत्रोत्सवं वर्णयन् आह – प्लवत् गच्छत् तरलीभवत् इति यावत्। यत् परमरामणीयकं परमरमणीयता तत्र अभिलुठ्य उत्थितमिव समुदितं किम्?

सुधामयमरीचिमण्डलस्य अमृतमयकिरण-विलयस्य पिचिण्डमध्यात् उदराभ्यन्तरतः समुद्भूतं किम्? समुदितं किम्? एतादृशं घनप्रमदमर्मतः समुद्भूतं करुणानिधेः कृपासागरस्य जगन्नाथदेवस्य तत् अभिनवं नूतनम् अक्षियुग्मं नेत्रद्वयं मम कवेः शर्म सुखं करोतु सम्पादयतु। अत्र उत्प्रेक्षालङ्कारः।

कविता भवति भावप्रधाना। कवितायां यदि चमत्कारिभावो नास्ति तर्हि सा नाद्रियते सामाजिकैः। केवलं छन्दोनियमानुसारेण कथंचित् शब्दान् यदि कश्चित् संयोजयति तर्हि एतावतासौ कविपदवाच्यो न भवति। पदविन्यासस्य यद्यपि आवश्यकता महती वरीवर्ति तथापि केवलं पदविन्यासे एव सामाजिका न रमन्ते। कविः यदि तस्य काव्ये सर्वथा नूतनस्य रम्यस्य भावस्य प्रकटनाय तदनुकूलं शब्दराशिं संघटयति तर्हि स पाठकैः स्तूयते। अन्यथा स गर्हितो भवति। प्रस्तुतकाव्ये कविना बहुषु स्थलेषु चमत्कारिभव्यभावान् नूतनान् प्रदर्श्य सहृदयहृदयमावर्जयतितराम्। उदाहरणार्थमत्र एकः श्लोको लिख्यते –

सपत्नविरहो महोल्लसितमाधुरीसम्पदां-
सहासननवोत्सवो निखिलमोहलक्ष्मीपतेः।
परप्रमदकन्दलीबलदमन्दलीलाभरः
स रक्षतु पुरःसरः सरसिजस्रजश्चक्षुषा॥

गुण्डिचाशतकम् – 19

काव्यस्य प्रतिपादनभङ्गीविशेषः शैलीपदेन कथ्यते। प्रतिपादनभङ्गी सर्वेषां कविनां भिन्ना भिन्ना भवति। स्वप्रतिपादनशैल्या कवयः स्वीयकाव्यं प्रति पाठकान् आकर्षयन्ति। अस्यापि कवेः कश्चित् शैलीविशेषो वर्त्तते येनापि पाठकाः स्वत एव आकृष्टा भवन्ति। अयं तावदलङ्करणशैल्या प्रायः स्वीयं काव्यं वर्णयन् दृश्यते। प्रायशोऽत्र कविः गौडीमार्गमनुसरति। कुत्रचिदपि वैदर्भीमार्गमपि अनुसरति कविः।

शतककाव्येऽस्मिन् भक्तिरसः यद्यपि प्राधान्यं भजते तथापि शान्तः, करुणः प्रभृतयः रसाः बहुत्र शोभन्ते। मङ्गलपद्ये भक्तिः अपरूपा अस्ति। यथा –

"विलोचनकदम्बकं यदुपलभ्य लुभ्यत्किमा –
लिलेह नहि किं पपौ नहि ममज्ज किंवा नहि।
परन्तु किमिवाभवन्नवतमाललक्ष्मीतिर-
स्क्रियं निगमसाम्प्रदायिकमुपास्महे तन्महः॥"

गु.श – 1

गुण्डिचाशतके रचनाप्रयोगे विविधवैशिष्ट्यं परिलक्षते। तत्रापि विशेषतया शब्दवैचित्र्यपूर्णं काव्यस्य उदाहरणं यथा –

"दयामधुरिमामृतप्रमदभुक्तिमुक्तिश्रियां
परस्परपुरोविनिःस्मरणसम्भ्रमाडम्बरः।
मुहुर्जयति यत्र नो हृदि भवन्तु ताः सङ्कटाः
फटाधरपतेः फटानटनकृत्कटाक्षच्छटाः॥"

पद्येऽस्मिन् "फटाधरपतेः फटानटनकृत्कटाक्षच्छटाः" इत्यत्र शब्दप्रयोगे सौन्दर्यं परिलक्षते। न तु केवलं रसप्रतिपादने कवेः वैशिष्ट्यम् अपि च गुणः, ध्वनिः, वृत्तिः प्रभृतीनां साहित्यतत्त्वानाम् उपस्थापने कवेः पाण्डित्यं बहुत्र द्रष्टुं शक्यते।

**गुण्डिचाशतकस्य विषयः-**

श्रीजगन्नाथदेवस्य प्रसिद्धासु द्वादशसंख्याकयात्रासु गुण्डिचायात्रा विश्वप्रसिद्धा। रथयात्राम् अवलम्ब्य कविना काव्यमिदं निर्मितम्।

ज्येष्ठमासपूर्णिमायां तिथौ स्नानवेद्यां जगन्नाथस्य स्नानोत्सवो विधीयते। ततः परं पञ्चदशदिनानि जगन्नाथो ज्वराक्रान्तः सन् अनवसरे गर्भगृहमध्ये तिष्ठति। ततो नवयौवनं प्राप्य स पतितानां पावनाय आषाढशुक्लद्वितीयायां तिथौ वडदाण्डं प्रति आगच्छति। रथारूढो भवन् भ्रातृभगिनीभ्यां साकं स्वजन्मभूमिं गुण्डिचामन्दिरं नवदिवसानां कृते शुभयात्रां विदधाति। नवदिवसेभ्यः परं श्रीमन्दिरं पुनरपि प्रत्यागच्छति। रथयात्रायाः पवित्रे अवसरे भगवतः लीलां वर्णयति कविः स्वकीये गुण्डिचाशतके।

काव्यस्य अन्ते कविः जगन्नाथं विश्वमङ्गलनिमित्तं प्रार्थयति। एवमेव स्वस्य मुक्तये कविः प्रार्थयति श्रीजगन्नाथम्। यथा –

पिचण्डपरिपूरकाधिकनिपीतपीताम्बरा-
नन‌द्युतिसुधाबहिर्गमभियेव बद्धानना।
सरोरुहमयी स्वनर्त्तनमनोज्ञरूपालका
हरेरलकपालिका भवतु पालिका मादृशाम्॥
मदंहसि मदंहसत्यलमनूननानैनसां
प्रचण्डिमपिचिण्डिले मरुति हिण्डमाने मुहुः।
चलत्पतितपावनाधिपपताकिकास्तम्भभृत्
प्रसारितभुजद्वयः स मयि निर्दयः किं भवेत्॥

गुण्डिचाशतकम् – 116-117

## सहायकग्रन्थसूची


- गुण्डिचाशतकं मातृका – भगवद्ब्रह्मविरचितम्
- भगवद्ब्रह्मविरचितगुण्डिचाशतकम् एकं समीक्षात्मकं सम्पादनम् – प्रो. व्रजकिशोरनायकः – प्राप्तिस्थानम् – सांविदीप्रकाशनम्, पुरी – प्रकाशनसम्बत्सरः - 2008
- Descriptive catalogue of Sanskrit Manuscript of Orissa.

# विंशशताब्दिकं महाकाव्यं पाण्डवविक्रमम्: एकं विहङ्गावलोकनम्

**डॉ. सुबोधकुमारनन्दः**

**सहाचार्यः, संस्कृतविभागः, घाटालरवीन्द्रशतवार्षिकीमहाविद्यालयः**

**घाटालः, पश्चिममेदिनिपुरम्, पश्चिमबङ्गः, ७२१२१२**

**कविपरिचयः**

स्वाधीनोत्तरबङ्गदेशे ये केचन संस्कृतभाषायां काव्यनाटकादीनि विरच्य आत्मनः स्वातन्त्र्यं प्रतिष्ठितवन्तः तेषु अन्यतमः आसन् पश्चिमबङ्गस्य चव्विशपरगणान्तर्गतस्य भाट्टपल्लीनिवासिनः बहुशास्त्रनिष्णातस्य गुणिगणाग्रगण्यस्य नानादर्शनकाव्यतन्त्र-परमाचार्य्यस्य पञ्चाननतर्करत्नस्य ज्येष्ठपुत्रः श्रीमन्तः श्रीजीवन्यायतीर्थपादाः। येषामाविर्भावकालः आसीत् १८९३ खीष्टाब्दीयजानुयारीमासस्य षड्विंशतिदिनाङ्कः। यथा एते आधुनिकशिक्षाव्यवस्थामाश्रित्य B.A., M.A. प्रभृत्युपाधिं प्राप्तवन्तः तथैव भारतीयप्राचीनपद्धतिमाश्रित्य काव्य-व्याकरण-न्यायादिविद्यामधीत्य तीर्थमुपाधिं लब्धवन्तः। एते खलु कलिकताविश्वविद्यालये २९-वर्षं यावत् अध्यापकजीवनं समाप्य भाट्टपल्लीसंस्कृत-महाविद्यालये अध्यक्ष्यचराः आसन्। सारस्वतसाधनायाः निदर्शनरूपेण तेन राष्ट्रपतिपुरस्कारः (१९६८) प्राप्तः। सम्पूर्णानन्द-संस्कृत विश्वविद्यालयपक्षतः प्रयागविद्वान्समाज-पक्षतश्च महामहोपाध्यायोपाधिः, वर्धमानविश्वविद्यालयतः सम्मानसूचकं डि.लिट् इत्युपाधिः, विश्वभारतीशान्तिनिकेतनपक्षतश्च देशिकोत्तमोपाधिञ्च अलभन्त। एतान् विशेषोपाधीन् विहाय आधुनिकसंस्कृत-कविमार्तण्डः श्रीजीवन्यायतीर्थो बहुभिः उपाधिभिः विभूषितः।

महाकवेः सारस्वतसाधनकालं सुदीर्घम्। अस्मिन् काले न्यायतीर्थपादाः अनेकानि दृष्य-श्रव्यादीनि काव्यानि विरचितवन्तः। तासु कृतिषु पाण्डवविक्रमं नाम एकमद्वितीयं महाकाव्यम् 'एकचन्द्रः तमो हन्ती'ति न्यायेन बङ्गदेशे आधुनिकसंस्कृतसाहित्ये विराजते। समालोचिकायाः ऋता चट्टोपाध्यायमहोदयायाः मते भारवि-माघ-श्रीहर्षादयः कवयः यथा एकैकं महाकाव्यं विरच्य अमरतां प्राप्तवन्तः तथैव न्यायतीर्थोऽपि अनेन यास्यतीति[1]। काव्यमिदमष्टादशसर्गैः १५००श्लोकैश्च समृद्धम्।

---

[1] क. 20th century Sanskrit literature-Rita Chattopaadhyaaya (page no 311)

ख. श्रीजीवन्यायतीर्थेर् सारस्वत साधना, ऋता चट्टोपाध्याय,(पृ१-४)

ग. आधुनिक संस्कृतनाटक, द्वितीय भाग (पृ. ८२२)

घ. श्रीजीवन्यायतीर्थेर् सारस्वत साधना, पृ ४।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

राजशेखरस्य मते काव्यस्य एकः रचनाप्रकारः अस्ति परिकरबन्धेति। अनया रचनापद्धत्या कविः मूलविषयः एकत्वेपि चतुर्पार्श्वं बहुदूरवर्ती परिकरबन्धः रचनां कृत्वा अभिनवकाव्यं रचयितुं शक्यते।[2] महाभारतावलम्बने रचितं किरातार्जुनीयम् अथवा रामायणाश्रितम् उत्तररामचरितं नाटकमस्यां श्रेण्यामन्तर्भुक्तं भवति। तद्दृष्ट्या न्यायतीर्थस्य महाकाव्यमिदमभिनवं परिकरबन्धविशेषमिति। व्यासकृतस्य महाभारतस्य वनपर्वणः पञ्चदशाधिकत्रिंशदध्यायादारभ्य विराटपर्वणः विषयः एव पाण्डवविक्रममहाकाव्यस्य इतिवृत्तम्। अस्य महाकाव्यस्य प्रथमसर्गचतुष्टयस्य विषयाः एव महाभारतस्य विराटपर्वणः द्वादशाध्यायपर्यन्तं विस्तृताः। प्रबन्धेऽस्मिन् तादृशस्य महाकाव्यस्य प्रथमसर्गचतुष्टयस्य समीक्षात्मकं विश्लेषणं कर्तुं यतते।

**पाण्डवविक्रममहाकाव्यस्य पूर्वकथा-**

भारतवर्षस्य सभ्यतायाः, संस्कृतेः, इतिहासस्य, साहित्यस्य च अनन्यनिदर्शनमुपलभ्यते कृष्णद्वैपायनस्य व्यासदेवस्य महाभारते महाकाव्ये। यत्र भरतवंशीयानां महासंग्रामस्य वर्णनं वर्तते। महाभारतस्य सभापर्वकथानुसारं पाण्डवनाथो युधिष्ठिरः कपटपाशप्रभावेन निःस्वः दरिद्रश्चाभूत्। पाण्डवाः पणानुसारं द्वादशवर्षं यावत् वनवासं तदतिरिक्तम् एकवर्षमज्ञातवर्षार्थमरण्यं जग्मुः। ते प्रथमं काम्यकारण्ये ततः द्वैतवने एवं द्वादशवर्षमतिष्ठन्। पण्डुनन्दनाः भाग्यबलेन यायावरीयजीवनं नीत्वा अरण्ये आटन्। अस्मात् प्रारब्धा श्रीजीवस्य कविकल्पना, पाण्डवविक्रममहाकाव्यस्य परियोजना।

**पाण्डवविक्रममहाकाव्यस्य प्रथमसर्गचतुष्टयस्य प्रतिपाद्यम्**

**प्रथमसर्गस्य विषयसारः**

विमर्षनामके पाण्डवविक्रममहाकाव्यस्य प्रथमसर्गे दृश्यते यत् सर्वस्वान्तः युधिष्ठिरः अज्ञातवासार्थं गन्तव्यमिति विचिन्त्य सायंकालीनः भानुरिव अवसन्नः जातः। सहसा अस्य मनोगगने उद्भासिता अभूत् नवप्रावृडिव वितर्कधारा। नभमण्डले उदिततारागण इव सकलसुखस्य आशा क्षीणरूपेण जागरिता अभवत्। अज्ञातवासकाले यदि सोऽधमः दुर्योधनः तान् केनाऽपि प्रकारेण विदितुं समर्थः स्यात् तर्हि पणानुसारं पुनः द्वादशवर्षं वनवासं ततः पुनरपि एकवर्षम् अज्ञातवासे गन्तव्यम्। अतः व्याकुलतया मनसा स धर्मदेवमचिन्तयत् -

"हे तात! धर्म! प्रियसन्तते! त्वं प्रसीद मर्मच्छिददुःखतो नः।
संरक्षितुं देहि दयाम्बुवर्षम् विपन्मरौ दर्शय पारमार्गम्॥" (पा.वि.१/१५)

युधिष्ठिरः धर्मपितरं संबोध्य वदति यत् धर्मे स्थितेऽपि मम नाशस्य सेतुरूपं शत्रूणां पापाचारकार्यं यदि करोति तर्हि इहलोके धर्मसंस्थापनमिति या ते इच्छा अस्ति सा वृथा भविष्यति, ममागमनमत्र निष्फलं यास्यति।

---

[2] ३. "मूलैक्यं यत्र भवेत् परिकरबन्धस्तु दूरतोऽनेकः। तत्पुरप्रवेशप्रतिमं काव्यं सुकविभाव्यम्॥,काव्यमीमांसा. द्वादश अध्यायः पृ १३६।

जगति तलेऽस्मिन् अधर्मस्य प्रतिष्ठा यदि स्यात् तर्हि 'ध्वंसाय नूनं प्रसरेत् समस्तविश्वम्'। प्रज्ञामार्जनायां यदि स्यात् कपटपटुता तर्हि नृशंसता हि प्रशंसतां भजेत्। समाजे प्रसरिष्यति मात्स्यनीतिः। धर्मप्रतिष्ठाय आगतं माम् विपदि संस्थाप्य तव को लाभः? आकाशवचनैः धर्मस्तं "भो दुर्गां प्रपद्यस्व च दुर्गमार्गे"(१/२१) इत्यवदत्। चर्मचक्षुषा अज्ञेयमिदं धर्मवचनं निर्देशपरायणञ्चेति विचिन्त्य धर्मसुतः अनुजान् आहूय उवाच- भवतामनुरूपं मे दशा। यद्यूयं चिन्तयथ तदहमपि चिन्तयामि। दुर्बुद्ध्या पाशक्रीडया अस्माकमग्रगतिः स्थगिता। यूयं महद्दुःखमनुभूतवन्तः। यूयं मम वश्यत्वं स्वीकृत्य भाग्य-भोगरहिताः संजाताः। क्षमस्व मां व्यसनासक्तम्। पुनरज्ञातवासस्य चिन्ता मां व्याकुलीकरोति। इदानीं वदथ कतमव्रतेन पटान्तराच्छन्ननटायमानाः अरिजनानाम् अगोचरे वर्षमेकं जगत्यस्यां यापयामः? यतो हि –

"यशो न शोभा द्युतिरेव पुंसा कुवंशजत्वेऽपि भवत्यभिज्ञा।
प्रभातनूरप्यसिते निशीथे खद्योतमज्ञातम-भिव्यनक्ति"।(१/३४)

यशः पुरुषस्य शोभा न भवति द्युतिरेव पुरुषस्य कान्तिः। तमसारात्रौ प्रभाक्षीणत्वेऽपि खद्योतिका यथा प्रकाशयति, तथा कुवंशजत्वेऽपि अभिज्ञः भवितुं शक्यते पुरुषः। ऊर्णनाभसदृशः भीतोऽहं स्वकृतेन पणेन पाशेन। पुनः द्वादशसंवत्सरादि दण्डेन बद्धः न स्यां तदर्थं चिन्तितोऽहम्। अतः मुक्तेः उपायं ब्रूत। सर्वे भ्रातरः स्वाभिमतं प्रकटितवन्तः। अनुजेषु तृतीयपाण्डवः अर्जुनः अज्ञातवासस्य प्रथमदिनादेव नटवेशयोग्यं वेशं परिधाय वर्षभोग्यजीवनं (अज्ञातवासकालीनं जीवनं) देशान्तरे यापयामः। ज्येष्ठभ्राता कङ्कवेशं धृत्वा राज्यान्तरे सकलानां दृष्टिं विस्तारयतु। मध्यमपाण्डवः भीमः पाचकाभिनये समर्थः, स राजगृहं गत्वा वल्लभनाम्ना परिचितो भवतु। अहं बृहन्नलारूपं धृत्वा नृत्यादिलीलया राज्ञः प्रियं भवितुं प्रयत्नं करिष्ये। नकुलोऽश्वपालव्याजेन ग्रान्थिकनाम्ना तं राज्यं प्रविशतु। सहदेवस्तु अनुजोत्तमः गोपालवेशं धारयन् तन्तिपालनाम्ना वंशीकरहस्ते तत्रापि गच्छतु इत्युक्तवान्। तेषां पुरतः सहस्रकान्तिपुञ्जं धृत्वा साक्षात् याज्ञसेनी समागत्य "पतिसन्निधानं हि मे गतिः। क्षुधातुराय अमृतं समं मे पतिसङ्गो भवतु। भवद्वर्त्मनि वर्तताम् मे स्वार्थः"। भवतां पदाङ्कमनुसृत्य सैरन्ध्रीवेशं दधती तत्रैव स्थास्यामीति। अनल्पबोधाः पाण्डवाः मन्त्रणाविषये अचिन्तयन् यत्तेषामयं गुप्तवासः मत्स्याधीशस्य विराटपुर्यां भवत्विति महाकाव्यस्य प्रथमसर्गस्य विषयसारः।

**द्वितीयसर्गस्य विषयसारः-**

दुर्गमो मार्गोऽयं पारयितुं केवलं दुर्गतिनाशिनी दुर्गा एव समर्था इति विचिन्त्य पाण्डवशिरोमणिः दुर्गतिदूरीकरणाय नवमार्गलाभाय च जगदम्बिकां साश्रुनयनाभ्यां पूजयामास। हे मातः! तव उज्ज्वलाक्षिकटाक्षपातेनैव सर्वसिद्धिर्भवति संसारे। ब्रह्माण्डस्योत्पत्तिः, स्थितिः लयं च तव पलकपातमात्रेण सम्भवम्। त्वमीश्वरस्य (शिवस्य) शरीरस्यार्धभागं स्वीकृत्य विश्वजननीरूपेण वन्दिता। पुरन्दरादयः सर्वे देवाः त्वदिच्छया

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

कुर्वन्ति स्वकर्माणि। लीलाछलेन यमभिलषसि तम् ऋषिं, देवतां, ब्रह्मरूपं, विष्णुम् अथवा महेश्वरं करोषि। हे देवि! तव अनुकम्पा यस्मै अस्ति स संसारेऽस्मिन् पूजनीयो भवति। तव प्रभावेन सूर्य-चन्द्रौ भुवनेशपदं लभेते। भूर्भुवस्वरूपिणी त्वं हि जगति शान्तिस्थापने समर्थासि। अस्मिन् संसारे को जानाति ते रहस्यसीमाम्? हे त्रैलोक्यतारिणि! रक्षस्व तव पुत्रान् अस्मान्। एवं बहुप्रकारेण देवीस्तुतिं विधाय धर्मसुतः ध्यानरतोऽभूत्। तदानीं सहसा सः अपश्यत्- तस्य पुरतः अविर्भूता हरवधूः या मुरलिध्वनि-निसर्गमधुरवचसा उक्तवती- “का भीतिरस्ति तव धर्मपथस्थितस्य”? स्मरन्मात्रेण मां प्राप्स्यसि। मायामयी परस्य मायां जानात्येव। तस्याः प्रसादेन धन्यं मे जीवनम्। देवस्तावकः स युधिष्ठिरः सानन्दं नवीनमुत्साहचित्तेन तथा प्रवृत्तं यथा दिवसादौ व्यक्तिः भवति प्रवृत्ता। हर्षोल्लसितः युधिष्ठिरः बहुविधोपकरणोपहारै भीमादीनां भातृणां समीपं गत्वा सर्वस्याः परियोजनायाः रूपं तथा दत्तवान् यथा नेपथ्ये स्थित्वा नेपथ्यनाथः (सूत्रधरः) पात्रं ददाति। अतः परं कालज्ञः अर्जुनः कार्मुक-असि-भल्लादीन् शस्त्रान् रज्जुभिः अबध्नत्। दुःखेषु, दुःखमयावस्थायां ते (अज्ञातवासजनितं) यद्रूपम् अधारयन् तैः लज्जा-सनाथीकृत-सज्जतयापि हास्यश्रियं रोद्धुमसमर्थाः आसन्। अत्रैव पाण्डवविक्रमस्य गिरिजास्तुतिर्नाम द्वितीयसर्गः समाप्तिं गच्छति।

**तृतीयसर्गस्य विषयसारः-**

पाण्डवविक्रमस्य वनवर्णना नाम तृतीयसर्गः अतीव रमणीयः। प्रकृत्याः चारुवर्णनं कविना अत्र कृतम्। मन्त्रणानन्तरं भीमादयः पूजनीयाग्रजमग्रतः कृत्वा अज्ञातवासाय द्वैतवनाद् दूरदुर्गमवनान्तरं ययौ। तेषां गमनकाले वनभूमिः दृश्यकौतुकं रसरूपमुपहारं दत्तवती। देवकाननोपममरण्योद्यानमिदं पाण्डवानां समागमनेन अधिकरमणीयमभूत्। अरण्यस्य क्वापि सुशोभित आसीत् भीमसदृशः भीमदर्शनः प्लक्षवृक्षसमूहः। कुत्र च बहुवल्कलपिप्पलवृक्षः धर्मपुत्रानुरूपं स्वजटाभिः धर्मसूत्रं दधत् दण्डायमान इति अनुमीयते स्म। काननस्य एकदेशे अर्जुनवत् दण्डायमानाः शुक्लवर्णाः अर्जुनवृक्षाः। कुत्रचित् पुनः देवदारुवृक्षाः वनश्रियः वर्धयन्तः विराजिताः। अतिकोमलकान्तिभिः लतापुञ्जैः सुशोभितः वनदेशः। कुसुमगुच्छाः उज्ज्वलरूपं धृत्वा द्रौपद्याः केशपाशानुरूपं शोभन्ते धरापृष्ठे। अपूर्वा खलु अरण्यशोभा। काननप्रान्तभूमिः विस्तृतैः तृणैः सुशोभिता। राजपुत्रेभ्यः पूजनाशया अरण्यदेवतया स्वेच्छया पातितानि तृणासनानीत्यनुमीयते। कदम्ब-निम्ब-शाल्मली-विभीतकीत्यादीनि स्थलभेषजानि उपवनभ्रान्तिमुत्पादयन्ति। अरण्यस्य कस्मिन्प्रदेशे विराजमानाः सन्ति गगनचुम्बिवंशवृक्षाः। तान् दृष्ट्वा अनुमीयते यत् तृष्णातुराः पिशाचाः किमु जलकणालाभार्थं बाहुप्रसारितं कृत्वा सन्ति- “तृष्णातुरपिशाचबाहुवद्वारिविन्दुमनुसन्दधीत किम्”। यद्भवतु नाम प्रकृतेः अपूर्वा शोभा पाण्डवश्रमविनोदनार्थमलम्। तस्मिन् मनोरमे अरण्ये ते गुप्तवेशं नीतवन्तः। अनन्तरं काक-

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

कोकिल-मयूरसमूहान् जनाकीर्णसमीपवर्ति-ग्राम्यश्मशानवेदिना सह वृक्षान् विलोक्य संशयरहिता अभवन्। अर्जुनः शमीवृक्षमाश्रित्य सर्वम् आकल्य निजपृष्ठदेशात् अस्त्रं भूमौ स्थापितवान्। ततः युधिष्ठिरादय अज्ञातवासोपयुक्तस्थानं विचिन्त्य आत्मनः विदितनाम संगोप्य विराटनगरीं ययौ। ततः शंका-शंकितहृदये ते विराटराजप्रसादस्य द्वारदेशं प्रापुः।

**चतुर्थसर्गस्य विषयसारः-**

विराटराजभवनमासीत् राजन्यवर्गाणां किरीटकोटिभिः उद्भासितम्। तत्रत्यराजसभायां विराटाधिपः सुन्दरे महासने विराजमानः आसीत् यं परिवृत्ताः आसन् नक्षत्ररूपाः बहुरत्नसुसज्जिताः राजपुरुषाः। ब्राह्मणानाम् उदात्तवेदाक्षरस्तुतिभिः चतुर्दिशः प्रकम्पिता आसीत् सा सभा यत्र सदा प्रतिध्वनितः भवति विजयध्वनिः। यस्यां सभायां गीत-वाद्य-नृत्य-शास्त्रादिनिष्णाताः विद्वांसो विराजन्तेतराम्। विराटभवनं सुकण्ठस्वरैः, समस्यायाः परिपूर्तिभिः, नटीनां नूपुरध्वनिभिः रमणीयमासीत्। ईदृशीं सभां कदाचित् छद्मवेशं गृहीत्वा युधिष्ठिरः तत्रागत्य विराटाधीशं वाचनिकेन पदेन नमस्कृत्वा इदमवदत्- 'अहमस्मि कङ्कः'। 'सदैव सेवितुम्' भवतः आश्रये समागतः। मत्स्यनरेशः तस्य सम्भाषणचातुर्येण मुग्धः सन् तं पाण्डवानां मित्रमिति मत्वा काञ्चुकीयं यथोचितसन्मानपूर्वकं राजभवने रक्षणाय आदिदेश। एवं पूर्वपरिकल्पनानुसारम् अन्ये भीमादयः भ्रातरः छद्मनाम्ना विराटपुर्य्यां निवासंचक्रुः। भीमः पाचकबल्लभः, अर्जुनः नपुंसकः बृहन्नला, नकुलः अश्वपशुरक्षकः ग्रन्थिकः, नकुलः गोपालकः, पाञ्चाली प्रसाधिका सैरेन्ध्री चेति रूपं धृत्वा विराटभवनं मण्डितवन्तः। अयमेव प्रवेशाभिधः नाम चतुर्थसर्गस्य विषयसारः।

**पाण्डवविक्रमस्य महाकाव्यत्वम्-**

आलङ्कारिकः विश्वनाथकविराजः तदीये 'साहित्यदर्पणे' उक्तवान् यत् 'सर्गबन्धो महाकाव्यं' अर्थात् महाकाव्यं सर्गयुक्तं भवेत्। 'नातिस्वल्पाः नातिदीर्घाः सर्गाः अष्टाधिका इह' महाकाव्ये सर्गाः नातिस्वल्पाः नातिदीर्घाः वा भवेयुः। सर्गसंख्या अष्टाधिकाः स्युः। सर्वमिदं लक्षणं श्रीजीवन्यायतीर्थस्य पाण्डवविक्रममहाकाव्ये संगच्छते। अस्य महाकाव्यस्य सर्गाः एकपञ्चाशत् (तृतीयसर्गः) श्लोकादारभ्यः शताधिकैः (नवमसर्गः) श्लोकैः समृद्धाः। अतः काव्यमिदं नातिस्वल्पैः श्लोकैः न वा अधिकैः श्लोकैः समृद्धम्। महाकाव्यस्यापरमुपकरणं छन्दः। अस्मिन् महाकाव्ये श्रीवृद्ध्यर्थं सम-अर्धसमविषमच्छन्दसां सुचारुतया प्रयोगः कविना कृतः अस्ति। महाकाव्यस्य सर्गादौ प्रारब्धच्छन्दसः प्रयोगः सर्गान्ते न भविष्यतीति नियमः। अतः महाकाव्यस्यास्य प्रथमः सर्गः उपजातिच्छन्दसा प्रारब्धः एवं द्वितीयसर्गः वसन्ततिलकच्छन्दसा, तृतीयः रथोद्धताछन्दसा, चतुर्थः वंशस्थविलच्छन्दसा च प्रारब्धः। परन्तु सर्गस्यान्तिमश्लोकः शार्दूलविक्रीडितम् छन्दसा रचितः इति। विश्वनाथस्य मते "सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्"। अश्वघोषस्य

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

बुद्धचरितकाव्यस्य संवेगोत्पत्तीति तृतीयसर्गान्ते स्त्रीविघातनेति चतुर्थसर्गस्य संकेतः लभ्यते अथवा कालिदासस्य रघुवंशस्य वशिष्ठाश्रमगमनमिति प्रथमसर्गान्ते नन्दिनीसेवानामकस्य द्वितीयस्य संकेतः प्राप्यते तथैव अस्मिन् काव्ये वनवर्णनमिति तृतीयसर्गान्ते विराटपुरप्रवेशाभिध इति चतुर्थसर्गस्य सूचनं कविना कृतम्। कथानुरूपं महाकाव्यस्य सर्गस्य नाम भवेत्। तदनुसारं न्यायतीर्थमहाशयः प्रत्येकसर्गस्य नामकरणं करोति। तानि च विमर्षः (प्रथमः), गिरिजास्तुतिः (द्वितीयः), वनवर्णनं (तृतीयः), प्रवेशश्च (चतुर्थः)। महाकाव्यस्य विषयः महाभारतमाश्रित्य प्रणीतः। अस्य नायकः युधिष्ठिरः क्षत्रियवंशीयश्च। वीररसः अस्य अङ्गीरसः, शान्तस्तु अङ्गरस इति। "कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा। नामास्य सर्गोपादेयकथया सर्गनाम तु" इति विश्वनाथस्य कथनानुसारं कवेः नामानुसारं, नायकनामानुसारं, विषयमाश्रित्य वा महाकाव्यस्य नाम कर्तव्यम्। पाण्डवविक्रमस्य नामकरणं विषयमाश्रित्य कविना कृतम्। महाकाव्ये प्रासङ्गिकतया सन्ध्या-सूर्य-चन्द्र-रात्रि-प्रदोषमृगया-वनोपवनादीनां वर्णना, दुर्जनस्य निन्दा, सज्जनस्य च प्रशंसा स्थास्यति इति आलङ्कारिकाणां नयः। पाण्डवविक्रमे कविना सर्वे विषयाः एते अनुसृताः। दुर्योधनस्य निन्दा, धौम्यादीनाम् ऋषीणां प्रशंसा महाकाव्ये दृश्यते। अस्य महाकाव्यस्य द्वितीय-तृतीयसर्गौ भिन्नरूपौ। अस्य द्वितीये देवस्तुतिः, तृतीये च अरण्यस्य वर्णनं कृत्वा कविना अभिनवत्वं प्रतिपादितम्। प्रयासोऽयं संस्कृतसाहित्येऽभिनवः।

**महाभारतेन सह पाण्डवविक्रमस्य तुलना-**

अस्मिन् महाकाव्ये महाभारतस्य वनपर्वणः पञ्चदशाधिकत्रिंशदध्यायादारभ्यः विराटपर्वणः द्वादशाध्यायस्य कथाभागाः न्यायतीर्थस्य विद्यावत्ताबाहुल्येन पाण्डवविक्रमे प्रकाशिताः। तत्र महाभारते वर्णितमस्ति यदज्ञातवासस्य प्राक्काले द्युतक्रीडाकालिकं पणं स्मृत्वा युधिष्ठिरः अज्ञातवासान्ते तस्य पुनः राज्यप्राप्तिर्भविष्यति न वेति विचिन्त्य मूर्च्छामाप्नोति। गुरुणा धौम्येन सह भीमादयः अनुजाः तं प्रबोधयन्ति स्म। युधिष्ठिरस्यावस्थां विलोक्य ते द्रौपद्या सह विमर्षं कुर्वन्ति। परन्तु विमर्षनामके प्रथमे सर्गे न्यायतीर्थः दर्शयति यत् द्वैतवनेऽज्ञातवासकाले आत्मपणं विचिन्त्य युधिष्ठिरः सायंकालीनसूर्य इव अवसन्नः भूत्वा धर्मदेवं पाण्डवानां दुर्दिने मार्गदर्शनाय प्रार्थितवान्। सहसा दुर्गममार्गातिक्रमणाय दुर्गां स्मरत्विति आकाशभाषणमश्रुणोत्। महाभारते तु विषयोऽयं नास्ति। विराटपर्वणः प्रथमाध्यायत्रयेषु मन्त्रणाकाले युधिष्ठिरादयः अज्ञातवासकालीनसमययापनार्थं विराटनगर्य्यां कः केन वेशेन गमिष्यतीति व्यासेन प्रदर्शितः। परन्तु पाण्डवविक्रमे अर्जुनः कस्य कीदृशं छद्मवेशः भविष्यतीति सूचयति। अत्र आशीर्वचनं विहाय महाभारतस्य धौम्यस्योपदेशस्याभावः परिलक्ष्यते।

महाभारतस्य विराटपर्वणः षष्ठाध्यायमाश्रित्य कविना द्वितीयसर्गस्य

परिकल्पना कृता। सर्गेऽस्मिन् दुर्गास्तुतिं युधिष्ठिरः पितुर्वचनं श्रुत्वा (पितुर्वचनसंस्मरणेन चित्तं भृङ्गायितं दशभुजाङ्घ्रियुगाम्बुजान्ते- पा.वि.२/२) करोति। महाभारते धर्मनन्दनः स्वयं मनसा देवीदुर्गां स्तौति। महाभारते चतुर्भुजायाः अष्टभुजायाश्च दुर्गायाः स्तुतिरस्ति। परन्तु पाण्डवविक्रमे कविः बङ्गदेशरीतिमनुसृत्य दशभुजां देवीं स्तौति। महाभारते व्यस्तचेतसः युधिष्ठिरस्य चित्तं स्वानुजैः उपदेशैः शान्तं भवति परन्तु पाण्डवविक्रमे देव्याः दुर्गायाः साक्षाद्वचनेन स्थिरचित्तो भवति प्रथमपाण्डवः। श्रीजीवन्यायतीर्थेन आलङ्कारिकाणां सिद्धान्तं नाङ्गीकृत्य नवीनपद्धत्या द्वितीयसर्गस्य तृतीयसर्गस्य च परिकल्पना विहिता। द्वितीयसर्गे दशभुजायाः वन्दना आधारग्रन्थानुरूपा अस्ति। तृतीये कवेः स्वकीयता परिलक्ष्यते। यत्र मातुः दुर्गायाः उपदेशानन्तरं मत्स्यदेशं प्रति गमनकाले पाण्डवाः एकमरण्यं पश्यन्ति। तमरण्यमतिक्रम्य एकस्मिन् श्मशानस्थिते शमीवृक्षे पाण्डवाः शस्त्राणि स्थापयित्वा विराटनगरीं प्रविविशुः। परन्तु मूलग्रन्थे भ्रातरः आत्मसु आलोच्य शत्राणि नीत्वा कालिन्दीमभितो ययुः। ततः ते केन प्रकारेण मत्स्यं प्राप्तवन्तः। यदुक्तं व्यासेन-

"उत्तरेण दशार्णांस्ते पाञ्चालान् दक्षिणेन च।
अन्तरेण यकृल्लोमान् शूरसेनांश्च पाण्डवाः।
लुब्धा ब्रुवाणा मत्स्यस्य विषयं प्राविशन् वनात्"
इति। (म.भा. विराट ५/३-४)

पाण्डवविक्रमे एवं भौगोलिकवर्णनं नावलोक्यते। अस्य महाकाव्यस्य चतुर्थसर्गो विराटपर्वणः सप्तमाध्यायादारभ्य द्वादशाध्यायपर्यन्तम्। विषयस्तु एक एव। उभयत्र पाण्डवाः पत्या सह क्रमेण विराटराजसभां प्रापुः।

**कवेः वैदुष्यम्-**

पाण्डवविक्रमे महाकवेः श्रीजीवन्यायतीर्थस्य सौन्दर्यबोधः, वर्णनानैपुण्यम्, लालित्यम्, शास्त्रीयविषये ज्ञानवैभवञ्च प्रत्यक्ष्यरूपेण परोक्षरूपेण वा परिदृश्यते। कविना मानवजीवनस्य 'चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च' इति नीतिवाक्यमुपस्थापितम्। प्रथमतः न्यायतीर्थेन मानवस्य दुःखतः सुखप्राप्तेरुपायाः उपदिष्टाः। ततः 'यतो धर्मस्ततो जयः' इत्युपदेशः अत्र प्रतिपाद्यते। आधुनिकयुगस्यायं कविः उपमालङ्कारप्रयोगे कालिदासोत्तरसूरीति निश्चयेन वक्तुं शक्यते। अस्मिन् काव्ये सर्वत्र उपमालङ्कारप्रयोगः दृश्यते तद्यथा- "विरेजिरे पञ्चघटा इवोच्चैर्वितानवेदीरचनाप्तशोभा" (१/२६) "अतो भवद्वर्त्मनि वर्त्ततां मे स्वार्थः स्मृतेः श्रौतमते यथैव" (१/५८), "पिप्पलः क्वचिदनल्पवल्कलो धर्मपुत्र इव धर्मसूत्रधृक्" ( पा.वि३/७)। अस्यासीत् अलङ्कारप्रयोगे नैपुण्यम्। ऋताचट्टोपाध्यायमहाभागामते महाकविः काव्यस्यास्य अष्टादशसर्गे अलङ्कारप्रयोगं विश्वनाथमतमनुसृत्य कृतवान्। अत्र शब्दार्थालङ्कारप्रयोगे साहित्यदर्पणस्य क्रमः दृश्यते। साहित्यदर्पणस्य क्रममनुसृत्य एव अस्य सर्गस्य समुदाये ११२-श्लोकेषु द्विनवतिश्लोके अलङ्कारस्य प्रयोगं महाकविः कृतवान्। कवेः अलङ्कारविषये पाण्डित्यस्योदाहरणं -

"राजान्तः पुरराजिताजिरमिलद्राजीवदृग्-योषितां श्रोणीषूज्ज्वलवेणिवद्धमणीषु श्रोणी-लसद्दामसु। मल्लीमाल्यमूल्य-मण्डनमलं धम्मिल्लमूले दधूः। काश्चिद्वा कलमांकुरराणि चिकुरालङ्कारतां चक्रिरे"॥

पद्यमिदं यत्र एकस्य वृत्यनुप्रासालङ्कारस्य भेदः प्रदर्शितः[3]। रघुवंशे कालिदासः दिलीपस्य वर्णना शालवृक्षेण सह उपमिता। अरण्ये गमनकाले विभिन्नैः वृक्षैः सह पाण्डवानां तुलनया कविकालिदासं स्मारयति। वर्णनीयवस्तुना सह वृत्तचयनं कृत्वा छन्दोविषये आत्मनः पाण्डित्यं प्रदर्शितं, पाण्डवविक्रमे इन्द्रवज्राउपेन्द्रवज्रा-वंशस्थविलवसन्ततिलकादीनां बहुविश्रुतच्छन्दसां येन रूपेण प्रयोगं कृतवान् तथा स्वल्पव्यवहृतानां मत्तमयूरमृगेन्द्रमुख-कलहंसमञ्जुभाषिणीभुजङ्ग-प्रयातादीनां छन्दसाम्। पाण्डवविक्रमस्य दशमसर्गे अप्रचलितस्य कलहंसच्छन्दसः प्रयोगः कवेः पाण्डित्यस्य परिचायकः[4]। वेदादिशास्त्रेषु अस्यासीत् वैदुष्यम्। तस्य पाण्डित्यस्य निदर्शनरूपेण अस्माकं पुरतः अस्ति दुर्गास्तुतिमूलकः द्वितीयसर्गः। अस्मिन् सर्गे स वेदवेदान्तादीनां परोक्षप्रयोगं कृतवान्। तन्मते दुर्गा काली तामसी मायामयी। सा श्यामा शान्तरूपा च। सा प्रकृतिपुरुषरूपात्मिका। सा अविनश्वरी, शाश्वती। सा माया उपहितचैतन्यस्वरूपा- "त्वं निष्कलापि सकला शकलादतीता काले च सङ्कलयसि स्वकलांशलोकान्" (२/२६)। महाकवेः देवीस्तुतौ मार्कण्डेयपुराणस्य एकाशित्यादीनामध्यायानां प्रभावः परिलक्ष्यते। ऋग्वेदस्य देवीसूक्तस्य "यं कामये तं तमुग्रं कृणोमि तं ब्रह्मणं तमृषिं तं सुमेधाम् (ऋ १०/१२५/५)' इति वचनं सुचारुतया उपन्यस्तं- 'लीलाच्छलात् कमपि वाञ्छसि वा विरिञ्चिं कर्तुं सुमेधसमृषिं कमपीयुदुग्रम्' (पा.वि.२ /८) इति रूपेण। तस्य पाण्डित्यस्योदाहरणं तृतीयसर्गः। महाभारतस्य "वसन्तो गिरिदुर्गेषु वनदुर्गेषु धन्विनः। विध्यन्तो मृगजातानि महेष्वासा महावलः" (विराट ५/२) इति सामान्यं विषयमुररीकृत्य पाण्डवविक्रमस्य तृतीयसर्गं व्यचरयत्। अनेन श्रीजीवस्यापूर्वकविकल्पनायाः शक्तिः अनुमातुं शक्यते। काव्यमाध्यमेन समाजं प्रति नीतिशिक्षां दातुं कविरासीत् सचेष्टः। तद्यथा "आपतद्व्यसनमोचनाय के पुरुषाः न दधते हि कौशलम्" (पा.वि. ३/४१) अथवा 'पतिर्गतिर्मे पतिसन्निधानं....., ...अतो भवद्वर्त्मनि वर्त्ततां मे" (पा.वि. १/५८)" इत्युपदेशवचनं जनकल्याणायोद्दिष्टम्। कदाचित् जनु ततमित्यादीनामप्रचलितशब्दानां प्रयोगः सर्गचतुष्टये दृश्यते। एवं पाण्डित्यस्य निदर्शनं काव्यस्य यत्र तत्र द्रष्टुं पारयामः। अत्र तु स्थालीपुलकन्यायेन द्वित्राणि उदाहरणानि निदर्शनरूपेण प्रदत्तानि। महाभारतस्य सर्वजनविदितं वृत्तान्तं न्यायतीर्थस्य लेखन्या नवीनं रूपं परिधाय सहृदयस्य हृदयं ह्लादीकरोति इति शम्।

[3] श्रीजीवन्यायतीर्थेर् सारस्वत साधना, पृ ६-७।

[4] तदेव (पृ.८

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

**सहायकग्रन्थसूची-**


- महाभारतम् –गीता प्रेस्, गोरखपुर- २०७०संवत्।
- वैदिक पाठसंकलनम्-दीधिति विश्वास, पश्चिमवङ्गराज्यपाठ्यपुस्तक पर्षद्, कोलकाता- २०१३।
- संस्कृतसाहित्येर इतिहास- धीरेन्द्रनाथ वन्द्योपाध्यायः, पश्चिमवङ्गराज्यपाठ्यपुस्तक पर्षद्,कोलकाता-
- साहित्यदर्पणः सं- शेषराजशर्मा रेग्मी, चौखम्बा कृष्णदास अकादमी,वाराणसी- २०११।
- छन्दोमञ्जरी- ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन,वाराणसी, १९७८।
- मार्कण्डेयपुराण-सं पञ्चानान तर्करत्न, नवभारत पाब्लिशार्स, कोलकाता-९।
- पण्डितश्रीजीवन्यायतीर्थेर सारस्वत साधना- ऋता चट्टोपाध्याय – संस्कृत पुस्तकभाण्डार, कोलकाता- ६,२००१।
- आधुनिकसंस्कृतकाव्यपरम्परा- केशवराव मुसल्गाँवकर- चौखम्बा विद्याभवन, वाराणसी- २००१।
- 20th Century Sanskrit Literature- Rita Chattopadhyay, Sanskrit Sahitya Parisat, 2008।
- आधुनिक संस्कृतनाटक,रामजी उपाध्याय,चौखम्बा विद्याभवन ,वाराणसी।


**ग्रन्थसहायकपत्रिका-**


- अन्वीक्षा (vol.1.part.1, December 1966)-विभागीया शोधपत्रिका, संस्कृतविभागः,यादवपुरविश्वविद्यालयः।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# अध्यासरम्या च रामायणकथा

**डॉ. अरविन्दमहापात्रः**

**सहाचार्यः, संस्कृतविभागः, प्रभातकुमारमहाविद्यालयः**

**काँथि, पूर्वमेदिनीपुरम्, पश्चिमबङ्गः, ७२१४०४**

यद्याशङ्क्यते रामायणोक्ताः खरदूषणरावणशूर्पणखादयः किं नरखादकाः राक्षसा इति विकटजीवा आसन्? समाजस्य सर्वे एव मानवाः निर्द्वन्द्वेन उदात्तकण्ठेन उद्घोषयिष्यन्ति समर्थयिष्यन्ति च यत् आम्। युक्त्या वा विना युक्त्या ते कथयिष्यन्ति यत् रामायणोक्तराक्षसाः विकटजीवाः नरखादकाश्चासन्, नात्र सन्देहः। तदर्थञ्च केचन युक्तिरूपेण मृत्युञ्जयीकीर्त्तिधारि बङ्गप्रदेशस्य सर्वत्र समादृतं महाकविकृत्तिवासस्य रामायणम् उदाहरणरूपेम प्रस्तुवन्ति –

**বিশপাটি দাঁত নিযে রাবণরাজ হাঁসে।**
**অশোক কিংশুক যেন ফুচে ভাদ্রমাসে।**
(কৃত্তিবাসী রামাযণ )

**(विशपाटि दाँत निये रावणराज हाँसे।**

**अशोक किंशुक येन फुटे भाद्रमासे॥)**

**(कृत्तिवासीरामायणम् )**

न चात्र रामायणमतमननुसृतमिति वक्तुं शक्यते इति तेषां मतम्। यतः उत्तरकाण्डस्य अगस्त्यस्य रामचन्द्रं प्रति रावणजन्मवृत्तान्तमुद्धरन्तः वदन्ति यत् रामायणे अस्य समर्थनमपि प्राप्यते –

**दशग्रीवं महाद्रंष्ट्रं नीलीञ्जनचयोपमम्।**

**ताम्रोष्ठं विंशतिभूजं महास्यं दीप्तमूर्ध्वजम्॥** (उत्तरकाण्डम् )

अतः अत्र समुदाहृतवचनद्वयेन प्रमाण्यते यद् राक्षसाः स्वभावधर्मेण एव राक्षसाः, विचित्रजीवा एव। तत्र रावण इति दशाननः दशमस्तकविशिष्ट आसीत्। तस्य भीषणदन्ता आसन्। विंशतिः हस्ताः आसन् तस्य। इत्यादिश्लोकोक्तवर्णनया विकलाङ्गकिम्भूतकिमाकारजीवविशेषः मनुष्य इति न चिन्तनीयम्। अत उपर्युक्तप्रश्नः दृढीभूतः।

तन्न। **दशग्रीवं विंशतिभूजमिति** रावणविषयक-आपातग्राह्यप्रमाणम् उत्तरकाण्डस्य श्लोकादेवोद्धृतादिति। उत्तरकाण्डं न वाल्मीकिप्रणीतमिति, उत्तरवर्त्तिकाले वाल्मीकिरामायणे तस्य प्रक्षिप्तत्वात्। उत्तरकाण्डशब्देन तत् स्वत आक्षिप्यते। उत्तरशब्दस्य अर्थः परवर्ती इति। संस्कृतरामायणस्य सम्यक्तया परिशीलनेन परिलक्ष्यते यत् लङ्काकाण्डानन्तरमेव समग्ररामायणपाठफलं फलश्रुतिश्च परिदृश्यते। ग्रन्थरचनारीत्यनुसारेण अयमेव ग्रन्थपरिसमाप्तेः सूचकः। अतः निःसन्देहेन निश्चीयते यत् वाल्मीकीयरामायणे उत्तरकाण्डं नासीदिति। अतः

वाल्मिकीयरामायणं न सप्तकाण्डविशिष्टम्, अपितु अयोध्याकाण्डतः लङ्काकाण्डान्तं पञ्चकाण्डैः परिसमाप्तमिदं महाकाव्यम्। अतः वाल्मीकीयरामायणस्योपाख्यानेन सह पद्मपुराणे प्रान्तीयभाषया विरचितरामायणादिषु च वर्णितलोकप्रियकल्पितोपाख्यानमनुपममपरूपं च भजते नात्र लेशमात्रसन्देहस्यावसरः।

अपि च सर्वे जानन्ति एव रावणः पौलस्त्यपौत्रः, विश्रवाऋषिपुत्रश्चासीत्। शौर्ये वीर्ये न केवलं स देवदैत्यजयी आसीत्, वेदज्ञश्च। तत्कृतवेदभाष्यस्योपदेशप्रार्थी स्वयं रामचन्द्रः आसीत्। अतः एतादृशपराक्रमशाली ऋषिपुत्रः मनुष्येतरजीवः भवेदिति प्रथमसन्देहः। वास्तवतः स पण्डितोऽपि भयङ्करप्रकृतिविशिष्ट आसीत्। तस्य विक्रमे दशदिक् प्रकम्पिता अभूत् इति हेतोः दशाननेति संज्ञया अभिहित आसीत् – यथा च सिंहः भयङ्करः इति हेतोः पञ्चवदनम्, पञ्चवक्त्रं, पञ्चास्यम् इति संज्ञान्तरैः अभिहितो भवति, न तु सिंहः पञ्चमस्तकविशिष्टः।

मूलरामायणस्य सुन्दरकाण्डे दृश्यते यत- श्रीरामस्य दूतरूपेण महात्मा हनुमान् रात्रौ रावणस्य शयनकक्षे प्रविश्य पश्यति –

**काञ्चनाङ्गदसन्नद्धौ ददर्श स महात्मनः।**
**विक्षिप्तौ राक्षसेन्द्रस्य भूजाविन्द्रध्वजोपमौ** [1] ॥

अत्र **भूजौ इन्द्रध्वजोपमौ** शब्दौ द्विवचनान्तौ। रावणस्य यदि प्रकृतपक्षे विंशतिहस्ताः आसन् , तर्हि अत्र बहुवचनान्तप्रयोगः स्यादेव। अतः निद्रितावस्थायां रावणस्य अन्ये हस्ताः कुत्र आसन्? कदापि तस्य रावणस्य अन्ये हस्ताः नासन्, अतः स्वाभाविकभावेन हनुमान् तस्य रावणस्य हस्तौ एव दृष्टवान्। पुनश्च स हनुमान् दृष्टवान् –

**तस्य राक्षसराजस्य निश्चक्राम महामुखात्।**
**शयानस्य विनिश्वासः पुरयन्निव तद्गृहम्॥**[2]
**मुक्तामणिविचित्रेण काञ्चनेन विराजिता।**
**मुकुटेनापवृत्तेन कुण्लोज्ज्वलिताननम्॥**[3]

अत्र उपर्युक्तश्लोकद्वये **"महामुखात् तथा च आननम्,** इति पदद्वयम् एकचनान्तमेव। अतः प्रमाण्यते यत् राक्षसराजरावणस्य मस्तकम् अस्माकं मस्तकमिव आसीत् नतु संख्यातः दश। अपि चान्यत्र –

**उद्वाहेयं भूजाभ्यान्त मेदिनीमस्वरे स्थितः।**
**आपियेयं समुद्रञ्च मृत्युं हन्यां रणे स्थित**[4]॥

अत्र रावणः कथयति – पश्य सीते! मम हस्तद्वयेन गगनमार्गादिव पृथिवीम् उत्तोलयितुं शक्नोमि, समुद्रं पातुं शक्नोमि, समरे यमराजमपि हन्तुं शक्नोमि। अत्र भूजाभ्यामिति द्विवचनान्तं पदं विद्यते, न तु बहुवचनान्तम्। अत्र स्वबलविक्रमस्य आस्फालनसमये रावणः स्वयमेव स्वीकरोति। अतः यदि तस्य विंशतिहस्ताः आसन् तर्हि कदापि तेन न अस्वीक्रियेत एव। एवञ्च –

**नेमाः शून्या मया वाचः शुष्यमाणेन भाषिताः।**
**न चापि रावणः काञ्चित् मूर्द्ध्ना स्त्रीं प्रणमेत ह**[5]॥

---

[1] सुन्दरकाण्ड-सर्ग.10. श्लोक-15।

[2] सुन्दरकाण्ड-10मसर्गः श्लोक 24।

[3] तत्रैव श्लोक 25।

[4] अरण्यकाण्ड 49 सर्गः।

[5] अरण्यकाण्ड- 55सर्गः 36 श्लोक।

अत्र मूर्द्ध्ना इति तृतीयैकवचनप्रयोगेण प्रमाण्यते यत् रावणस्य एक एव मस्तक आसीत्।

रामायणे प्राप्यते रावणस्य मृत्योरनन्तरं विभीषणः तस्य मृतदेहदर्शनेन विलपन् वदति –

**निक्षिप्य दीर्घौ निश्चेष्टौ भूजावङ्गदभूषितौ।**
**मुकुटेनापवृत्तेन भास्कराकारवर्चसा॥** [6]

अत्र **निश्चेष्टौ भूजावङ्गदभूषितौ** इति द्विवचनान्तप्रयोगेण प्रमाणितं यत् – रावणस्य हस्तद्वयमेवासीत्, नतु विंशतिः हस्ताः। पुनश्च **मुकुटेनापवृत्तेन** इति पदात् एकग्रीवमिति प्रमाणितं न तु दशग्रीवमिति। अपि च रावणस्त्रियः रुरोदन्त्यः विलपन्त्यः वदन्ति-

**बहुमानात् परिष्वज्य काचिद्देहं रुरोद ह।**
**चरणौ काचिदालम्ब्य काचित्कण्ठेऽवलम्ब्य च**[7]**॥**
**उत्क्षिप्य च भूजौ काचिद् भूमौ सुपरिवर्त्तते।**
**हतस्य वदनं दृष्ट्वा काचिन्मोहमुपागमत्** [8]**॥**
**काचिदङ्के शिरः कृत्वा रुरोद मुखमीक्षति।**
**स्नापयन्ती मुखं वाष्पेस्तुषारैरिव पङ्कजम्** [9]॥

रावणस्य स्त्रीणाम् अस्यां वर्णनायां चरणौ- वदनं – शिरः-शब्दादयः प्राप्यन्ते। अन्ते रामायणे प्रधानमहिषीमन्दोदरीमुखेन कविना रावणस्य मुखाकृतिः वर्ण्यते –

**कान्तिश्रीद्युतिभिस्तुल्यमिन्दुपद्मदिवाकरैः।**
**किरीटकुटज्वलितं ताम्रास्यां दीप्तकुण्डलम्**[10]**॥**
**मदव्याकुललोलाक्षं भूत्वा यत् पानभूमिषु।**
**विविधस्रग्धरं चारुवल्कुस्मितकथं शुभम्**[11]**॥**
**तदोवाद्य तवेवं हि वक्त्रं न भाजते प्रभो।**
**रामशायकनिर्भिन्नं वक्त्रं रुधिरविस्रवैः**[12]॥

अत्र एव सहाकविवाल्मीकिः आस्यं, वक्त्रम् इत्यादि-एकवचनान्तपदप्रयोगेण स्पष्टतया प्रतिपादितं यत् रावणस्य मुखं एकमासीदिति।

अतः अत्र एव विचार्यविषयः यत्- कृत्तिवासतुलसीदासपुराणादिवर्णितमतानुसारं रावणस्यावयववर्णनं समुचितम् अथवा महाकविवाल्मीकिना स्वत एव प्रमाणितमिति।

**पद्मपुराण**नाम्ना जैनानाम् एकः ग्रन्थः प्राप्यते। द्विसहस्रवर्षात् प्राक् विमलाचार्येण प्राकृतभाषायां विरचितः। सप्तमशतके रविसेनाचार्येण संस्कृतभाषायाम् अनुवादितः। तत्र रामायणस्य आख्यानं प्राप्यते। जैनमते पद्म इति रामस्य नामान्तरमेव। न च तत्र रावणकुम्भकर्णादिराक्षसाः किम्भूतकिमाकारनरखादकरूपेण चित्रिताः। राक्षस इति पूर्वपुरुषनामानुसारेण गोष्ठ्या संज्ञा। जैनपद्मपुराणानुसारेण राक्षसाः न हिंस्राः, अपि च ते दयावन्तः आसन्[13]। पुनश्च विशाखादत्तस्य **मुद्राराक्षसे** प्राप्यते महाराजनन्दस्य मन्त्रिणः नाम राक्षस इति।

**Journal of The Bihar and Orissa Research Society** इत्यतः प्रकाशितः **History of India from 150 A.D. to 350 A. D.** नामके एकस्मिन् प्रबन्धे

6 लङ्काकाण्ड -3 – 111 सर्गः।
7 लङ्काकाण्डम्- 112सर्गः 8।
8 लङ्काकाण्डम्- 112सर्गः 9 ।
9 लङ्काकाण्डम्- 112सर्गः 10।
10 लङ्काकाण्ड 113 सर्गे श्लोक – 35।
11 लङ्काकाण्ड 113 सर्गे श्लोक – 36।
12 लङ्काकाण्ड 113 सर्गे श्लोक – 37।
13 जैनपद्मपुराणम् –संस्क्तानुवाद-5.375 श्लोक।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

प्रसिद्धैतिहासिकेन काशीप्रसादजयसओयाल-महाभागेन प्रमाणितं यत् कुशाणसाम्राज्यस्य पतनान्तरं गुप्तसाम्राज्यस्य स्थापनात् प्राक् नागेति नाम्ना सुसभ्यजातिः आसीत्। (Inscriptions) मुद्राप्रशस्तिपाठादुद्धृत्य तेन प्रदर्शितं यत् इतिहासप्रसिद्धविदिशानगर्यां भारशिवनाग-भवनाग-नवनाग-वीरसेननाग-हयनाग-त्रयनाग-वर्हिनाग-चर्यनागादिप्रसिद्ध-राजानः राजत्वं कृतवन्तः। अस्मिन् विषये ऐतिहासिकः **Fleet** तस्य Corpus **Inscription Indicarum** नामकप्रामाण्यग्रन्थस्य तृतीयखण्डे (vol iii) सम्यक्तया पर्यालोचितम्। अतः नामानन्तरं नागाद्युपाधिविद्यमानेन न नागादयः सरीसृपजातीयविषधरप्राणिनः।

अत्र तथ्यं तावत् सुसभ्यद्राविडजातिः tolemestic आसीत्। राक्षसवानरनागाः तावत् द्राविडजातिशाखा आसन्। ऋग्वेदपाठात् ज्ञायते –द्राविडानां शाखाद्वयमासीत्-1.अज, 2.सिग्रा इति। वाल्मीकिरामायणे प्राप्यते – परदाराभिगमने अभिलाषः, परधने लिप्सा, वेदाभ्यासः, शङ्करभक्तिश्च राक्षसस्य प्रधानधर्मः। तत्र रामायणे –

**परदाराभिमर्षित्वं परार्थेऽपि च लोलुपाः।**
**स्वाध्यायः त्र्यम्बके भक्तिर्धर्मोऽयं राक्षसाः स्मृताः॥**

अपि च -

**दृष्ट्वा तु विकलान् व्यङ्गानाथान् रोगिणस्तथा।**
**दया न जायते यस्य स रक्ष इति मे मतिः॥**

पुनश्च वानरजातिः यदि मनुष्यतः पृथक् स्यात् तर्हि अशोककानने सीतां प्रति तस्याः कुलविषये हनुमता एवं कथं पृच्छेदिति –

**सुराणामसुराणाञ्च नागगन्दर्वराक्षसाम्।**
**यक्षाणां किन्नराणाञ्च का त्वं भवसि शोभने**[14]॥

तर्हि किं सनातनहिन्दुधर्मोक्ता सीता किं सुरासुरयक्षादिजातिसम्भवा स्यात्? अत्र यक्षशब्दस्य व्युत्पत्तिः भवति **यक्ष्यते पूज्यते इति यक्षः, तथैव रक्षन्त्यस्मादिति रक्षः**। अतः उपर्युक्त-नागादीनां सर्वेषामेव मानवावयवेन सह सादृश्यमासीत्, न वैषम्यम् । वाल्मीकिरामायणे हनुमतः लाङ्गुलवर्णनं दृश्यते यत्, तत्तु समुद्रलङ्घनसमये समायोजनमेव। **समाविध्य च लाङ्गुलं हर्षात् बलमुपेयिवान्**। अतः महाज्ञानी हनुमान् समुद्रलङ्घनाय वैज्ञानिकपद्धत्या गरुडस्य पक्षद्वयमिव स्वस्य लाङ्गूलयोजनं कृतवान्, न तु जन्मनः तस्य लाङ्गूलम् आसीत्। तस्य तल्लाङ्गूलं वायुचालितयन्त्रविशेषः इति युक्तिसङ्गत एव। यतः रामायणे –

**तस्य वानरसिंहस्य प्लवमानस्य सागरम्।**
**पक्षान्तरगतो वायुर्जीमूत इव गच्छति॥**

अस्यार्थः यत् सागरलङ्घनकारिप्लवमानहनुमतः पक्षान्तरगतवायुः मेघ इव गर्जति। अतः तस्य युज्यमानं लाङ्गूलम् इति यत्, तत्तु व्योमयानमिव (Aeroplane) वायुचालितयन्त्रविशेष इति युक्तियुक्तः। तस्मात् कृत्रिमलाङ्गूलत्वादेव तल्लाङ्गूलेन लङ्कादहनं सम्भवम्।

इन्द्रपुत्रो बाली, सूर्यपुत्रसुग्रीवः, पवनपुत्रहनुमान् चेत्यादयः यदि वन्याः स्युः तर्हि

[14] रामा. सुन्दरकाण्ड-तृताय 5म श्लोक।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

एते इन्द्रादयः देवाः किं वानरीरूपजायाभिः सह सहवासं कृतवन्तः? पुनश्च विश्वकर्मापुत्रो नलः समुद्रे सेतुनिर्माणे यस्याः पूर्त्तविद्यायाः प्रमाणं स्थापितवान्, स किं वन्यवानरः भवितुम् अर्हेत्? अद्यतनचिकित्साविज्ञानस्य उन्नतिः परिलक्ष्यते, परन्तु मृतमानवस्य संजीवनं श्रेष्ठवैज्ञानिका अपि आविष्कर्त्तुं न सक्ताः। सुषेणस्तु मृतसंजीवनीविद्यया तत् कृतवान्। अतः चिकित्साशास्त्रविशारदः सुषेणः वन्यवानरः स्यादित्यत्र कः विश्वासः?[15]

तदा वन्यवानरा अपि आसन्निति रामायणेन प्रमाण्यते। औषधिसंग्रहसमये समुद्रलङ्घनार्थं हनुमता त्रिकुटतः लम्फनेन तत्पर्वतस्था वृक्षाः भग्नाः जाताः, प्रस्तराः सकलाः विकीर्णाः संजाताः, विघुर्णितपर्वतस्थवानराः तत्र स्थातुमशक्ताः-

**तस्मिन् सम्पीड्यमाने तु भग्नद्रूमशिलातले।**
**न शेकुर्वानराः स्थातुं घूर्णमाने नगोत्तमे॥**
**स वृक्षखण्डांस्तरसा जहार।**
**शैलान् शिला प्राकृतवानरांश्च**[16]॥

वाल्मीकिरामायणे तेषां विद्या-ज्ञान-शिल्पकला-अलङ्कारप्रसाधनादि दृष्ट्वापि कथं वा ज्ञानिगुणिशास्त्रविशारदाः ते वन्यवानरा इति स्वीकुर्वन्त्यत्यत्र महान्खेदः। सुग्रीवबालीप्रभृतीनां विलासव्यसनसमृद्धि-ऐश्वर्य-अभिजातादीनां परिचयः प्राप्यते –

**वानरेन्द्रगृहं रम्यं महेन्द्रसदनोपमम्।**
**स सप्तकक्ष्या धर्मात्मा यानासनसमावृत्ताः।**
**ददर्श सुमहद् गुप्तं ददर्शान्तःपुरं महत्**[17]॥

अन्ते कथयामः तेषां शवसत्कारप्रेतकार्यशिक्षासंस्कृतिस्थापत्य-भास्कर्यादिसकलान् दृष्ट्वा सूक्ष्मतया विचारेण ज्ञायते यत् ते न सलाङ्गुलवन्यवानरा इति। सम्यग्विचारेण समापतति यत् यदि ते वन्यवानरा स्युः, तर्हि क्रमविवर्त्तनानुसारेण (Theory of Evolution) अद्यतनवानरश्रेणीमध्ये तत्सकलं प्राप्येत एव। महाभारते च एते न वानरा इति विषये युक्तिः प्राप्यते –

**राक्षसाश्च पुलस्त्यस्य वानराः किन्नरास्तथा।**
**यक्षाश्च मनुज व्याघ्र! पुत्रास्तस्य च धीमतः**[18]॥

अर्थात् हे मनुजव्याघ, महाराजजनमेजय! राक्षसवानर-किन्नर-यक्षसकलमहाज्ञानिपुलस्त्य-पुत्र! पुलस्त्य-ऋषिपुत्र वानरः न वानरमुखः वन्यजन्तुः अपि च मनुष्याकृतिः स्यात्। यच्च मुर्खस्याप्ययं बोधः स्यात् इति शम् ॥

ଓଃ୭ଛଃଓ

[15] लङ्काकाण्ड -74 39।

[16] लङ्काकाण्ड – 74 – 46।

[17] किष्किन्दाकाण्ड – 33- 19।

[18] महा. भा.- आदिपर्व- सप्तमाध्यायः-66।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# गौडीयसंस्कृतसाहित्ये चम्पूकाव्यस्य उद्भवः विकासश्च

**चन्दनमहान्ती**

**शोधच्छात्रः, श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः**

**कालडी, एरणाकुलामः, केरलः**

**प्रबन्धसारः**

*गौडीयसंस्कृतसाहित्यं युगत्रयेण एव सीमाबद्धं तत्तु प्राक्-चैतन्ययुगं, चैतन्ययुगं, चैतन्यपरवर्तियुगं च। तत्रैव त्रयोदशशतकस्य परार्धतः वर्तमानसमयं यावत् ग्रन्थरचना जाता। युगत्रयेण दर्शनं, काव्यं, नाटकं, रसग्रन्थादि, स्मृतिः, पदाबली, चरिताबली, भाष्यटीकादीनि च ग्रन्थाः परिलक्ष्यन्ते। परन्तु अत्रैव चम्पूकाव्यस्य उद्भवः विकासश्च काव्यत्रयेण भूयते। यथा चैतन्ययुगे षड्गोस्वामिषु प्रसिद्धः श्रीजीवगोस्वामिपादः तत्कृता 'गोपालचम्पूः', श्रीगौराङ्गमहाप्रभुना दत्तेन उपाधिना भूषितः श्रीकविकर्णपूरः तत्कृता 'श्री-आनन्दवृन्दावनचम्पूः', चैतन्योत्तरीययुगे श्रीनित्यानन्दवंशीयः श्रीलरघुनन्दनगोस्वामिपादकृता 'श्रीगौराङ्गचम्पूः' चेति। श्रीगोपालचम्पूकाव्यं भागद्वयेन रचितम्। तत्तु पूर्वचम्पूः (३३) उत्तरचम्पूः(३७) चेति। मुख्यतः काव्येऽस्मिन् श्रीकृष्णचरितम् आलोचितं श्रीकृष्णसन्दर्भस्य सारस्वरूपम्। पूर्वचम्पूमध्ये मूलतः वर्णिताः विषयाः – गोलकलीला, बाल्यलीला, कौशोरलीला च। पुनश्च उत्तरचम्पूमध्ये वर्णिताः विषयाः – व्रजे उद्धवस्य आगमने आनन्दः, बलदेवस्य आगमने आनन्दः, श्रीकृष्णस्य आगमने आनन्दश्चेति। गोपालचम्पूकाव्यस्य रचनाया अनन्तरं २२ स्तवकेन श्रीमद्भागवतस्य दशमस्कन्धस्य श्रीकृष्णचरितस्य साररूपेण कर्णपूरेण श्री-आनन्दवृन्दावनचम्पूकाव्यं रचितम्। तत्र मुख्यतः प्रथमस्तवके श्रीवृन्दावनस्य वर्णनं, द्वितीयस्तवकात् सप्तमस्तवकं यावत् श्रीकृष्णस्य बाल्यलीला, अष्टमस्तवकात् काव्यस्य परिसमाप्तिं यावत् कैशोरलीला चेति विषयाः वर्णिताः सन्ति। पुनश्च चैतन्योत्तरीये युगे ३२ आस्वादेन श्रीनवद्वीपचन्द्रस्य श्रीगौराङ्गस्य नवद्वीपलीलायाः वर्णना कृता श्रीगौराङ्गचम्पूकाव्ये श्रीलरघुनन्दनगोस्वामिपादेन। तत्रैव मुख्यतः वर्णिताः विषयाः तु – श्रीगौराङ्गस्य बाल्यलीला, पौगण्डलीला, कैशोरलीला च। गौडीयसंस्कृतसाहित्ये काव्यत्रयस्य अपरिसीमा भूमिका अस्ति। एभ्यः काव्येभ्यः दर्शनशास्त्रस्य ज्ञानम्, अलङ्कारशास्त्रस्य ज्ञानं, भक्तिलाभश्च इति भवति। कवीनां पाण्डित्यस्य प्रदर्शने अपि चम्पूकाव्यस्य चमत्कारित्वं गुणस्य अनुधावनं क्रियते। सहृदयगणः ग्रन्थपाठे रसस्य आस्वादनं करोति इति न सन्देहः।*

**भूमिका –** काव्यं द्विविधं दृश्यं श्रव्यञ्च। 'दृश्यमेव अभिनेयम्'[1]। श्रव्यकाव्यं साधारणतः श्रोतव्यमात्रम्। अस्मिन् काव्यभेदे एव महाकाव्यं, मुक्तककाव्यं, कोषकाव्यं, खण्डकाव्यं, गीतिकाव्यम् इतोऽपि चम्पूकाव्यजातीयं मिश्रकाव्यञ्चेति परिदृश्यन्ते। काव्यादर्शकारः आचार्यदण्डी स्वस्य ग्रन्थे आह – श्रव्यकाव्यं त्रिविधं –'पद्यं गद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम्'[2]। अस्यां श्रेण्यां चम्पूः, विरुद्, करभकादीनि काव्यानि लक्ष्यन्ते। चम्पूकाव्यस्य लक्षणनिरूपणावसरे आलङ्कारिकैः लक्षणम् उक्तम्। तत्र सर्वादौ आचार्यः दण्डी आह तस्य ग्रन्थे – 'गद्यपद्यमयी काचित् चम्पूरित्यभिधीयते'[3]। अर्थात्, गद्यं पद्यञ्च मिश्रितं काव्यमेव चम्पूः। यत्र अस्याः

[1] साहित्यदर्पणः ६/१

[2] काव्यादर्शः १/११

[3] काव्यादर्शः १/३१

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

सूत्रपातः वैदिककालात् यथा यजुर्वेदे। काव्यग्रन्थरूपेण त्रिविक्रमभट्टकृते नलचम्पूकाव्ये। अनन्तरं तदानुसारेण चम्पूरामायणादीनि चम्पूकाव्यानि।

**चम्पूकाव्यस्य स्वरूपम् -** यदि प्रश्नो भवति, 'चम्पू' इति पदस्य कोऽर्थः? उत्तरस्तु – चम्प शब्दस्य व्युत्पत्तिः चुरादिगणीयः 'चपि गतौ' धातुना सह उ" इत्यनेन प्रत्ययेन चम्पयति चम्पति इति वा अर्थो भवति। परन्तु अनेन प्रकारेण चम्पू इति पदं चम्पूकाव्यम् एतादृशार्थं न प्रकाशयति। एवं विग्रहे चम्पूकाव्यस्य चत्वारः अर्थास्तु गतेः गमनं, ज्ञानं, मोक्षः, प्राप्तिश्चेति। पुनश्च, साहित्यदर्पणस्य कुसुमप्रतिमाटीकाकारः हरिदाससिद्धान्तवागीश-महाभागः स्वस्य टीकायाम् आह – 'चमत्कृत्ये पुनाति सहृदयान् विस्मितीकृत्य प्रसादयीति चम्पूः पृषोदरादित्वात् साधुः'[4]। अर्थात् चमत्कारित्वसृष्ट्या सहृदयगणस्य मनसः प्रसादनं कृत्वा चमत्कृतं करोति। अतः, वास्तवे चमत्कारिता एव चम्पूकाव्यानां प्रधाना। तत्रैव उक्तिवक्रता, शब्दक्रीडा च परिलक्ष्यते। विविधानि चम्पूकाव्यानि अनुशील्य ज्ञानमिदं भवति यदा रसस्य औचित्यस्य च अपेक्षायां पाण्डित्यप्रदर्शनम् अत्रैव प्रधानम्।

**गौडीयसंस्कृतसाहित्यस्य परिचयः –**

गौडीयसंस्कृतसाहित्यस्य सूत्रपातः प्रायशः सप्तमशतकात् प्रागेव परन्तु श्रीकृष्णचैतन्यमहाप्रभोराविर्भावस्य परं तस्य प्रकाशः प्रभावश्च अतुलनीयः। विशेषतः, गौडीयवैष्णवसाहित्यं चैतन्यमहाप्रभुमाधारीकृत्य युगत्रयेण विभज्यते। यथा –

१) प्राक्-चैतन्ययुगः (१३५३-१५०० ख्रिष्टाब्दः)
२) चैतन्ययुगः (१५०१-१६०० ख्रिष्टाब्दः)
३) चैतन्यपरवर्तियुगः (१६०१-१६०० ख्रिष्टाब्दः)

प्राक्-चैतन्ययुगे रचितानि काव्यानि यथा – ब्रह्मसंहिता, श्रीजयदेवकृतं गीतगोविन्दं, श्रीविल्वमङ्गलं, श्रीकृष्णकर्णामृतं, श्रीवोपदेवकृतं मुक्ताफलं, श्रीविष्णुपुरिकृता श्रीविष्णुभक्ति-रत्नावली, श्रीधरस्वामीकृता भागवतटीका, श्रीलक्ष्मीधरकृता भगवन्नामकौमुदी, श्री-ईश्वरपुरीकृतं श्रीकृष्णलीलामृतं चेत्यादयः ग्रन्थाः। मूलतः काव्यरूपेण गीतगोविन्दमेव रचितमासीत्, परन्तु युगेऽस्मिन् चम्पूकाव्यम् अप्राप्तम्।

चैतन्ययुगे नवद्वीपचन्द्रस्य आविर्भावे बहुभिः विभागैः काव्यशास्त्राणि रचितानि यथा – दर्शनं, काव्यं, नाटकं, रसग्रन्थादि, स्मृतिः, पदावली, चरितावली, भाष्यटीकादीनि च। तस्मिन् समये काव्यानि यथा – श्रीपादरूपगोस्वामिकृतं हंसदूतं दूतकाव्यं, श्रीपादरघुनाथगोस्वामिकृतं मुक्ताचरित्रं काव्यं, श्रीकविकर्णपूरकृतं श्रीकृष्णाह्निककौमुदी लीलाकाव्यं, श्रीपादकृष्णदासकविराज-गोस्वामिकृतं श्रीश्रीगोविन्दलीलामृतं महाकाव्यं, श्रीकविकर्णपुरकृतं श्रीचैतन्यचरितं महाकाव्यं, श्रीपादश्रीजीवगोस्वामिकृतं श्रीमाधवमहोत्सवं महाकाव्यं, श्रीगोविन्ददेवकृतं श्रीगौरकृष्णोदयं महाकाव्यं, श्रीपादं प्रबोधचन्द्रसरस्वतिकृतं श्रीराधारससुधानिधिखण्डकाव्यं, श्रीकविकर्णपूर-कृतम् आर्य्याशतकं शतककाव्यं, श्रीपादप्रबोधचन्द्रसरस्वतिकृतं श्रीश्रीवृन्दावन-महिमामृतं, श्रीश्रीनवद्वीपशतकं च शतककाव्यद्वयं,

---
[4] साहित्यदर्पणस्य हरिदाससिद्धान्तवागीशकृता टीका

श्रीसार्वभौमकृतं श्रीचैतन्यशतकं शतककाव्यं, श्रीपादप्रवोधचन्द्रसरस्वतिकृतं सङ्गीतमाधवं गीतिकाव्यं, श्रीरूपगोस्वामिपादकृता श्रीगोविन्दविरूदावली विरूदावली, श्रीजीवगोस्वामिपादकृता श्रीगोपालविरूदावली प्रभृतीनि काव्यानि उपलभ्यन्ते। युगेऽस्मिन् चम्पूकाव्यद्वयं प्राप्यते यथा – श्रीजीवगोस्वामिपादकृता 'श्रीगोपालचम्पूः', श्रीकविकर्णपूरकृता 'आनन्दवृन्दावनचम्पूः' च इति।

चैतन्यपरवर्तियुगे साहित्यस्य वैचित्र्यमपि दर्शनीयम् आसीत्, वर्तमाने अपि यस्य कार्यं प्रचलति। वृन्दावने नवद्वीपे च बहवः पण्डिताः ग्रन्थान् रचयन्ति। युगेऽस्मिन् रचनाः यथा – श्रीमद्-विश्वनाथचक्रवर्तिकृतं श्रीकृष्णभावनामृतं महाकाव्यं, श्रीमद्-विश्वनाथचक्रवर्तिकृतं श्रीचमत्कारचन्द्रिका खण्डकाव्यं, तद्कृतं श्रीव्रजरीतिचिन्तामणिः, संकल्पकल्पद्रुमश्चेति खण्डकाव्यद्वयं, श्रीमद्-रसिकानन्दप्रभुपाद-कृतं श्रीश्यामानन्दशतकं शतककाव्यं, श्रीमद्-विश्वनाथचक्रवर्तिकृतं श्रीसुरतकथामृतं शतककाव्यं, श्रीमद्-विश्वनाथचक्रवर्तिकृतं श्रीसङ्गीतमाधवं गीतिकाव्यं, श्रीमद्-विश्वनाथचक्रवर्तिकृता श्रीनिकुञ्जकेलिविरूदावली, रघुनन्दन-गोस्वामिपादकृता श्रीगौराङ्गविरूदावली चेत्यादीनि काव्यानि। युगेऽस्मिन् रघुनन्दन-गोस्वामिपादकृता एका चम्पूः प्राप्यते, यस्याः नाम 'श्रीगौराङ्गचम्पूः'।

युगत्रयेण गौडीयसंस्कृतसाहित्ये चम्पूकाव्यत्रयमेव प्राप्यते यथा – चैतन्ययुगे श्रीजीवगोस्वामिपादकृता गोपालचम्पूः, श्रीकविकर्णपूरकृता आनन्दवृन्दावनचम्पूः, इतोऽपि चैतन्यपरवर्तियुगे श्रीलरघुनन्दनगोस्वामिपादकृता श्रीगौराङ्गचम्पूः। अधोस्तनेषु समयानुक्रमेण आलोचनां करोम्यहम्।

**श्रीगोपालचम्पूः –** चैतन्ययुगीयः षड्गोस्वामिषु श्रीजीवगोस्वामिपादः अस्य काव्यस्य रचयिता। गौडीयसंस्कृतसाहित्ये चम्पूकाव्यस्य उद्भवः 'गोपालचम्पूः' इत्यनेन काव्येन परिलक्ष्यते। यदि गोस्वामिपादस्य समयकालविषये वदाम्यहं तर्हि उच्यते यत् तस्य समयः आसीत् १५३२-खिष्टाब्दः। तस्य असंख्यैः काव्यैः वैष्णवसाहित्यम् अद्य समृद्धम्। तेषु ग्रन्थेषु गोपालचम्पूः एका सुविशाला चम्पूः, तस्याः भागद्वयं परिलक्ष्यते। यथा – पूर्वचम्पूः, उत्तरचम्पूः चेति। पूर्वचम्पूकाव्यस्य रचनासमय आसीत् – १५३० शकाब्दः। एवञ्च उत्तरचम्पूकाव्यस्य रचनासमय आसीत् १५३४ शकाब्दः। पूर्वचम्पूकाव्यस्य वत्सरचतुष्टयाद् अनन्तरम् उत्तरचम्पूकाव्यस्य रचना अभवत्। काव्यस्य विषयवस्तु वृन्दावनचन्द्रस्य श्रीकृष्णस्य बाल्यलीला। या गोस्वामिपादैः पूर्वचम्पूकाव्ये ३३-पूरणैः रचिता, उत्तरचम्पूकाव्ये ३७-पूरणैः रचिता च। अत्र ग्रन्थस्य अध्यायः पूरण इत्युच्यते। पूर्वचम्पूकाव्ये वर्णिताः विषयाः पूरणक्रमेण अधो लिखिताः। यथा – १) गोलकरूपनिरूपणं, २) गोलकविलासः विकासनञ्च, ३) श्रीकृष्णजन्मनः मधुकण्ठस्य स्निग्धकण्ठस्य च संलापारम्भः, ४) जन्मोत्सवः, ५) पूतनावधः, ६) शकटभञ्जनादि, ७) तृणावर्त्तवधः मृद्भक्षणलीला च, ८) दामबन्धनं यमलार्ज्जुनमोचनञ्च, ९) गोपीगण-

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

सहितश्रीकृष्णबलरामयोः श्रीवृन्दावने प्रवेशः, १०) विविधबाल्यलीला वत्सासुरवधश्च, ११) अघासुरवधः ब्रह्ममोहनलीला च, १२) गोचारणलीला, १३) कालियदमनं दावानलपानञ्च, १४) गर्दभासुरवधः, १५) श्रीराधाकृष्णयोः पूर्वरागः १६) प्रलम्बासुरवधः दावानलनिवर्त्तनञ्च, १७) वंशीशिक्षया श्रीकृष्णस्य प्रेयसीभिक्षा, १८) इन्द्रयज्ञभङ्गः श्रीगिरिराजपूजाप्रवर्त्तनञ्च, १९) इन्द्रस्य इन्द्रत्वस्तम्भनपूर्वकं श्रीकृष्णस्य गोविन्दपदप्राप्तिः, २०) श्रीनन्दमहाराजस्य वरुणलोकगमनं श्रीगोलकदर्शनञ्च, २१) गोपीगणस्य वस्त्रहरणं, २२) यज्ञपत्नीनिकषा अन्नभिक्षा, २३) श्रीरासलीलारम्भः, प्रथमसङ्गजनित-वाकोवाक्यं सङ्गीतादि च, २४) श्रीकृष्णस्य अन्तर्धानं श्रीराधायाः सौभाग्यवर्णनञ्च, २५) गोपीनां विप्रलम्भः तदनन्तरं श्रीकृष्णप्राप्तिः, २६) श्रीरासरसविस्तारः, २७) जलकेलि, वनभ्रमणं रासलीलापूर्त्तिश्च, २८) अम्बिकावनगमनं विद्याधरस्य शापमोचनञ्च, २९) रहोविलासवर्णनं, ३०) शङ्खचूडवधः होरिलीला च, ३१) वृषासुरनिधनं कुण्डद्वयस्य प्रकाशः विविधविचित्रलीला च, ३२) केशिवधः, ३३) श्रीकृष्णकर्तृका तद्भक्तगणस्य सर्वमनःपूर्त्तिश्चेति।

तादृशा उत्तरचम्पूकाव्ये वर्णिताः विषयाः। यथा – १) व्रजवासिनाम् अनुरागसागरविस्तारः, २) अक्रूरस्य आगमने गोपीविलापः, ३) मथुरागमनं, ४) मथुराप्रवेशः, ५) हस्तिमल्लादिवधः कंसनिधनञ्च, ६) श्रीनन्दविदाय, ७) व्रजराजस्य व्रजप्रवेशः, ८) श्रीरामकृष्णस्य अध्ययनलीला, ९) यमालयात् गुरुपुत्रानयनम्, १०) उद्धवस्य व्रजागमनं, ११) भ्रमरगीतं, १२) उद्धवस्य मुखे व्रजवार्त्ता श्रवणे श्रीकृष्णस्य तुष्टिः, १३) जरासन्धबन्धनं, १४) कालयवनः जरासन्धजयश्च, १५) श्रीबलरामस्य विवाहः, १६) श्रीकृष्णस्य रुक्मिणी-परिणयः, १७) सत्यभामादि-सप्तकन्याविवाहः, १८) नरकवधः पारिजातहरणं षोडश-सहस्रकन्यानां पाणिग्रहणञ्च, १९) महादेवविजयः वाणासुरयुद्धञ्च, २०) श्रीबलदेवस्य व्रजगमनं, २१) पौण्ड्रकादिसहितश्रीकृष्णस्य युद्धवार्त्ताश्रवणार्थं बलदेवस्य द्वारकागमनञ्च, २२) द्विविदवधः, २३) कुरुक्षेत्रयात्रा, २४) तत्र मेलनानन्तरं व्रजवासिनां पुनः व्रजे आगमनञ्च, २५) उद्धवस्य मन्त्रणा, २६) जरासन्धकर्तृकम् आबहद्धानां नृपाणां मोचनं, २७) राजसूययज्ञः शिशुपालवधश्च, २८) शाल्ववधः, २९) श्रीपौर्णमासि-कर्तृकं गोपीनां बाधा-समाधानञ्च, ३२) विवाह-प्रसङ्गः, ३३) श्रीराधामाधवस्य अधिवासमहोत्सवः, ३४) अलङ्कारपरिधानं, ३५) गोष्ठमध्ये शुभविवाहः, ३६) श्रीकृष्णराधयोः गोपीभिः सह परस्परं मिलनादि च, ३७) सुखपूर्वकं गोलोके प्रवेशश्चेति। विशेषरूपेण श्रीकृष्णचरित्रस्य वर्णनाय पूर्वचम्पूकाव्ये वर्णनत्रयम् अस्ति, यथा – १) गोलकलीला, २) बाल्यलीला, ३) कैशोरलीला च। पुनश्च उत्तरचम्पूकाव्ये तद्वत् वर्णनत्रयम् अस्ति। तत्तु १) व्रजे उद्धवस्य आगमने आनन्दः, २) बलदेवस्य आगमने आनन्दः, ३) श्रीकृष्णस्य आगमने आनन्दश्च इति। मुख्यतः काव्येऽस्मिन् पूर्वम् उत्तरभागे च श्रीकृष्णस्य वृन्दावनलीला एव वर्णिता। गोस्वामिपादेन अत्र षड्सन्दर्भेषु कृष्णसन्दर्भस्य तत्त्वमाला काव्यरूपेण रचिता।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

अर्थात्, वैष्णवदर्शनस्य गूढतत्त्वमेव अत्र गद्येन पद्येन च सुरचितम्। सहृदयगणः काव्यपाठेन दर्शनशास्त्रस्य ज्ञानं लभते। तत्तु परिष्कृतं मङ्गलश्लोके सूचनाश्लोके च –

"श्रीकृष्ण कृष्णचैतन्य ससनातनरूपक।
गोपाल रघुनाथाप्त व्रजवल्लभः पाहि माम्"[5]॥
"यन्मया कृष्णसन्दर्भे सिद्धान्तामृतभाषितम्।
तदेव रस्यते काव्यकृतिप्रज्ञातरसज्ञया॥
सोऽहं काव्यस्य लक्ष्येण मनो निर्मानि तादृशम्।
तन्महान्तो यदीक्षेरं स्तदा हेम्नि वितो मणिः"[6]॥

तत्रैव दर्शनशास्त्रस्य प्रभावः सदा वर्तते। तथाहि ग्रन्थकारेण एव वर्णितम् उत्तरचम्पूकाव्ये – 'यत्तु मध्ये मायया प्रत्यायितमौपपत्यं तत् खलु अवास्तवत्वात् परस्तादवध्वस्तमिति[7]' अर्थात्, श्रीकृष्णस्य अवतारकाले मायाकर्तृका या उपपतिभावस्य प्रतीतिः सा मिथ्या इति परं प्रतिपादितं भविष्यति। अत्रैव ग्रन्थकारेण प्रायशः प्रकटसम्पर्कीयः लीलाविनोदः कृतः। पुनश्च, ग्रन्थारम्भे प्रोक्तम् 'प्रकटाप्रकटप्रकाशमयस्य वृन्दावनस्य बहुविध-संस्थानतया बहुविध-शास्त्र-श्रुतस्याप्रकट-प्रकाश-मयवैभवविशेष एव सम्प्रति वर्णनीयः, स च गोकुलप्रधान एवेति'[8]। अर्थात् अत्रैव प्रकटलीला अप्रकटलीला च मिश्रिता भूत्वा वर्णिता भवति। वस्तुतः गोस्वामिपादेन श्रीमद्भागवतादिशास्त्रादीनां प्रकटलीलया सह ब्रह्मसंहितादीनाञ्च अप्रकटलीलया सह समावेशो विहितः। अस्य ग्रन्थस्य विषये श्रीपादकृष्णदासः कविराजगोस्वामी आह तस्य ग्रन्थे –

*"श्रीगोपाल-चम्पू नामे ग्रन्थ महाशूर।*
*नित्यलीला-स्थापन याहे व्रजरसपूर"[9]॥*

अर्थात्, 'नित्यलीला' इत्युक्ते अप्रकटलीला 'व्रजरसपूर' इत्युक्ते गोकुललीलाम् अवबोधयति ग्रन्थकारः।

ग्रन्थोऽयं सुविशालः अस्य भाषा अपि कठिना, समासबहुला च। तथापि अस्य ग्रन्थस्य कापि प्राचीना टीका नास्ति। परन्तु १८०० शताब्दस्य पश्चिमबङ्गप्रदेशस्य वर्धमानस्य माण्डग्रामस्य अधिवासी नित्यानन्दवंशवतंसः श्रीयुक्तवीरचन्द्रगोस्वामिना कृता 'शब्दार्थबोधिका' चूर्णिका प्राप्यते। चूर्णिका ग्रन्थपाठे सहृदयगणस्य सहायिका भवति, परन्तु मूलसारस्य बोधने सा चूर्णिका न युक्तियुक्ता सुखजनिका च।

**आनन्दवृन्दावनचम्पूः –** कृष्णलीलावर्णनार्थं १५२५ शकाब्दे शिवानन्दसूतः अविभक्तबङ्गप्रदेशस्य नैहाट्याः महाप्रभोः पार्षदसमः ख्यातमानः अस्मभ्यम् एकं चमत्कारपूर्णं काव्यं उपहाररूपेण ददौ। तैः व्रजगोपीगणस्य कर्णभूषणस्य वर्णनं कृतमासीत् इति हेतोः श्रीमन्महाप्रभुचरणैः ते कर्णपूरः नाम्ना भूषिताः। परवर्तिसमये ते कविकर्णपूरः नाम्ना गौडीयसंस्कृतसाहित्ये अधिकाधिकानि काव्यानि विरच्य साहित्यं समृद्धं चक्रुः। आनन्दवृन्दावनचम्पूकाव्यं श्रीजीवपादकृतं गोपालचम्पूवत् एकः सुविशालः ग्रन्थः। अत्रैव कविकर्णपूरः वृन्दावनचन्द्रस्य श्रीकृष्णस्य २२-

[5] गोपालचम्पूः १/१/१

[6] गोपालचम्पूः १/१/४-५

[7] गोपालचम्पूः २/३१/३२

[8] गोपालचम्पूः १

[9] चैतन्यचरितामृत २/१/४४

स्तवकैः नन्दोत्सवात् रासलीलां यावत् समग्रलीलां काव्यरूपतया प्रदत्तवान्। अत्रैव काव्यस्य अध्यायः स्तवक इति कथ्यते। मूलतः प्रथमस्तवके श्रीवृन्दावनवर्णनं, द्वितीयस्तवकात् सप्तमस्तवकं यावत् बाल्यलीला, अष्टमस्तवकात् काव्यस्य परिसमाप्तिं यावत् कैशोरलीलां कविः श्रीकर्णपूरः प्रकाशयति। ते तु क्रमानुसारेण यथा - प्रथमस्तवके – श्रीकविकर्णपूरः श्रीवृन्दावनस्य अतिमर्त्त्यः शोभावृद्धिः, वर्षाहर्षादिषड्विभागाः, यमुना, लतामन्दिरमण्डलः, गोवर्द्धनः, नन्दीश्वरः, श्रीनन्दयशोदा, श्रीकृष्णवयस्यगणः, गोपीगणः, श्रीराधा, चन्द्रावल्यादिः चेत्यादीनां यथार्थं विवरणं कृतवान्। द्वितीयस्तवके – शुभक्षणे श्रीदेवकीं यशोदां निकषा च मथुरायां वृन्दावने च वासुदेवस्य गोविन्दस्वरूपेण आविर्भावः, सूतिकारागारस्य शोभा, नन्दोत्सवश्च इति वर्ण्यते। तृतीयस्तवके – पूतनावधः, मातुः यशोदायाः निदारुणं क्रन्दनं, मथुरातः श्रीनन्दस्य आगमनं चेत्यादीनां विवरणम्। चतुर्थस्तवके – शकटासुरः, तृणावर्त्तमिलनादिः चेत्यादीनां विवृतिः। पञ्चमस्तवके – जृम्भणं, रिङ्गणं, नामकरणं, माखनचौर्य्यम्, मृत्तिकाभोजनं, विश्वरूपदर्शनादि च वर्ण्यते। षष्ठस्तवके – भाण्ड-भञ्जनं, दामबन्धनं, यमलार्जुनमोचनं, फलक्रयः, वृन्दावने गमनादिः च वर्ण्यते। सप्तमस्तवके – वत्सः, अघ-वकासुरवधश्च, पुलिनभोजनं, ब्रह्मणः मोहः, स्तवादि च वर्ण्यते। अष्टमस्तवके – श्रीकृष्णस्य पौगण्डस्य कैशोरलीलायाः च युगपत् आविर्भावः, श्रीकृष्णस्य गुरुगण-प्रेयसीगणकर्तृकं युगपत् लीलायाः आस्वादनप्रकाराः, व्रजबालानां पूर्वरागः, श्रीकृष्णजन्मयात्रोत्सवः, कन्दुकक्रीडा धेनुकवधादि च वर्ण्यन्ते। नवमस्तवके – कालियदमनं प्रतिपाद्यते। दशमस्तवके – श्रीराधया श्रीकृष्णग्रथितस्य पुष्पमाल्यस्य प्राप्तिः, श्रीराधया पाचितानाम् अन्नभोजनादीनां श्रीकृष्णेन आस्वादनस्य वर्णनं प्राप्यते। एकादशस्तवके – प्रलम्वबधः, दावाग्निमोचनं, सायाह्नकाले अभिसारः, सुखविलासः, परस्परं वाकोवाक्यं, श्रीराधारतिशरणे वेणुगीतादिप्रकटनञ्च वर्ण्यन्ते। द्वादशस्तवके – कुमारीगणकृतं श्रीकृष्णसङ्गलाभस्य उद्देश्यं कात्यायन्याः आराधना च, श्रीकृष्णकर्तृकं गोपीनां वसनचौर्य्यादि वर्ण्यते। त्रयोदशस्तवके – यज्ञपत्नीनाम् अन्नभिक्षा, ताः प्रति प्रसादविस्तारः, सायंकाले व्रजे प्रवेशपूर्वकं गोपीगणस्य आनन्दविधानादि च वर्ण्यते। चतुर्दशस्तवके – कुसुमासवसख्युः दैवज्ञरूपेण वृद्धागोपीसभायां गमनं, तरुणीनां गोपीनां च स्वपतिं प्रति आसक्तीभावः निराकरणछलेन त्रिसन्ध्यायां कुञ्जसमूहे कालकुमारस्य पूजनार्थं प्रेरणस्य व्यवस्था, वसन्तोत्सवलीला चेत्यादयः विषयाः उपस्थाप्यन्ते। पञ्चदशस्तवके – इन्द्रयज्ञ-निवारणं, गिरिराज-पूजाप्रवर्त्तनं, गोवर्द्धनधारणं, सिद्धगणकृतं स्तव-अभिषेकादि च प्रतिपाद्यन्ते। षोडशस्तवके – वरुणचरणकर्तृकं नन्दमहाराजस्य वरुणलोके गमनं, श्रीकृष्णस्य पुनः व्रजे आगमनं, व्रजवासिनां ब्रह्मलोकदर्शनञ्च वर्ण्यते। सप्तदशस्तवके – चन्द्रोदयः, वेणुनिनादः, गोपीगणस्य अभिसारः, अपेक्षा-उपेक्षामयी वाक्यभङ्गी, उपेक्षायाः अर्थस्वीकारेण तासां विरह-विधुरता, विषादोक्तिः, कान्तप्रसादनं, विहारः, श्रीराधया सह तिरोधानादि च वर्ण्यते। अष्टादशस्तवके – गोपीनां

विरहार्त्तनादः, वृक्षवल्लरीं निकषा श्रीकृष्णवार्त्ताजिज्ञासा, श्रीकृष्णलीलानुकृतिः, पादाङ्कानुसरणं, प्रियविरहितायाः श्रीराधायाः तीव्रा विरहव्यथा, निखिल-गोपीमण्डल्याः विलापादि च वर्ण्यते। ऊनविंशस्तवके – गोपीगणस्य विलापः, श्रीकृष्णदर्शनं, विविधभावप्रकटनं, संप्रश्नः उत्तर-कौतुकादि च वर्ण्यते। विंशतिस्तवके – हल्लीशकनृत्यं, हस्तकाभिनयः, चञ्चत्पुटादितालः, मालव-मल्लारादिरागः, मृदङ्गादिवाद्यं, षड्जादि स्वरोद्घाटनं, नृत्यविश्रामः, सहभोजनं, विविधविलासः, वंशीचौर्य्यं, शङ्खचूडवधादिः चेत्यादयः विषयाः चित्र्यन्ते। एकविंशतिस्तवके – वासन्तिकाहोलिलीला, गीतवाद्यादिविविधः विलासः, पुनर्नृत्योत्सवः, रतिविलापः, जलकेलि, मधुपानं, शयनादिः चेति वर्ण्यन्ते। द्वाविंशतिस्तवके– हिन्दोलन-लीलास्वादः उपसंहारश्चेति प्रतिपाद्यन्ते। कविः मङ्गलश्लोकद्वयेनादौ मनोरमतया श्रीकृष्णस्य पदयुगलस्य वर्णनं कृतवान् यथा–

“वन्दे कृष्णपदारविन्दयुगलं यस्मिन् कुरङ्गीदृशां
वक्षोज-प्रणयीकृते विलसति स्निग्धोऽङ्गरागः स्वतः।
काश्मीरं तलशोणिमोपरितनः कस्तुरिकां नीलिमा
श्रीखण्डं नखचन्द्रकान्ति-लहरी निर्व्याजमातन्वते॥
शोणस्निग्धाङ्गुलि-नलकुलं जातरागं परागैः
श्रीराधायाः स्तनमुकुलयोः कुङ्कुमक्षोरूपैः।
भक्तश्रद्धामधुनखमहःपुञ्जकिञ्जल्कजालं
जङ्घानालं चरणकमलं पातु नः पूतनारेः”[10] //

पुनश्च, श्लोकद्वयेन श्रीचैतन्यमहाप्रभुः एवञ्च तस्य पार्षदवृन्दस्य वर्णनं कृतवान्। यथा –

“माधुर्य्यैर्मधिभिः सुगन्धि भजनस्वर्णाम्बुजानां वनं
कारुण्यामृतनिर्झरैरुपचितः संप्रेमहेमाचलः।
भक्ताम्भोधरधोरणी-विजयिनी निकम्पशम्पावलि-
र्देवो नः कुलदैवतं विजयतां चैतन्यकृष्णो हरिः॥
नमस्यामोहस्यैव प्रियपरिजनान् वत्सलहृदः,
प्रभोरद्वैतादीनपि जगदघौक्षयकृतः।
समानप्रेमाणः समगुणगणास्तुल्यकरुणाः
स्वरूपाद्या येऽमी सरसमधुरास्तानपि नुमः”[11]॥

इतोऽपि, पञ्चमश्लोकेन स्वगुरोः श्रीनाथपादस्य वन्दनां कृतवान् कविः श्रीकर्णपूरः। यथा –

“गुरुं नः श्रीनाथाभिधमवनिदेवान्वयविधुं,
नुमो भूषारत्नं भुव इव विभोरस्य दयितम्।
यदास्यादुन्मीलन्निरवकरवृन्दावनरहः,
कथास्वादं लब्ध्वा जगति न जनः कापि रमते”[12] //

काव्यस्य उत्सविषये यदि वदाम्यहम् तर्हि वच्मि काव्यस्य उत्सः श्रीभागवतस्य दशमस्कन्धस्य श्रीकृष्णचरितम्। इतोऽपि गोपालचम्पूकाव्ये श्रीजीवगोस्वामिपादः दर्शनशास्त्रस्य गूढतत्त्वं साररूपेण गृहीत्वा काव्यस्य काव्यत्वे कञ्चित् कठिनत्वं प्रकाशयति। परन्तु कविः श्रीकर्णपूरः तस्य काव्ये अलङ्कारशास्त्रस्य चम्पूलक्षणानुसारेण सत्काव्यवत् सहृदयगणस्य मनसि आह्लादं सृजति। इतोऽपि श्रीविश्वनाथचक्रवर्तिपादकृतया ‘सुखवर्त्तना’ टीकया काव्यस्य तात्पर्यं सुखबोध्यं भवति।

---

10 आनन्दवृन्दावनचम्पूः १/१-२

11 आनन्दवृन्दावनचम्पूः १/३-४

12 आनन्दवृन्दावनचम्पूः १/४

**श्रीगौराङ्गचम्पूः –** चैतन्ययुगे आनन्दवृन्दावनचम्पूकाव्यात् परं गौडीयसाहित्ये इतोऽपि चम्पूकाव्यस्य उदयः न परिलक्षितः भवति स्म। परन्तु चैतन्योत्तरीययुगे चैतन्यमतावलम्बिकविषु श्रीनित्यानन्दवंशीयः श्रीलरघुनन्दनगोस्वामिपादः अग्रगण्यां भूमिकां पालयति स्म चम्पूकाव्यस्य रचनार्थम्। ते सप्तदशशतकस्य उत्तरार्द्धे (१७८५) पश्चिमबङ्गप्रदेशस्य वर्द्धमानजिलायाः काटोयानिकटवर्तिनि माओग्रामे माडोग्रामे वा (वर्तमाने मौग्रामे) आर्विभूताः। अष्टादशतमवत्सरात् काव्यरचनायां दक्षतां प्राप्य विविधकाव्यग्रन्थान् रचयित्वा गौडीयबैष्णवसाहित्यं समृद्धं कृतवान्। ४५ तमवत्सरे बङ्गभाषायां स्वरचितेन रामरसायन इत्यनेन ग्रन्थानुसारेण तस्य वंशवृत्तान्तः विज्ञायते। तस्य पितुर्नाम किशोरीमोहनगोस्वामी। पितुः नवमपुत्रेषु सर्वकनिष्ठपुत्रः आसीत् श्रीलपादः। अन्ये च तस्मिन् वंशे सर्वे एव ग्रन्थरचनायां विशेष-पारदर्शितां लब्धवन्तः। तस्य रचनासमूहाः - श्रीश्रीगौराङ्गचम्पूः, श्रीश्रीगौराङ्गविरुदावली, श्रीरामरसायनम्, श्रीराधादामोदरकाव्यम्, गीतामाला, देशिकानिर्णयः, वैष्णवव्रतनिर्णयः, श्रीमद्भागवतस्य संशयशातनी टीका, छन्दोमञ्जुर्याः व्याख्यानमञ्जुरीनामकटीकादयः च। श्रीरामरसायनादिकाव्येषु श्रीलरघुनन्दगोस्वामि-पादकृतं श्रीगौराङ्गचम्पूकाव्यं बृहदाकारम्। काव्ये गद्येन पद्येन च मिश्रिताः ३२-आस्वादनामकाः अध्यायाः सन्ति। अर्थात् काव्यस्य अध्यायः आस्वाद इति कथ्यते ग्रन्थकारैः। काव्येऽस्मिन् आलोच्यविषयस्तु (आस्वादक्रमेण)-

१. श्रीगौरावतारकथनं, २. श्रीगौराविर्भावनिश्चयः, ३. श्रीगौरगर्भवासः, ४. श्रीगौरजन्ममहोत्सवः, ५. प्रथमबाल्यविलासः, ६. मध्यबाल्यविलासः, ७. शेषबाल्यविलासः, ८. प्रथमपौगण्डविलासः,. ९. मध्यमपौगण्डविलासः, १०. शेषपौगण्डविलासः, ११. कैशोरलीलावर्णने उपनयनादिविलासः, १२. लक्ष्मीपूर्वरागाङ्कुरः, १३. लक्ष्मीसन्दर्शनं, १४. लक्ष्मीपूर्वरागः, १५. विवाहपूर्वकृत्यं, १६. कन्यागृहप्रवेशः, १७. लक्ष्मीपरिणयोत्सवः, १८. लक्ष्मीसमागमः, १९. विष्णुप्रियापरिणयोत्सवः, २०. दिग्विजयिजयः, २१. गयाप्रस्थानं, २२. गयाप्रत्यागमनं, २३. स्वरूपप्रकाशारम्भः, २४. श्रीनित्यानन्दसमागमः, २५. वहुपाषण्डिनिस्तारः, २६. चपलगोपालोद्धारः, २७. जगन्नाथमाधवा-नुग्रहः, २८. स्वानन्दावेशः, २९. हेमन्तशिशिर-विलासः, ३०. वसन्तग्रीष्मविलासः, ३१. वर्षाशरद्विलासः, ३२. नित्यविलासश्चेति।

काव्येऽस्मिन् मुख्यतया वर्णितमस्ति नवद्वीपचन्द्रगौरसुन्दरस्य नवद्वीपलीला। ग्रन्थारम्भे उपसंहारे च काव्यकारस्य स्ववंशगौरववर्णनं कृतवान्। मङ्गलाचरणे श्रीकृष्ण-श्रीगौराङ्ग-नित्यानन्द-अद्वैतादिपार्षदवृन्दस्य वन्दनां कृतवान्। यथा च –

"श्रीसङ्कर्ष-दत्त-शर्मनिचयो विद्योति-कीर्त्योज्वलः
सच्चेतोमधुसूदनाश्रितपद-व्याकोष-कीलालजः।
गोस्वामी रघुनन्दनस्य सुखकृद्भक्तस्य पीताम्बरो
वंशीमोहन उन्नतां मम कृपां श्रीमानजस्रं
क्रियात्"[13]॥

[13] श्रीगौराङ्गचम्पूः १/१

काव्ये सरलशब्दप्रयोगेण काव्यतत्त्वस्य आलोकपातेन नवद्वीपचन्द्रस्य वर्णनेन पाठकगणस्य सहृदयगणस्य च हृदयम् आह्लादितं भवति। पाठकवर्गैः काव्यमिदं गोपालचम्पू-अनुरूपा रचना मन्यते, तत्र अनेकानि सादृश्यानि परिलक्ष्यन्ते। काव्येऽस्मिन् ३२ आस्वादानामुपरि टीकाटिप्पण्यादिषु रचनायाञ्च अधिकं नाम न प्राप्यते। तथापि तस्मिन् काले नवद्वीपसम-वैष्णवधामरूपेण ख्यातनामः पश्चिमबङ्गप्रदेशस्य वर्द्धमानजिलायाः श्रीखण्डः। श्रीखण्डस्य शास्त्रज्ञेन साहित्यिकेन श्रीगौराङ्गप्रेमपिपासुना श्रीराखालानन्दशास्त्रिठाकुरेण विरचिता श्रीगौराङ्गचम्पूकाव्यस्य उपरि टिप्पणी। टिप्पण्याः नाम 'श्रीगौरलीलामृतास्वादद्योतनी'। अस्य काव्यस्य अवधारणे अस्याः टिप्पण्याः अवदानम् अनस्वीकार्यम्। इतोऽपि अस्य ग्रन्थस्य प्रचारे कलिकातास्थितः वरानगरपाठवाडी प्रथममुद्रणे प्रयासी अभवत्।

**निष्कर्षः** – गौडीयसंस्कृतसाहित्ये चम्पूकाव्यस्य उद्भवः विकाशश्च गोपालचम्पूकाव्यात् अस्य विकासः श्रीगौराङ्गचम्पूकाव्यपर्यन्तम्। एषु त्रीणि विहाय चम्पूकाव्यस्य नाम न प्राप्यते गौडीयसंस्कृतसाहित्ये। वस्तुतः, चैतन्ययुगात् गौडीयसाहित्ये चम्पूकाव्यविरचनं प्रारभ्यते, तस्य अंशस्तु यथा – श्रीगोपालचम्पूः, श्री-आनन्दवृन्दावनचम्पूः, श्रीगौराङ्गचम्पूश्चेति। काव्यत्रयस्य गद्येन पद्येन च मिश्रितांशाः काव्यकाराणां पाण्डित्यस्य परिचयं प्रयच्छन्ति। गोपालचम्पूः अस्याः दार्शनिकतत्त्वं विशेषतया श्रीजीवगोस्वामिपादस्य कृष्णसन्दर्भस्य तत्त्वमेव साररूपम्। इतोऽपि व्याकरणस्य युक्तियुक्तः शब्दप्रयोगः परिदृश्यते। काव्यस्य रसपरिपुष्ट्यै कृष्णराधामिलनसमये 'यः कौमारहरः' इति राधायाः मुखात् श्लोकं श्रुत्वा श्रीकृष्णः श्लोकस्य चतुर्थचरणं परिवर्त्य उच्चारयति 'कृष्णरोधसि तत्र कुञ्जसदने' इति। अनया प्रक्रियया गोस्वामिपादैः रसविशेषः प्रकाशितः।

श्रीकविकर्णपूरः राधाकृष्णलीलायाः वर्णनायां चम्पूकाव्यस्य विशेषतां वर्धितवान्। तस्य काव्यस्य महासूरे कृतित्वे न केवलं गौडीयसाहित्यं आभारतवर्षं संस्कृतसाहित्यम् च अलङ्कृतवान्। काव्यस्य प्रत्येकस्मिन् अंशे अलंकारशास्त्रस्य प्रकाशेन काव्यम् अतुलनीयम्। तस्य असीम-रसत्वस्य वर्णनायां कवेः श्रीकर्णपूरस्य 'कर्णपूरः' नाम सत्यमेव सार्थकतां प्राप। कोऽपि न सन्देहः चैतन्ययुगस्य कवेः श्रीकर्णपूरस्य काव्यानि सहृदयगणस्य आह्लादकारकाणि।

नित्यानन्दवंशावतंसः श्रीलरघुनन्दन-गोस्वामिपादः तस्य चम्पूकाव्ये गोपालचम्पूकाव्यस्य सादृशरूप-दानार्थं कमपि अंशं लघु न कृतवान्। श्रीगौराङ्गचम्पूवत् एतादृशः सुविशालः सरसः सहजबोध्यः ग्रन्थः सत्यमेव गौडीयसाहित्ये विरलः। काव्ये छन्दसाम् अलङ्काराणाम् च अपरूपप्रयोगेण पाठकगणाः काव्यपाठं कृत्वा सत्यमेव आह्लादिताः। नवद्वीपचन्द्रस्य श्रीगौराङ्गमहाप्रभोः नवद्वीपलीलायाः वर्णनायां ग्रन्थोऽयं सत्यमेव विरलः। श्रीलगोस्वामिपादस्य अपराणां ग्रन्थानां ये साररूपाः ते ग्रन्थेऽस्मिन् विद्यमानाः। तत्र न कोऽपि सन्देहः।

परिशेषे प्रोक्तं यत्, चम्पूत्रयमेव

गौडीयसंस्कृतसाहित्ये रचितम्। त्रीणि काव्यानि स्वस्य वैशिष्ट्येन गौडीयसाहित्यं समृद्धं कृतवान्। श्रीजीवगोस्वामिपादकृता 'गोपालचम्पूः' दर्शनशास्त्रसहितं काव्यशास्त्रं, श्रीकविकर्णपूरकृता 'आनन्दवृन्दावनचम्पूः' अलङ्कारशास्त्रसहितं काव्यशास्त्रं, श्रीलरघुनन्दनगोस्वामिपादकृता 'श्रीगौराङ्गचम्पूः' प्राञ्जलया भाषया काव्यशास्त्रं समृद्धं कृतवान्। चैतन्यपरवर्तिसमये पुनश्च चम्पूकाव्यस्य उद्भवः न परिलक्ष्यते। काव्यत्रयमेव गौडीयसाहित्यस्य आह्लादकारकमिति न सन्देह इति शम्।

## सहायकग्रन्थसूची


- श्रीहरिदासदासः (१९४८) श्रीश्रीगौडीयबैष्णवसाहित्य (बांला)/ श्रीयुक्तरसिमोहनविद्याभूषण-महाशयः/ श्रीधामनवद्वीपः, हरिबोलकुटीरम्/ ग्रन्थकारः स्वयम्।
- विश्वनाथकविराजः (२०११) साहित्यदर्पण षष्ठपरिच्छेदः (बांला)/ ड. उदयचन्द्रवन्द्योपाध्यायः/ संस्कृत बुक डिपो २८/१, विधानसरणी, कलकाता -७००००६/ श्री-अभयकुमारवर्मणः
- आचार्यः दण्डी (२००८) काव्यादर्शः (हिन्दी)/ ड. जमुमापाठक/ वाराणासी/ चौखाम्बा कृष्णदास अकादमी
- श्रीजीवगोस्वामिपादः (२००२) श्रीगोपालचम्पूः (हिन्दी) श्रीवनमालिदासशास्त्री/ श्रीगोपीनाथः गौडीयमठः/ पुरातनदाऊजीमन्दिरम्, गौपेश्वररोड, वृन्दावन (मथुरा) उ. प्र./ श्रीभक्तिविवुधबोधायणमहाराजः
- श्रीकृष्णदासः कविराजः (२००७) श्रीचैतन्यचरितामृतं (बांला)/ भवानीप्रसादचट्टोपाध्यायः/ गोरक्षपुरम्/ गीताप्रेस
- श्रीकविकर्णपूरः (१९८१) आनन्दवृन्दावनचम्पूः (बांला)/ श्रीमणीन्द्रनाथगुहः/ श्रीराधारमणमन्दिरम्, वृन्दावनः(मथुरा) उ. प्र./ श्रीसावित्रीगुह
- श्रीलरघुनन्दनगोस्वामिपादः (१९५८) श्रीगौराङ्गचम्पूः/ श्रीश्रीभागवताचार्य्यः/ कलकाता – ७०००३६/ श्रीपाठवाडी श्रीश्रीगौराङ्गग्रन्थमन्दिरम्
- धीरेन्द्रनाथवन्द्योपाध्यायः (१९८८) संस्कृतसाहित्येर इतिहास (बांला)/ आर्य भ्यानसन (नवमतल) कलकाता -७०००५६/ पश्चिमबङ्ग-राज्य-पुस्तक-पर्षद्

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# कालिदासीयदृश्यकाव्येषु वैदिकसंस्कारविमर्शः

**डॉ. पापनचन्दः**

**शोधच्छात्रः, संस्कृतविभागः, सिधो-कान्हो-विरषाविश्वविद्यालयः**

**पुरुलिया, पश्चिमबङ्गः, ७२३१०४**

मानवजीवनस्याधारभूतः संस्कारो वर्तते। कस्यापि मनुष्यस्य कुललोकयोः परम्परया यानि कार्याणि क्रियन्ते तेषां कार्याणां सम्यक् प्रकारेण सम्पादनार्थं गुणशीलसौन्दर्य्यपारम्परिक-शिष्टाचाराणामावश्यकता अनुभूयते। तत्र कार्यस्य सुष्ठु सम्पादनाय संस्काराः परोक्षरूपेण प्रेरयन्ति। तेषां संस्काराणां साहाय्येनैव कोऽपि मनुष्यः स्वजीवने शोभनं कार्यं कर्तुं शक्नोति। 'कीर्तिर्यस्य स जीवति' इति उक्तेः मूले जन्मजन्मान्तरयोः सञ्चितपुण्यरूपेण यः संस्कारो वर्तते स एव प्रारब्धरूपेण कार्यं करोति। अतो मनुष्यजीवनस्याधारभूतः संस्कारो वर्तते इति। एते संस्काराः वैदिकसाहित्ये लौकिकसाहित्ये च भिन्नभिन्नरूपेण प्रतिपादिताः सन्ति।

**'मुण्डे मुण्डे मतिर्भिन्ना'**।[1]

इति उक्त्यनुसारं विभिन्नेषु ग्रन्थेषु संस्काराणां संख्या भिन्नभिन्नरूपेण च दृश्यते प्राप्यते च। यद्यपि ऋषयोऽष्टचत्वारिंशत् संस्कारा इति आमनन्ति तथापि मतवैभिन्न्यकारणात् षोडशसंस्कारा एव प्रमुखरूपेण प्रतिपादिताः। परञ्च केषाञ्चिन् मते त्रयोदश संस्कारान् केचन जना एकादश संस्कारान् स्वीकुर्वन्ति। अस्मिन् विषये कुललोकयोः या परम्परा वर्तते सा एव परम्परा इदानीं पर्यन्तमपि कार्यं करोति। वैदिकसंस्काराः ये सन्ति तेषां प्रभावः कालिदासीयदृश्यकाव्येषु प्रत्यक्षरूपेण दृश्यते। तेषां वर्णनं निम्नरूपेण क्रियते -

**गर्भाधानसंस्कारः** -

तत्र प्रथमं तावद् गर्भाधानसंस्कारविषये अभिज्ञानशाकुन्तलनाटके उच्यते –

**'दुष्यन्तपरिणीतामापन्नसत्त्वां शकुन्तलां निवेदयितुम्'**।[2]

अत्र गर्भाधानसंस्कारस्याभासः संलक्ष्यते। अत्र गर्भाधानस्य मूलोद्देश्यं वर्तते तेजस्विपुत्रोत्पत्तिः। कथमिति चेत् –

**'दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः'**।[3]

'आत्मा वै जायते पुत्रः' इति पितुः शरीरे ये गुणा विद्यमानाः सन्ति तेषां गुणानाम् आधानं पुत्रस्य शरीरे भवति। पुत्रः पितृसदृशः एवाचरणं करिष्यतीति मत्वा अस्य संस्कारस्य विधानं वर्तते। यथा विक्रमोर्वशीयनाटके पुरूरवापुत्रस्य आयुः-विचारविषये आश्चर्यचकितोऽभूत्। तत्र कारणमिदं

---

[1]वायुपुराणम्

[2]अभि.श. – 4र्थ. अंक, पृ - 249

[3] अभि.श. – 4र्थ. अंक, (4/4) पृ - 252

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

यद् उर्वशी गर्भवती अस्ति न वा इति न परिलक्षितः। एतस्मात् कारणात् तेन उच्यते –

**'न च मया गर्भव्यक्तिरालक्षिता'।**[4]

अनेन ज्ञायते यत् तत्कालीनसमये गर्भाधानसंस्कारस्य प्रचलनमासीत्।

**पुंसवनम् –**

गर्भस्थशिशोः तृतीये मासे पुंसवनसंस्कारस्य विधानं वर्तते। पुत्रोत्पत्तिः सर्वैः काम्यते। कालिदासस्य अभिज्ञानशाकुन्तलेऽपि उच्यते –

**'इदानीमेव साकेतस्य श्रेष्ठिनो दुहिता निर्वृत्तपुंसवना जायाऽस्य श्रूयते'।**[5]

अत्र पुत्रहीनता सामाजिकदोषरूपेण परिलक्ष्यते। यथा शूद्रकेनापि मृच्छकटिके उच्यते –

**'शून्यमपुत्रस्य गृहम्'।**[6]

उत्तररामचरितेऽपि दृश्यते यद् यदा जनकनन्दिनी जानकी सीता गर्भवती आसीत् तदा ऋष्यशृङ्गस्य आश्रमाद् अष्टावक्रमाध्यमेन अरुन्धत्या साकं माताकौशल्याप्रभृतयः सीताम् आशीर्वचांसि प्रयच्छन्ति। तत्र यशस्विपुत्रोत्पत्तेः अभिलाषा तासां मनसि विद्यते। पुन्नरकात् त्रायते इति पुत्रः। स एव वंशपरम्परायाः सञ्चालनं सम्यक् प्रकारेण करिष्यति इति मत्वा सर्वेऽपि श्रेष्ठपुरुषाः वैदिकरीत्या तस्मिन् समये पुंसवनसंस्कारं कुर्वन्ति स्म।

**जातकर्मसंस्कारः -**

अयं संस्कारो बालकस्य जन्मसमये नाभिच्छेदनात् पूर्वं क्रियते। यदि कस्माच्चित् कारणात् जातकर्मसंस्कारः समयानुसारं न भवति तर्हि तद्दिवसाभ्यन्तरे एव करणीयः। अस्य संस्कारस्य मूलोद्देश्यं भवति शिक्षणरक्षणभरणव्यापाराः सम्पादिताः भवेयुः। अस्मिन् संस्कारे जातकस्य पिता वैश्वानरं प्रति स्वकीयं कर्तव्यं ज्ञापयन् द्वादशपात्रेषु पुरोडाशं संस्थाप्य वैश्वानराय समर्पयति। पुत्रस्य कृते दधिमधुघृताणि च एकस्मिन् स्वर्णपात्रे संस्थाप्य भक्षणार्थं ददाति। अनेन तस्य शरीरे ऊर्जायाः सञ्चारो भवति। अनेन द्रव्यत्रयेण कस्य आधानः भवति इत्यस्मिन् विषयेऽपि ऋषयः स्वकीयमतं प्रस्तुतवन्तः। यथा दधिद्रव्येण इन्द्रियशक्तिः संवर्ध्यते। घृतेन पशुतेजः मधुना औषधिषु रसाः प्राप्यन्ते। एतेन पीतवातकफजाश्च रोगाः प्रशमिता भवन्ति। एतत्सर्वमभिलक्ष्य कालिदासेनापि सर्वदमनस्य सर्वविधरक्षणाय वदति –

**'एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता'।**[7]

अनेन प्रतीयते सर्वदमनस्य जातकर्मसंस्कारः सम्यक्प्रकारेण सम्पादितः। यदा तापसी बालकं सर्वदमनं दृष्टवती तदा तस्य मणिबन्धे रक्षाकवचः न आसीत्। एतद् दृष्ट्वा सा शङ्किता तदा सा राजानं पृच्छति, राजा उत्तरं ददाति सिंहशिशुना साकं क्रीडासमये रक्षाकवचः परिभ्रष्टः, अतो भूमौ पतितं दृष्ट्वा मया नीतः। तदानीं तापसी प्रसङ्गेऽस्मिन् वदति यद् भगवता मारीचेन जातकर्मसमये सर्वदमनस्य मणिबन्धे स कवचः स्थापितः। अनेन रक्षाकवचेन बालकस्य संरक्षणं भविष्यति। सर्वदमनस्य जातकर्मसंस्कारः विधिवत्सम्पन्नो भवति। यथा नाटकस्य सप्तमाङ्के मारीचेन उच्यते–

[4]वि.म. – 5म अंक, पृ – 230

[5]अभि.श. -6ष्ठ. अंक, पृ - 451

[6]मृ.क. – 1म. अंक,(1/8)

[7]अभि.श. – 7म. अंक, पृ - 515

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

**'विधिवदस्माभिरनुष्ठितजातकर्मा पुत्र एष शाकुन्तलेयः'।**[8]

अनेन प्रकारेण विक्रमोर्वशीयेऽपि पुरूरवा पुत्रस्य संरक्षणाय जातकर्मसंस्कारः सम्पादितः। अयं संस्कारः च्यवनऋषिणा सम्पादितः। यथा उच्यते–

**'यत् क्षत्रियकुमारस्य जातकर्मादिविधानं तदस्य भगवता च्यवनेनाशेषमनुष्ठितम्'।**[9]

अनेन प्रतीयते यत् कालिदाससमये संस्काराणां विशिष्टं महत्त्वमासीत्। तत्कालीनसमाजे वैदिकसंस्काराणां प्रचलनं कुललोकयोः परम्परामधिकृत्य भवति स्म। एतत् सर्वमभिलक्ष्य कवीन्द्र-कालिदासेन जातकर्मसंस्कारस्य सर्वविधरक्षणाय वदति। अयं जातकर्मसंस्कारविषये महर्षिमनुना उच्यते यथा –

**प्राङ्नाभिवर्धनात् पुंसो जातकर्म विधीयते।**[10]

**नामकरणम्** –

जातकर्मसंस्कारानन्तरमेव नामकरण-संस्कारः क्रियते। कस्यापि जातकस्य जन्मानन्तरं सामाजिकव्यवहारज्ञानाय नामकरणसंस्कारः अनुष्ठीयते। यथा ज्योतिषशास्त्रे उच्यते –

**'नामाखिलस्य जगतः व्यवहारहेतुः नाम्नैव कीर्तिं लभते मनुष्यः'।**[11]

अर्थात् नाम्ना तद्विशिष्टगुणस्य आधानमपि भवति। संज्ञा द्विविधा भवति। एका अन्वर्थसंज्ञा, द्वितीया तद्भिन्ना संज्ञा। अत्र अन्वर्थसंज्ञा का भवति? यस्य यादृशी संज्ञा वर्तते तादृशी एव जातकस्य कर्म वर्तते। इयं संज्ञा अन्वर्थसंज्ञा वर्तते। द्वितीया संज्ञा सा अस्ति यत्र जातकस्य नामानुसारेण कार्यं न वर्तते। सा तद्भिन्ना संज्ञा। यथा कस्यापि नाम वर्तते सत्यप्रकाशोऽस्यान्वर्थसंज्ञा भविष्यति सः सदा सत्यमेव प्रकाशयति अर्थात् यथार्थं भाषणं करोति, परञ्च यदि सः सर्वदा असत्यं वदति तर्हि सा संज्ञा तद्भिन्ना भविष्यति। अतो वैदिकयुगाद् आरभ्य अद्यावधि पर्यन्तं जातकस्य जन्मसमयानुसारं तिथिवारनक्षत्रमुहूर्तादिकं दृष्ट्वा नामकरणं सम्पद्यते। कालिदासेनापि एवमुच्यते –

**'स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि'।**[12]

**'सत्त्वानां प्रसभदमनात् सर्वदमनः पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात्'।**[13]

**विद्यारम्भसंस्कारः** –

मानवजीवनम् एकः व्यवहारः अस्ति। व्यवहारस्य मूलमस्ति ज्ञानम्। ज्ञानस्य मूलम् अस्ति शिक्षा। अतः सर्वेऽपि स्वकीयं बालकं शिक्षणार्थं प्रेरयन्ति। तत्र बालकस्य पञ्चवर्षादारभ्य विद्यारम्भसंस्कारः अनुष्ठीयते। तस्मिन् समये बालकः अक्षरारम्भं करोति। कथमिति चेत् न क्षरतीति अक्षरः। अक्षरः ब्रह्मसदृशो भवति। तस्य कदापि क्षरणं न भवति। एतस्मात् कारणाद् अक्षरारम्भः क्रियते। इतः आरभ्य समावर्तनपर्यन्तं स विद्याग्रहणं करोति। अस्मिन् संस्कारविषये कालिदासेन उच्यते -

**'किमिदं शिष्योपदेशकाले युगपदाचार्यभ्यात्रोपस्थापनम्'।**[14]

---

[8]अभि.श.- 7म. अंक, पृ - 544

[9]विक्र.म. – 5म. अंक, पृ - 236

[10] मनु. स्मृ. – 2/28

[11] मुहूर्तचिन्तामनि, नामकरणसंस्कारप्रकरण

[12]अभि.श.- 7म. अंक, पृ - 499

[13]अभि.श.- 7म. अंक, (7/33) पृ - 544

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

अनेन प्रतीयते यद् तदानीम् आचार्याः सम्यक् प्रकारेण शिष्यस्य हृदि विद्यास्थापनं कुर्वन्ति स्म। तस्मिन् समये पक्षविपक्षरूपेण विद्याग्रहणं जनाः कुर्वन्ति स्म। पूर्वपक्षमुपस्थाप्य उत्तरपक्षेण तस्य विषयस्य पुष्टिं कारयन्ति स्म। येन शिष्याणां बुद्धेः वर्धनं सम्यक् प्रकारेण भवेत्। यथा तर्कमाध्यमेन अत्र उच्यते –

**"उपदेशं विदुः शुद्धं सन्तस्तमुपदेशिनः।**
**श्यामायते न यस्मासु यः काञ्चनमिवाग्निषु"॥**[15]

अत्र आचार्यगणदास-हरदत्तयोर्मध्ये शिक्षाविषयकचर्चा आयोजिता। वादे वादे जायते तत्त्वबोधः इति परम्परया शिक्षायाः संरक्षणं वर्धनञ्च भवेत् एतदर्थम् एतादृशानि उदाहरणानि प्रदत्तानि। येन तत्कालीनसमाजः शिक्षितो भवेद्। अष्टादशविद्यानां ग्रहणं जनाः क्रमेण समयानुसारञ्च कुर्वन्ति स्म। विक्रमोर्वशीयेऽपि पुरुरवा उर्वशी च विद्यारम्भसंस्कारं सम्पादितौ –

**'एष गृहीतविद्या आयुः साम्प्रतं कवचहरः संवृत्तः'।**[16]

**विवाहसंस्कारः –**

वि-उपसर्गपूर्वकं वह्-धातोः विवाहशब्दः निष्पन्नो भवति। यस्यार्थः विशेषेण भारं वाहयति इति विवाहः। यः कश्चन पुरुषः वर्तते तस्य यावत् पर्यन्तं विवाहसंस्कारः न सम्पद्यते तावत् पर्यन्तं सः अपूर्णो भवति। कथमिति चेत् मानवजीवने पुरुषार्थचतुष्टयम् ऋषिभिः निर्धारितम्। अत्र धर्मार्थकाममोक्षाणामिति चतुर्णां सम्पूर्णजीवने आवश्यकता भवति। अतो धर्मार्थकामाः इति त्रयाणां पुरुषार्थाणां सम्यक् प्रकारेण सम्पादनार्थं धर्मपत्न्याः अवश्यकता अनुभूयते। यथा उच्यते–

**'विना पत्नी कथं धर्म आश्रमाणां प्रवर्तते'।**[17]

अतः सर्वविधशुभकार्येषु धर्मपत्नी तिष्ठति। कालिदासेनापि स्वकीयदृश्यकाव्येषु विवाहसंस्कारस्य भारतीयमर्यादानुसारं उपस्थापनम् अक्रियत। तेन कुत्रापि अनैतिकविवाहसंस्कारस्य चर्चा न कृता।

**'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः'।**[18]

इति गीतावचनानुसारं स्वधर्मे एव संस्कारादिसम्पादनम् आचारसंहिता आसीत्।

**'ययोरेव समं वित्तं ययोरेव समं कुलं**
**तयोः मैत्रीविवाहश्च न तु पुष्टविपुष्टयोः'।**[19]

स्वकुलवंशपरम्परानुसारेण विवाहसंस्कारं विधिपूर्वकवैदिकपरम्परया जनाः सम्पादयन्ति स्म। अष्टविधविवाहसंस्काराणां यथोचितं स्थानं समाजे आसीत्। यथा उच्यते –

**"त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः**
**शकुन्तला मूर्त्तिमती च सत्क्रिया।**
**समानयंस्तुल्यगुणं वधूवरं**
**चिरस्य वाच्यं न गतः प्रजापतिः"॥**[20]

अत्र राजा दुष्यन्तः क्षत्रियकुलभूषणो वर्तते। यथा उच्यते –

**"जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।**
**पुत्रमेवंगुणोपेतं चक्रवर्तिनमाप्नुहि"॥**[21]

---

[14]मा.वि. – 1म. अंक, पृ - 24

[15] मा.वि. – 2य अंक, (2/9)

[16]विक्र.म. – 5म. अंक, पृ - 236

[17]धर्मशास्त्र,

[18]श्रीमद्भागवदगीता – कर्मयोग (3/35)

[19]सुभाषितानि

[20]अभि.श.- 5म. अंक, (5/15) पृ - 339

इत्यनेन ज्ञायते यत् सः तदानीं लब्धप्रतिष्ठित आसीत्। शकुन्तालापि मेनकाविश्वामित्रयोः संसर्गजा आसीत्। साऽपि क्षत्रियकुलोद्भवा मूर्त्तिमती लक्ष्मीस्वरूपिणी आसीत्। मालविकाग्निमित्रेऽपि एवमुच्यते –

**'भगवति यदि त्वं प्रसाधनगर्वं वहसि, तद्दर्शय मालविकायाः शरीरे विवाहनेपथ्यमिति। तया विशेषालङ्कृता मालविका'।**[22]

व्यक्तिजीवनं समाजजीवनञ्च शृङ्खलारक्षार्थं विवाहसंस्कारस्य महत्त्वं सर्वजनविदितम्। अनेन प्रकारेण गृहस्थाश्रमस्य अन्यतमवैशिष्ट्यं वर्तते विवाहसंस्कारः।

**अन्त्येष्टिसंस्कारः –**

मनुष्यजीवनस्य अभिलषितपुरुषार्थ-चतुष्टयेषु अन्तिमपुरुषार्थरूपो मोक्षो वर्तते। धर्मार्थकामत्रिविधैः पुरुषार्थैः कार्याणि संसाध्य पुरुषार्थचतुष्टयस्य प्राप्तये सर्वेऽपि मनुष्याः प्रयतन्ते। यद्यपि मृत्युविषये जनानां मनसि भयम् उत्पद्यते। भयकारणात् ते मृत्युं न वाञ्छन्ति। परञ्च सत्यमिदमेव यद् **'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च'** इति गीतावचनं सत्यमस्ति। मोक्षप्राप्तये मनुष्याः स्वजीवने शुभकर्माणि कुर्वन्ति। येन मुक्तिः भवेत्। इहलौकिकपारलौकिकयोः अभ्युदयाय यः अयं संस्कारः जनैरनुष्ठीयते। **"निषेकाद्याः श्मशानान्ताः तेषां वै मन्त्रतः क्रियाः"** इति स्मृतिवचनानुसारं वैदिकविधिविधानेन अन्तिमपुरुषार्थप्राप्तये जनाः प्रयासं कुर्वन्ति। कालिदासेनापि स्वकीयदृश्यकाव्येष्वनेकेषु स्थलेषु मानवजीवनस्य परमगतिः मोक्षो वर्तते इति उद्घोषितम्। अन्त्येष्टिसंस्कारविषये अभिज्ञानशाकुन्तलनाटके दुष्यन्तेन उच्यते –

**"अस्मात् परं वत यथाश्रुति संभृतानि**
**को नः कुले निवपनानि करिष्यतीति।**
**नूनं प्रसूतिविकलेन मया प्रसिक्तं**
**धौताश्रुशेषमुदकं पितरः पिबन्ति"॥**[23]

कथनस्याभिप्रायोऽयं वर्तते यत् सर्वेऽपि प्राणिनः प्रातःकालादारभ्य रात्रिशयनपर्यन्तं स्वस्वकार्यं संसाधयन्ति। सर्वेषु जीवेषु चिन्तनशीलजीवो मनुष्यो वर्तते। अस्य मनुष्यस्य कर्तव्यं किं भवेत्? इति विचारणीयो विषयः ऋषीणां समक्षमासीत्। अतः सृष्टिप्रपञ्चस्य वेदरूपा या प्रथमा वाणी वर्तते, ऋषयः मनुष्याणां कृते तदनुकूलाम् आचारसंहितां निर्माय उपस्थापितवन्तः। एते वैदिकसंस्काराः मनुष्यस्य कर्तव्याकर्तव्ययोः बोधं कारयन्ति। यस्य यादृशः संस्कारो भवति सः तादृशं कर्म करोति। कर्मानुसारं मोक्षप्राप्तिः भवति। किं वा इहलौकिकपारलौकिकयोः उभयोः सुखविधानं शान्तिसमृद्धिश्च संस्कारानुकुलमेव प्राप्यते। अतः कालिदासेनापि वैदिकसंस्काराणां यद् वैज्ञानिकं महत्त्वं वर्तते तत्प्रस्तूय समाजस्य महान् उपकारः कृतः।

ଓଃଡଃଡଃ

---

अभि.श.- 1म. अंक, (1/12) पृ - 44

[22]मा.वि. – 5म. अंक, पृ - 153

[23]अभि.श.- 6ष्ठ. अंक, (6/25) पृ – 456

[23] अभि.श.- 6ष्ठ. अंक, (6/6)

## सहायकग्रन्थसूची


- Belvalkar, S.R.(Ed.). *The Abhijnasakuntalam*. New Delhi: Kalidas Sahitya Academy, 1965. English.
- Bhattacharjea, Ramsadaya. *A Tale from the Vikramorbashee of Kalidas*. Calcutta: The Sanskrit press, 1859. English.
- Patra, Benudhar. *New Horizons in History $ Culture*. Delhi: Pratibha Prakashan, 2015.
- त्रिपाठी, ब्रह्मानन्द (सम्पादित)। *कालिदास-ग्रन्थावली* । वाराणसी : चौखाम्वा सुरभारती प्रकाशन्, 2014
- पाण्डेय, रमाशंकर (सम्पादित)। *मालविकाग्निमित्रम्।* वाराणसीः चौखाम्वा सुरभारती प्रकाशन्, 2012।
- पाण्डेय, परमेश्वरदीन (सम्पादित)। *विक्रमोर्वशीयम्।* वाराणसीः चौखाम्वा सुरभारती प्रकाशन्, 2013।
- दुवे, सीताराम। वैदिक संस्कृति और उसका सातत्य। दिल्लिः प्रतिभा प्रकाशन्, 2006।

# गुणस्वरूपनिरूपणे पण्डितराजजगन्नाथस्य विशेषत्वम्

**मौमिताखाण्डा**

**शोधच्छात्रा, संस्कृतविभागः, विद्यासागरविश्वविद्यालयः**

**पश्चिममेदिनीपुरम्, पश्चिमबङ्गः, ७२११०२**

**कुञ्चीशब्दाः-** गुणः, रसः, आत्मानन्दः, प्रयोजकः, अनुमापकः च।

**उपोद्घातः**

काव्यरूपलक्ष्यस्य लक्षणप्रतिप्रादकं शास्त्रं ह्यलङ्कारशास्त्रम्। अलङ्कारग्रन्थेषु सर्वश्रेष्ठस्तथा प्रसिद्धो ग्रन्थो हि रसगङ्गाधरः। ग्रन्थस्यास्य प्रणेता पण्डितनरेन्द्रो जगन्नाथः। यथा रसगङ्गाधरस्य तथैव पण्डितराजस्य जगन्नाथस्य सर्वाधिकमान्यता अद्यावधि सर्वैरेव स्वीक्रियते। रसगङ्गाधरः इति नामश्रवणेनैव परिज्ञायते यत् अस्य ग्रन्थस्य प्रतिपाद्यविषयो भवति रसतत्त्वम्। तथापि गुणविषये पण्डितराजस्य हृदयस्पर्शि वर्णनमस्ति।

**गुणशब्दस्य व्युत्पत्त्यर्थः**

गुणः इति पारिभाषिकः शब्दः। व्याकरणदर्शनालङ्कारशास्त्रेषु विविधार्थेषु शब्दोऽयं व्यवह्रियते। गुण्-धातोः अथवा गण्-धातोः गुणशब्दो निष्पद्यते। केचन मन्यन्ते काव्योत्कर्षवर्धनाद् गुण्-धातोः गुणशब्द उपपद्यते। अर्थाद् 'गुण आमन्त्रणे' इति गुण्-धातोः घञ्-प्रत्यययोगे गुणशब्दो विनिर्मीयते। अत्र आमन्त्रणपदस्यार्थो हि उत्कर्षतायाः अभिमुखं प्रति गमनम्। अत्र गुणशब्दस्य व्युत्पत्त्यर्थो भवति- 'गुणयति उत्कृष्टो भवति अनेनेति गुणः। पक्षे तु निरुक्तकारयास्काचार्यमते गण्-इति गणनार्थकधातोः गुणशब्द उपपद्यते। अतो गुणशब्दस्य निर्वचनं भवति-'गणो गणनात् गुणश्च'।

दुर्गाचार्यमते- "गुणोऽपि गणनादेव"। गुणशब्दस्य द्विविधार्थोऽयमलङ्कारशास्त्रे सुसङ्गतः।

**गुणलक्षणम्-**

आलङ्कारिकाः गुणस्वरूपनिरूपणे स्वस्वमतानि प्रदत्तवन्तः। यथा-

वामनाचार्यमते- "काव्यशोभायाः कर्तारो धर्मा गुणाः।"[1]

मम्मटाचार्यमते-

"ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥"[2]

साहित्यदर्पणकारमते- "रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा, गुणाः।"[3]

[1] काव्यालंकारसूत्रवृत्तिः(३/१/१)

[2] काव्यप्रकाशः, ८/८७

[3] साहित्यदर्पणः ८/६४२

मूलतः मम्मटाचार्यविश्वनाथप्रमुखानाम् आचार्याणां मतानुसारेण- गुणाः हि रसधर्माः।

**पण्डितराजेन गुणानां रसधर्मत्वखण्डनम्-**

रसो हि आत्मरूपः अर्थात् आत्मानन्दस्वरूपः। "रसो वै सः", "रसो ह्येवायं लब्ध्वाऽऽनन्दीभवति"[4] इत्यादिश्रुतिवाक्येन रसस्य आत्मानन्दस्वरूपत्वं प्रतीयते। न केवलं वैदिकशास्त्रे, अलङ्कारशास्त्रेऽपि रसस्यात्मानन्दस्वरूपत्वम् आलङ्कारिकैः सादरम् अङ्गीक्रियते। यथा-

अभिनवगुप्तपादेनोक्तम्- "....हृदयमिव प्रविशन् सर्वाङ्गीनमिवालिङ्गन् अन्यत् सर्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः।" अत्र ब्रह्मास्वादमिव इत्युक्ते रसो ब्रह्मानन्दस्वादस्वरूपः इत्यर्थो बोध्यते।

विश्वनाथकविराजेन एतद्विषये निगदितम्-

"सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥"[5]

अर्थात् रसानन्दो ब्रह्मास्वादसहोदरः। अनेनापि रसस्य आत्मानन्दस्वरूपत्वं प्रतीयते।

वेदान्तशास्त्रानुसारेण आत्मा निर्गुणः, आत्मनि कोऽपि गुणो न विद्यते। अतः कथं गुणाः आत्मरूपस्य रसस्य धर्माः भवितुमर्हन्ति? अर्थात् मम्मटाद्याचार्यैः उल्लिखिता गुणानां रसधर्मता न यथार्था। एतद्विषये जगन्नाथेनोक्तम्-

"किञ्चात्मनो निर्गुणतयाऽऽत्मरूपरसगुणत्वं माधुर्यादीनामनुपपन्नम्।"[6]

अपि च यदि एवमुच्येत यत् "गुणाः रसधर्माः" इत्युक्ते "गुणाः उपाधिभूतरत्यादि-स्थायिभावानां धर्माः" ,तथापि अर्थः सङ्गतो न भवति। यतो हि रत्यादयस्तु सुखस्वरूपाः, अतः एते गुणस्वरूपाः। एतस्माद् रत्यादिषु गुणेषु अन्ये गुणाः नैव विद्यन्ते। यतो दार्शनिकसिद्धान्तो हि गुणे गुणः स्थातुं नार्हति। अतः गुणाः रत्यादिस्थायिनामपि धर्माः भवितुं नार्हन्ति। तेन मम्मटादीनां मतमसङ्गतम्।

**गुणस्वरूपनिरूपणे जगन्नाथस्य विशेषत्वम्-**

जगन्नाथमते प्रयोजकतासम्बन्धेन गुणाः रसे विद्यन्ते। तेनोदीरितम्-

"प्रयोजकतासम्बन्धेन द्रुत्यादिकमेव वा
माधुर्यादिकमस्तु।"[7]

अर्थाद् द्रुति-दीप्ति-विकासचित्तवृत्तयो हि क्रमेण माधुर्यौजःप्रसादगुणाः, रसस्तु तेषां प्रयोजकः।

मम्मटाचार्यादीनामिव पण्डितराजमते गुणः त्रिविधः, यथा- माधुर्यम्, ओजः, प्रसादश्च। एतेषु माधुर्यं भवति द्रुत्यात्मकम् अर्थात् कोमलप्रकृतिः। मम्मटाचार्यमते-

"आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्।
करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्।"

ओजो भवति दीप्त्यात्मकम्। मम्मटाचार्य आह-

"दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः।[8]
वीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च॥"[9]

---

[4] तैत्तिरीयोपनिषद् ब्रह्मानन्दवल्ली ७/२

[5] साहित्यदर्पणः३/२

[6] रसगंगाधरः, सम्पा. श्री मदनमोहन झा, १/२२६ पृ.

[7] तदेव २२७ पृ.

[8] काव्यप्रकाशः ८/९२

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

प्रसादश्च विकासात्मकः। मम्मटाचार्य आह-

"श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत्।
साधारणः समग्राणां स प्रसादो गुणो मतः॥"[10]

मूलतः तेषां मते द्रुत्यादि-रसयोर्मध्ये कार्यकारणभावो विद्यते। अर्थात्

शृङ्गारो द्रुतेः कारणम्।

करुणो द्रुतेः कारणम्।

शान्तो द्रुतेः कारणम्।

वीरो दीप्तेः कारणम्।

वीभत्सो दीप्तेः कारणम्।

रौद्रो दीप्तेः कारणम्।

अद्भुतो विकासस्य कारणम्।

हास्यो विकासस्य कारणम्।

भयानको विकासस्य कारणमिति।

परन्तु जगन्नाथमते रसो द्रुत्यादीनां माधुर्यादीनां वा न जनकः, अपि तु प्रयोजकः। यतो रसे द्रुत्यादयो माधुर्यादयो वा नैव विद्यन्ते। सांख्यदर्शनानुसारेण कार्यमुत्पत्तेः पूर्वं कारणे विद्यते। आत्मस्वरूपरसे गुणाभावाद् रसो द्रुत्यादीनां माधुर्यादीनां वा न जनकः, अपि तु प्रयोजक एव। यतः प्रयोजकतासम्बन्धे कस्यापि पदार्थस्य कस्मिंश्चिद् पदार्थे विद्यमानता नावश्यकी। प्रयोजकः इत्युक्ते प्रेरकः।

प्रयोजको जनक एव भवेदिति वक्तुं न शक्यते। एतद्विषये उदाहरणं दीयते यथा- प्रयोजककर्ताविधायकं पाणिनिसूत्रं भवति- "तत्प्रयोजको हेतुश्च"[11] सूत्रेणानेन विधीयते यत् कर्तुः प्रयोजको यः स हेतुसंज्ञः कर्तृसंज्ञश्च भवति। भट्टोजिदीक्षितेनोक्तम्-

"कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात्"। यथा- यज्ञदत्तो देवदत्तेन कटं कारयति।

अत्र देवदत्तः कटं करोति, यज्ञदत्तो देवदत्तं कटसम्पादने प्रयुङ्क्ते। यज्ञदत्तस्तु कटं न करोति। अर्थाद् यज्ञदत्तः कार्यप्रेरकः, न तु कार्यजनकः।

अनेन एतदवगम्यते यत् प्रयोजकः कार्यजनको न भवति। एतद्व्यतिरिच्य दर्शनशास्त्रेऽपि प्रयोजकशब्दस्य प्रयोगः परिलक्ष्यते, यथा- तर्कभाषाग्रन्थे आचार्यकेशवमिश्रः अनुमानविषये आलोचनावसरे प्रयोजकशब्दं प्रयुङ्क्ते। यथा- "प्रयोजकश्चोपाधिरित्युच्यते।"[12]

अत्र प्रयोजकपदस्यार्थो भवति अनुमापकः, न तु जनकः। अनुमापक-जनकयोः मध्ये वैसादृश्यमस्ति। अनुमितेः य उत्पादको भवति, सोऽनुमापकः। जनकश्च भवति उत्पत्तेः कर्ता। यथा- "पर्वतो वह्निमान् धूमात्" इत्यस्मिन् अनुमितिवाक्ये धूमो वह्नेः अनुमापकः, न तु जनकः। यतो धूमाद् वह्नेः अनुमितिः भवति। परन्तु वह्निः धूमस्य जनकः। अतः जनकः अनुमापकश्च भिन्नौ शब्दौ।

अपि च "मैत्रीतनयः श्यामो मैत्रीतनयत्वात्" इत्यस्मिन् अनुमाने उक्तं श्यामत्वे मैत्रीतनयत्वं न प्रयोजकम्, अपि तु शाकाद्यन्नपरिणतिभेद एव प्रयोजकः। अत उक्तम्- "प्रयोजकश्चोपाधिः"। अत्रापि प्रयोजको

---

[9] तदेव ८/९३

[10] तदेव ८/१०१

[11] अष्टाध्यायी-१.४.५५

[12] तर्कभाषा पृ. १४६

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

कार्यजनको न भवति, अपि तु कार्यस्यानुमापको भवति।

आलोच्यस्थले निर्गुणत्वाद् रसो द्रुत्यादीनां माधुर्यादीनां वा जनको भवितुं नार्हति। अतो जगन्नाथमते रसो द्रुत्यादीनां माधुर्यादीनां वा प्रयोजकः।

**उदाहरणम्**-

गुणस्वरूपमुल्लिख्य ग्रन्थकारेण लौकिकोदाहरणं प्रदीयते- "वजिगन्धोष्णा"। 'असगन्धः उष्णः' इति व्यवहारो दृश्यते। परन्तु असगन्धे (औषधे) उष्णता नैव विद्यते। तर्हि व्यवहारोऽयं कथमुपपद्यते? एतद्विषये उच्यते असगन्धः उष्णतायाः प्रयोजको भवति, न तु जनकः। अत्र प्रयोजकतासम्बन्धेन असगन्धः उष्णतायाः आश्रयो भवति। तेन 'असगन्धः उष्णः' इति व्यवहार उपपद्यते।

एवमेव प्रयोजकतासम्बन्धेन रसो द्रुत्यादीनामर्थाद् माधुर्यादिगुणानामाश्रयो भवति। तेन 'रसो मधुरः' इत्यादिव्यवहाराः उपपद्यन्ते।

अत्र मूलाभिप्रायो हि मधुररसास्वादेन चित्तं द्रवीभूतं गलितं वा भवति, ओजस्विरसास्वादेन चित्तम् उद्दीप्तं भवति, प्रसादगुणोपेतरसास्वादेन चित्तं विकशितं भवति।

**अतिव्याप्तिदोषनिराकरणपूर्वकं गुणलक्षणस्य प्रतिस्थापनम्**-

द्रुत्यादिकं प्रयोजकतासम्बन्धेन रसे विद्यते, तथैव अदृष्टकालादौ अपि स्थातुं शक्यते। यतो हि अदृष्टकालादयः कार्यमात्रस्य प्रयोजकाः भवन्ति। किञ्च तेषां करुणां विना जगति किमपि कार्यं नोत्पद्यते। अतः द्रुत्यादीनां प्रयोजकत्वं तेषु अवश्यं स्वीकरणीयम्। तेन अदृष्टो मधुरः-इत्यादिव्यवहारो भवितुमर्हति।

अस्याः अतिव्याप्तेः समाधाने ग्रन्थकारेणोच्यते- रसे विद्यमाना द्रुत्यादिप्रयोजकता असाधारणा, परन्तु अदृष्टादिषु विद्यमाना द्रुत्यादिप्रयोजकता साधारणा। उक्तस्थले असाधारणप्रयोजकता स्वीकरणीया। एतद्विषये जगन्नाथ आह-

"प्रयोजकत्वं चादृष्टादिविलक्षणं शब्दार्थ-रस-रचनागतमेव ग्राह्यम्, अतो न व्यवहारातिप्रसक्तिः।"[13]

**शब्दार्थरचनानां गुणप्रयोजकत्वम्**-

रसो यथा गुणानां प्रयोजकः, तथैव शब्दार्थरचनाः अपि गुणानां प्रयोजकाः। तेन शब्दो मधुरः, रचना मधुरा इत्यादिव्यवहाराः अनायासेनोपपद्यन्ते।

**उपसंहारः**

पण्डितराजजगन्नाथकृतं गुणस्वरूपं मौलिकं युक्तिपूर्णञ्च। पूर्वालङ्कारिकाणां गुणस्वरूपापेक्षया गुणलक्षणस्यास्य विशेषत्वम् अवश्यमेव अस्ति। उपर्युक्तव्याख्यामाधारीकृत्य पण्डितराजकृतस्य गुणस्वरूपस्य सर्वाधिकप्राधान्यं स्वीकरणीयमिति मन्ये।

13 रसगंगाधरः, सम्पा. श्री मदनमोहन झा, १/२२८ पृ.

## सहायकग्रन्थसूची


- *(२०१९) उपनिषद्*। गोरक्षपुरः, गीताप्रेस।
- केशवमिश्रः। (२०१३)। *तर्कभाषा*। सम्पादकः गङ्गाधरकरन्यायाचार्यः। कलिकाता, यादवपुर-विश्वविद्यालय प्रकाशना।
- जगन्नाथः।(२०१७)। *रसगङ्गाधरः*। सम्पादकः नारायणमिश्र-शशीनाथझा। वाराणसी, चौखाम्बाकृष्णदास एकाडेमी, पुनर्मुद्रितः।
- जगन्नाथः।(२०११)। *रसगङ्गाधरः*। सम्पादकः मदनमोहनझा-वदरीनाथझा। वाराणसी, चौखाम्बा विद्याभवन, पुनर्मुद्रितः।
- पाणिनि। (२०१२)। *अष्टाध्यायी*। सम्पादकः तपनशङ्करभाट्टाचार्यः। कलिकाता, संस्कृतवुकडिपो, पुनर्मुद्रितः।
- भरतः।(२०१४)। *नाट्यशास्त्रम्*। सम्पादकः सुरेशचन्द्रवन्द्योपाद्यायः। कलिकाता, नवपत्र प्रकाशन, , षष्ठमुद्रनम्।
- मम्मटाचार्यः। (१४१७)। *काव्यप्रकाशः*। सम्पादकः विपद्भञ्जनपालः। कलिकाता, संस्कृतपुस्तकभाण्डारः, प्रथमप्रकाशः।
- मम्मटाचार्यः। (२०१६)। *काव्यप्रकाशः*। सम्पादकः सत्यनारायणशास्त्री खण्डुडी। वाराणसी, चौखाम्बाकृष्णदास एकाडेमी, द्वितीयसंस्करणम्।
- वामनाचार्य। (२०१६)। *काव्यालंकारसूत्रवृत्तिः*। सम्पादकः सुमितावसु। सुमिता वसु। कलिकाता, बि एन् पावलिकेशन्, प्रथमसंस्करणम्।
- विश्वनाथः।(२०१३)। *साहित्यदर्पणः*। सम्पादकः विमलाकान्तमुखोपाध्यायः। कलिकाता, संस्कृतपुस्तकभाण्डारः, द्वितीयसंस्करणम्।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# नाट्यकारभासस्य स्वाभिनव-नाट्यकौशलम्

**सत्येन्द्रनाथ-आदकः**

**शोधच्छात्रः, संस्कृतविभागः, राँचीविश्वविद्यालयः**

**राँची, झाडखण्डः**

**प्रबन्धसारः**

***“भासो हासः सरस्वत्या नाटकैरमृतौपमैः।***

***नाट्यवाङ्मयव्योमेन्दुः शास्त्रज्योतिर्विभास्वरः”॥[१]***

*रत्नप्रसविनी इयं अस्माकं भारतभूमिः। अस्यां बहवः कृतिनो कवयः जनिं लब्ध्वा भारतभूमिं गौरवेण समलङ्कृतवन्तः। तैः संस्कृतसाहित्यभारती सुजला श्यामला सञ्जाता। तेषु प्रथितयशा नाट्यकारः भासः संस्कृतसाहित्याकाशे जाज्वल्यमानो ज्योतिष्क आसीत्। भासः मानव-हृदय-विकार-मर्मज्ञः, तथा प्रकृतिवर्णनस्य महान् शिल्पी, रसालङ्कारयोः कलापक्षस्य च प्रियः कविरिति प्रतिभाति। कविः त्रयोदशरूपकाणि संस्कृतवाङ्मयाय उपहरति। आधुनिककालेऽपि तस्य नाट्यकलां कविताशैलीञ्च दृष्ट्वा काव्यरसिकाः मोदन्ते। सः संस्कृतसाहित्ये यदा नाटकं लिखितुं प्रारब्धवान् तदा नासीत् संस्कृतसाहित्ये कस्यापि तादृशं नाटकं यदवलोक्य तन्निर्दिष्टनाट्यकलां गृहीत्वा नाटकं रचयितुं शक्नुयात्। तस्य कृतिषु या नाट्यकला सा स्वात्मभूता। अतः महाकविः कालिदासः अस्य वैशिष्ट्यं मुक्तकण्ठेन मालविकाग्निमित्रस्य प्रस्तावनायां सप्रशंसति। तद्यथा- **“प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमान-कवेः कालिदासस्य कृतौ कथं बहुमानः”** इति। अधुना कवेः नाटकविषयाणामुपरि चर्चा विधास्याते।*

**“भासो हासः सरस्वत्या नाटकैरमृतौपमैः।**

**नाट्यवाङ्मयव्योमेन्दुः शास्त्रज्योतिर्विभास्वरः”॥**[1]

रत्नप्रसविनी इयम् अस्माकं भारतभूमिः। अस्यां बहवः कृतिनः कवयः जनिं लब्ध्वा भारतभूमिं गौरवेण समलङ्कृतवन्तः। तैः संस्कृतसाहित्यभारती सुजला श्यामला सञ्जाता। तेषु प्रथितयशा नाट्यकारः भासः संस्कृतसाहित्याकाशे जाज्वल्यमानो ज्योतिष्क आसीत्। भासः मानव-हृदय-विकार-मर्मज्ञः, तथा प्रकृतिवर्णनस्य महान् शिल्पी, रसालङ्कारयोः कलापक्षस्य च प्रियः कविरिति प्रतिभाति। कविः त्रयोदश रूपकाणि संस्कृतवाङ्मयाय उपहरति। आधुनिककालेऽपि तस्य नाट्यकलां कविताशैलीञ्च दृष्ट्वा काव्यरसिकाः मोदन्ते। सः संस्कृतसाहित्ये यदा नाटकं लिखितुं प्रारब्धवान् तदा नासीत् संस्कृतसाहित्ये कस्यापि तादृशं नाटकं यदवलोक्य तन्निर्दिष्टनाट्यकलां गृहीत्वा नाटकं रचयितुं शक्नुयात्। तस्य कृतिषु या नाट्यकला सा स्वात्मभूता। अतः महाकविः कालिदासः

[1] संस्कृतनिबन्धशतकम्,पृ-१५०

अस्य वैशिष्ट्यं मुक्तकण्ठेन मालविकाग्निमित्रस्य प्रस्तावनायां सप्रशंसति। तद्यथा-"**प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य कृतौ कथं बहुमानः**"[2]। अपि च संस्कृतसाहित्यस्यामरो गीतिकारः श्रीजयदेवः कवेः कवितां सप्रशंसयन् लिखितवान् -

"यस्याश्चोरश्चिकुरनिकरः कर्णपुरो मयूरः।
भासो हासः कविकुलगुरुः कालिदासो विलासः"॥[3]

महामहोपाध्यायः गणपतिशास्त्री १९११ खीष्टीयवर्षे दक्षिणभारतस्य त्रिवेन्तमनगरे कवेः भासस्य त्रयोदशनाटकानि आविष्कृतवान्। एतानि त्रयोदशनाटकानि कथानुसारं चतुर्षु वर्गेषु विभज्यन्ते-

१.**रामायणाश्रितरूपकम्-** अस्मिन् वर्गे प्रतिमानाटकम्, अभिषेकनाटकञ्चेति नाटकद्वयं भवति।

२. **महाभारताश्रितरूपकम्**- अस्मिन् वर्गे बालचरितम्, ऊरुभङ्गम्, दूतघटोत्कचम्, दूतवाक्यम्, कर्णभारम्, मध्यमव्यायोगः, पञ्चरात्रं चेति सप्त रूपकाणि वर्तन्ते।

३. **बृहत्कथाश्रितरूपकम्**-अस्मिन् वर्गे प्रतिज्ञायौगन्धरायणं स्वप्नवासवदत्तञ्चेति द्वे रूपके स्तः।

४.**सामाजिकरूपकम्**- अस्मिन् वर्गे अविमारकम्, चारुदत्तं च रूपकद्वयं विद्यते।

तस्य रूपकेषु सूक्ष्मं हासं, कल्पनाचातुर्यं प्रचलितकथासु नाटकीयदृष्ट्या आवश्यकं परिवर्तनञ्च दृश्यते। कवेः भाषितभाषाप्रयोगः भाषासौष्ठवं, सरला किन्तु सरसा शैली, रसपरिपाकः कथाप्रवाहः कल्पात्मकप्रवृत्तिः, रुचिः, संस्कृतिः चेति सर्वमपि नाटकीयं परिवर्तनं सूचयति। महाकविः वाणभट्टः हर्षचरिते कवेः भासस्य रूपकाणां स्वीयमेव वैशिष्ट्यं दृष्ट्वा एवमुक्तवान्-

"सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः।
सपताकैर्यशो लेभे भासो देवकुलैरिव॥"[4]

भासस्य रूपकेषु 'स्वप्नवासवदत्तम्' इति रूपकं सर्वगुणान्वितम्। षष्ठस्वङ्केषु विभक्तमिदं रूपकम्। इदमाख्यानं बृहत्कथायां समुपलभ्यते। अत्र उदयनस्य वासवदत्तायाश्च प्रेमलीला वर्णिता अस्ति। अत्र कविः भासः पात्राणां चरित्रचित्रणे नाट्यकलायाः अद्भुतं चित्रं चित्रयति। विशुद्धस्य प्रेम्णः यादृशं वर्णनं भासेन कृतं, तादृशं संस्कृतसाहित्ये सुदुर्लभम्। अपि च, तस्य भाषा विचित्रास्ति। लघ्वपि वाक्यं विचित्रं भावार्थं द्योतयति। स्वप्नवासवदत्तमेव संस्कृतसाहित्यस्य जाज्वल्यमानं रत्नम्। अतः कविः राजशेखरः स्वप्नवासवदत्तं नाम्नैव स्मरति। तद्यथा-

"भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम्।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः॥"[5]

नाटकानामेतेषां प्रणेता नाट्यकारः भास एव रूपकाणां वैशिष्ट्यं विज्ञापयति-

---

[2] मालविकाग्निमित्रम् (प्रथमोऽङ्कः)

[3] अभिज्ञानशकुन्तलम् (भूमिका),पृ-४२

[4] संस्कृत साहित्येर इतिवृत्त ,पृ-३१०

[5] संस्कृत साहित्येर इतिवृत्त,पृ-३१०

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

(क) सर्वाणि रूपकाणि हि सूत्रधारकृतारम्भाणि वर्तन्ते। नाटके तु प्रथमं नान्दीपाठः भवति। ततः सूत्रधारस्य प्रवेशः संलक्ष्यते- "नान्द्यन्ते ततः प्रविशति सूत्रधारः।"[6]

(ख) भासस्य रूपकेषु प्रस्तावनाशब्दस्थाने 'स्थापना' पदप्रयोगः विद्यते। तत्र तद्भिन्ननाट्यकारैः आमुखं प्रस्तावना वा इति पदं प्रयुक्तम्। कवेः रूपकेषु प्रस्तावनायां ग्रन्थकर्तुः नामोल्लेखः नास्ति। स्थापनायां रूपकस्यापि नाम निर्दिष्टं नास्ति। तद्यथा-

"भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः।
धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः॥"[7]

(ग) नाटकेषु प्ररोचनाभावः अर्थात् नाट्यकारस्य परिचयप्रसङ्गः स एव प्रस्तावनाया आदिभागो यत्र कवेः कृतेश्च परिचयो दीयते यथा रूपकान्तरेषु दृश्यते। एतद्भिन्ननाट्यकारैः परिचयप्रसङ्गः प्रस्तावनायाः पूर्वं प्रदीयते। तद्यथा मुद्राराक्षसे – 'अद्य सामन्तवटेश्वरदत्तपौत्रस्य महाराजपदभाक्पृथुसूनोः कवेर्विशाखदत्तस्य कृतिः मुद्राराक्षसं नाम नाटकं नाटयितव्यम्'[8] इति।

(घ) कविः कतिपयेषु रूपकेषु विशेषतः प्रतिज्ञायौगन्धरायण-स्वप्नवासवदत्त-पञ्चरात्र-ऊरुभङ्गप्रतिमानाटकादिषु प्रथमे श्लोके मुद्रालङ्कारं प्रयुङ्क्ते। यत्र हि नाटकीयमुख्यपात्राणां नामोल्लेखः वर्तते। यथा स्वप्नवासवदत्ते-

"उदयनवेन्दुसवर्णावासवदत्ताबलौ बलस्य त्वाम्।
पद्मावतीर्णपुर्णौ वसन्तकम्रौ भूजौ पाताम्॥"[9]

अपि च प्रतिमानाटके नान्दीपाठे राम-सीता-लक्ष्मण-भरत-सुग्रीवादीनां नामानि श्लोकेन समावेशितानि। तद्यथा-

"सीताभवः पातु सुमन्त्रतुष्टः सुग्रीवरामः सहलक्ष्मणश्च।
यो रावणार्यप्रतिमश्च देव्या विभीषणात्मा भरतोऽनुसर्गम्॥"[10]

(ङ) भासस्य नाटकेषु मौलिकता कल्पनावैचित्र्यं च उपलभ्यते। कविः स्वनाट्यकृतिषु मङ्गलाचरणस्यान्तिमे समानशब्दान् समानवाक्यानि समानपद्यानि च प्रयुक्तवान्। अभिषेकोरुभङ्गबालचरितदूतवाक्यदूतघटोत्कच स्वप्नवासवदत्तेषु च निम्नलिखितं वाक्यं दृश्यते। यथा-**'एवमार्यमिश्रान् विज्ञापयामि। अये किं नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते**। **अङ्ग**। **पश्यामि।**'[11]

(च) नाटकान्ते सामाजिकेभ्यः नृपाय च आशीर्वादः प्रदीयते। अपि च देशस्य नृपस्य सामाजिकानाञ्च शान्तिकामना वर्तते। तदेव भरतवाक्यम्। भासस्य रूपकेषु प्रायशः भरतवाक्यं समानमेव दृश्यते। यथा-

"इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः॥"[12]

(छ) रूपकेषु घटनानां सार्थकता, भावानुभूतीनां दृश्यानाञ्च निरूपणे उत्कृष्टं कवित्वं दृश्यते।

---

6 स्वप्नवासवदत्तम् (प्रथमोऽङ्कः)

7 स्वप्नवासवदत्तम्-१/२

8 मुद्राराक्षसम्(प्रथमोऽङ्कः)

9 स्वप्नवासवदत्तम् १/१

10 संस्कृतनिबन्धशतकम्,पृ-१५१

11 स्वप्नवासवदत्तम् (प्रथमोऽङ्कः)

12 स्वप्नवासवदत्तम् (भरतवाक्यम्)६/१९

ऊरुभङ्गे दुर्योधनस्य चरित्रचित्रणे कविः कथनीयामेव सफलतामवाप्नुवत्। सः ऊरुभङ्गनाटके मृत्युदृश्यम् उपस्थापयति। अतः कविः नाट्यमञ्चं परिचालयति। तद्यथा- **'काञ्चुकीयो यवनिकास्तरणं करोति'**[13]। अपि च स्वप्नवासवदत्ते शयनदृश्यं वा निद्रादृश्यं परिलक्ष्यते। यथा-**'शय्यायामवसुप्तं मां बोधयित्वा सखे ! गता।'**[14]

(ज) तस्य कृतिषु समान एव श्लोकांशः दृश्यते। स्वप्नवासवदत्तम्, अभिषेकनाटकम् इति नाटके- **'किं वक्ष्यतीति हृदयं परिशङ्कितं मे'**। एवञ्च चारुदत्ते बालचरिते च –**'लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः'**, स्वप्नवासवदत्ते प्रतिज्ञायौगन्धरायणे-**'भरतानां कुले जातः'**, प्रतिज्ञायौगन्धरायणं च अभिषेके- **'धर्मस्नेहान्तरे न्यस्ता दुःखिताः खलु मातरः'**[15] इति।

(झ) एषु नाटकेषु बहवोऽपाणिनीयाः शब्दप्रयोगाः प्राप्यन्ते। यथा-'अपृच्छामि', 'धरन्ते', 'रक्षते' इत्यादयः। तद्यथा स्वप्नवासवदत्ते- **'अपृच्छामि भवन्तौ।'**[16] 'कर्णभारम्' इति रूपके- **'हतेषु देहेषु गुणाः धरन्ते'**[17] इति।

(ञ) साम्प्रतिकालं यावद् समुपलब्धं संस्कृतवाङ्मयं नाटकानां बाहुल्येन, विषयवैविध्येन, अभिनयोपयोगित्वेन च तस्य शैली, वर्णना यथार्थता, घटनासंयोजनसौष्ठवम्, कथाप्रसङ्गस्याविच्छिन्नश्च प्रवाहः विद्यते। तस्य शैल्यां माधुर्यौजःप्रसादानां त्रयाणां गुणानामपि समाहारः भवति। यथा जटायुषे क्रुद्धस्य रावणस्योक्तिः-

**'मद्भुजाकृष्टनिस्त्रिंशकृत्तपक्षक्षतच्युतैः'**[18]। एवञ्च भासस्य नाटकेषु उपमा-रूपक-उत्प्रेक्षालङ्काराणां प्रयोगः वर्तते। अपि च तस्य रचनाशैली रामायण महाभारतादिकाव्यानुसृता भवति। अतः रचनाशैल्यां कृत्रिमतायाः क्लिष्टतायाः कल्पनायाः समासाधिक्यस्य च अभावः संलक्ष्यते। कवेः मनोवैज्ञानिकं विवेचनम् अतीव मनोहरम्। तद्यथा स्वप्नवासवदत्ते-

"दुःखं त्यक्तं बद्धमूलोऽनुरागः
स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्।
यात्रा त्वेषा यद् विमुच्येह वाष्पम्
प्राप्तानृण्या याति बुद्धिः प्रसादम्॥"[19]

तस्य नाटकेषु भारतीयसामाजिकपरम्पराभावना प्राप्यते। यथा पितृभक्तिः पातिव्रत्यम्, भ्रातृप्रेम, क्षमाशीलता, त्यागश्च वर्ण्यते प्रतिमानाटके-

"अनुचरति शशाङ्कं राहुदोषेऽपि तारा
पतति च वनवृक्षे याति भूमिं लता च।
त्यजति न च करेणुः पङ्कलग्नं गजेन्द्रं
व्रजतु चरतु धर्मं भर्तृनाथा हि नार्यः॥"[20]

अतः नाटकपथप्रवर्तकेषु भासः सर्वाग्रणीरिति मन्यते।

---

13 संस्कृत साहित्येर इतिवृत्त,पृ-१४१

14 स्वप्नवासवदत्तम् –५/८

15 संस्कृत साहित्येर इतिवृत्त ,पृ १४१

16 स्वप्नवासवदत्तम् (प्रथमोऽङ्कः)

17 संस्कृतसप्तकम्,पृ१७०

18 संस्कृतनिबन्धशतकम्,पृ.१४२

19 स्वप्नवासवदत्तम् ४/६

20 संस्कृतनिबन्धशतकम्,पृ.१४२

(ट) कवेः नाटकेषु मौलिकतायाः या कल्पना वैचित्र्यञ्च उपलभ्यते तत्तु नाट्यशास्त्रानुसारं वैशिष्ट्येषु न वर्तते। रूपकेषु प्रात्यहिकलोकजीवनस्य सुखं, दुःखं, आनन्दवेदना वर्णिता भवति। एवञ्च रूपकं नवरसेन रञ्जितं भवेत्। साहित्यदर्पणानुसारं रूपकस्य अङ्कसंख्या-'**पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः**'[21]। अर्थात् नाट्याङ्कानि पञ्चसंख्यकात् दशपर्यन्तमेव सीमितानि स्युः। न्यूनातिन्यूनं पञ्च तथा अधिकाधिकतया दशः भवेत्। परन्तु कवेः बहुषु रूपकेषु एकः अङ्कः, त्रयः अङ्काः, चत्वारः अङ्काश्च वर्तन्ते। यथा 'कर्णभारम्', 'दूतवाक्यम्' 'दृतघटोत्कचम्', 'ऊरुभङ्गम्' चैतानि रूपकाणि एकाङ्कविशिष्टानि। 'पञ्चरात्रम्' हि त्रिषु अङ्केषु, 'चारुदत्तम्' च चतुर्षु अङ्केषु विभक्तम्।

(ठ) रूपकेषु नायकः रामायणमहाभारतादि प्रसिद्धः राजर्षिः, धीरोदात्तः, दिव्यः, अदिव्यो, दिव्यादिव्यः वा देवगुणसम्पन्नः मानवश्च भवेत्। कविराजविश्वनाथेन उक्तम्-

"प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।
दिव्योऽथ दिव्यादिव्यो वा गुणवान् नायको मतः॥"[22]

परन्तु चारुदत्ते अविमारके च एतत्सदृशः नायकः नास्ति। अविमारके नायकः अज्ञातपरिचयविशिष्टः चण्डालयुवकः, चारुदत्ते च ब्राह्मणः। पुनश्च चारुदत्ते नायिका वारवनिता भवति। अस्मिन् रूपके वसन्तसेनाख्यया वारवनिताया सह चारुदत्तस्य प्रेमनिवेदनप्रसङ्गः वर्णितोऽस्ति। यद्यपि रूपके कुलललना कुलजा-साध्वीगुणसम्पन्ना नायिका भवेत्। तथापि चारुदत्ते नायिका वसन्तसेना वारवनिता भवति। एतादृशस्वकीय-वैशिष्ट्येन समुल्लसितम् अपूर्वमिदं नाटकं भासस्य चरमकृतिः।

(ड) '**लोकवृत्तानुकरणं नाट्यम्**' इत्यनुसारं नाटकं दर्शकानां सकोमलवृत्तिं प्रति हानिकरं न किञ्चित् नाटकादिषु प्रदर्शनीयम्। फलतः नाटके दुराह्वानं युद्धविग्रह-हत्या-मृत्यु-रक्तपात-राष्ट्रविप्लवादिकं न दर्शनीयं भवेत्-

"दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः।
विवाहो भोजनं पाशोत्सर्गौ मृत्युं रतं तथा॥"[23]

एवं सत्यपि ऊरुभङ्गनाटके पाञ्चालीपरिभवस्य प्रतिक्रियारूपेण गदायुद्धे प्रवृत्तः भीमसेनः। तत्रोभयोः युद्धे दुर्योधनस्य ऊरुभङ्गस्य दृश्यं परिलक्षितम्। एतत्तु न मञ्चाभिनेयम् एव दर्शनीयम्। सम्भवतः इदमेव हि संस्कृतसाहित्ये प्रथमं दुःखात्मकनाटकम्।

(ढ) एवञ्च नाटके मञ्चे रतिक्रिया ओष्ठ्यादौ दन्ताघातो नखाघातः, अन्यच्च यत् यत् लज्जाजनकं शयनाधरपानादि, नगरादिप्रतिरोधनं स्नानम् अनुलेपनम् इत्यादीनि न वर्णनीयानीति साहित्यदर्पणे उक्तं तद्यथा -

"दन्तच्छेद्यं नखच्छेद्यमन्यद्व्रीडाकरञ्च यत्।
शयनाधरपानादि नगराद्यवरोधनम्॥"[24]

तथापि स्वप्नवासवदत्ते शयनदृश्यं वर्तते। यदा राजा उदयनः समुद्रगृहे पद्मावतीं न दृष्टवान्, तदा

---

[21] सहित्यदर्पणम्(६ )पृ .६

[22] सहित्यदर्पणम्(६ )पृ .३

[23] सहित्यदर्पणम्(६ )पृ .६

[24] सहित्यदर्पणम्(६ )पृ .६

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

सः शय्यायां सुप्तः। वासवदत्तापि तत्रागत्य किञ्चित्कालं स्थित्वा राज्ञः प्रलम्बमानं हस्तमुत्थाप्य शय्यायां सुप्ता। यदा स उदयनः जागरितः तस्मिन् समये वासवदत्ता स्थानात् प्रस्थिता। तद्यथा-'शय्यायामवसुप्तं मां बोधयित्वा सखे! गता।'[25]

(ण) प्रकरणस्य इतिवृत्तं लौकिकं कविकल्पितं वा भवेत्। दर्पणकारेण विश्वनाथेन उक्तम्-'**भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्**।'[26] चारुदत्तं यद्यपि लोकप्रचलितं दृश्यकाव्यम् तथापि अस्य प्रकरणस्य प्रारम्भे माङ्गलिकश्लोकः, समाप्ते भरतवाक्यं न संलक्ष्यते। अस्य प्रकरणस्य चतुर्थाङ्के समाप्ते च '**अवसितं चारुदत्तम्**'[27] अर्थात् दृश्यकाव्यमिदम् अवसितं भवति। नाट्यशास्त्रानुसारम् अस्मिन् प्रकरणे महाकविभासेन नायकनायिकयोः मिलनं न सम्पादितम्।

(त) 'दुतघटोत्कचम्' इति महाभारताश्रितं दृशयकाव्यम्। एकाङ्कि नाटकम्। कविः भास इमं नाटकम् उत्सृष्टाङ्कं मन्यते। लक्षणानुसारं नाटकमिदं व्यायोगेष्वन्तर्गतम्। अस्यापि नाटकस्य समाप्ते भरतवाक्यं नास्ति। अत्र घटोत्कचस्य उक्त्या नाटकमिदं सम्पूर्णं भवति। तद्यथा –

"धर्मं समाचर कुरु स्वजनव्यपेक्षां
यत्काङ्क्षितं मनसि सर्वमिहानुतिष्ठ।
जात्यापदेश इव पाण्डरुपधारी
सुर्यांशुभिः सममुपैष्यति वः कृतान्तः॥"[28]

**उपसंहारः**

अधुना वयं जानीमो यत् प्रथितयशा नाट्यकारः भासः संस्कृतनाट्यसाहित्यस्य नवधाराप्रवर्तकः। कविः भासः नाट्यशास्त्रनिर्देशं बहुषु स्थानेषु लङ्घयति। अतः तस्य स्वकीयरूपकेषु विचित्रमेव वैलक्षण्यं विलसति। एवं सत्यपि कवेः गीः सूक्तिरिव सहृदयमनः प्रमोदयति। संवादाः श्रवणीयाः भवन्ति। अलङ्कारेषु उपमाः स्वभावोक्तयश्च नितरां स्नेहं निदधानाश्च प्रतिलक्ष्यन्ते। कवेः सर्वे गुणाः कृतिषु स्पष्टमेव विलोकिताः भवन्ति। वस्तुतो भासः संस्कृतनाट्यसाहित्ये हि स्वाभिनवनाट्यकौशलसम्पादने अद्वितीयरूपेण शोभते। कविदण्डिना उक्तं -

"सुविभक्तमुखाद्यङ्गैर्व्यक्तिलक्षणवृत्तिभिः।
परेतोऽपि स्थितो भासः शरीरैरिव नाटकैः॥"[29]

**सहायकग्रन्थाः**

- संस्कृत साहित्येर इतिवृत्त-ड.गोपेन्दु मुखोपाध्याय, इउनाइटेड वुक एजेन्सि, कोलकाता-०९
- संस्कृत साहित्येर इतिहास-धीरेन्द्रनाथ वन्द्योपाध्याय, पश्चिमबङ्ग-राज्य-पुस्तक पर्षत्

[25] स्वप्नवासवदत्तम् ५/८

[26] सहित्यदर्पणम्(६ )पृ १३७

[27] संस्कृत साहित्येर इतिवृत्त,पृ-१६२

[28] संस्कृत साहित्येर इतिहास,पृ-.१०६

[29] संस्कृत साहित्येर इतिहास,पृ -३१०

ISSN : 2583-2271
Vol. - 2, No. 1: 2022


- संस्कृत साहित्येर इतिहास- ड.देवकुमार दास, सदेश, कोलकाता-०६
- संस्कृतसाहित्येतिहासः-आचार्य लोकमणि दाहालः, चौखम्बा कृष्णदास अकादमी, वाराणसी
- संस्कृतनिबन्धशतकम्- ड.कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी
- स्वप्नवासवदत्तम्- ड. शान्ति वन्द्योपाध्याय, संस्कृत पुस्तक भाण्डार, कोलकाता-०६
- साहित्यदर्पण-ड.उदयचन्द्र वन्द्योपाध्याय, संस्कृत वुक डीपो, कोलकाता -६
- मुद्राराक्षसम् –पाण्डेय, पाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी

# जन्मबन्धस्वरूपविचारः

**दीपकमण्डलः**

**शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**नई दिल्ली-११००१६**

प्रमाणप्रमेयादिषोडशपदार्थतत्त्वज्ञानान्मुक्तिर्भवतीति नैयायिकानांसिद्धान्तः। परन्तु तत्र शङ्का उदेति किं तत्त्वज्ञानाव्यवहितोत्तरक्षणे मुक्तिर्भवति उत अन्यः कश्चिद्व्यापारो भवति? "निःश्रेयसाधिगमः - अपवर्गप्राप्तिः। तत् खलु निःश्रेयसः किं तत्त्वज्ञानानन्तरमेव भवति? नेत्युच्यते, किं तर्हि? तत्त्वज्ञानात्"[1] अर्थात् तत्त्वज्ञानान्तरमेव मोक्षो भवतीति नियमो नास्ति। तत्त्वज्ञानानन्तरं प्रारब्धकर्मफलानां भोगे जाते मोक्षो भवतीत्यर्थः। तथा च श्रुतिः "तस्य तावदेवचिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इति। स्मृतिश्च "नायुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इति। तत्त्वज्ञानाद् मिथ्याज्ञानादिनिवृत्तौ दोषादिदुःखान्तनिवृत्त्यापवर्गो भवति। अतः सूत्रकारः तत्त्वज्ञानादपवर्गप्राप्तिप्रकारं सूत्रयति- "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः"[2] इति। पदार्थतत्त्वज्ञानान्मिथ्याज्ञानस्य नाशः, मिथ्याज्ञानापाये रागद्वेषादिदोषापायः, मिथ्याज्ञानस्य दोषकारणत्वात् कारणनिवृत्तौ कार्यनिवृत्तेः प्रसिद्धत्वात्। दोषापाये धर्माधर्मलक्षणप्रवृत्तेरपायः, दोषाणां प्रवृत्तिकारणत्वात्। प्रवृत्तेरेव जन्मकारणत्वात् प्रवृत्त्यपाये जन्मापायः, जन्म शरीरसम्बन्धविशेषः। शरीरसम्बन्धमन्तरा दुःखनिवृत्तिरूपत्वात् जन्मन एव दुःखमूलत्वात् दुःखनाशे अपवर्गः मोक्षो भवति। अत्र सूत्रे जन्मशब्दस्य यः प्रयोगः दृश्यते तस्य किं स्वरूपमिति जिज्ञासायामुच्यते।

वस्तुतः अत्र सूत्रे जन्मशब्दस्यार्थः शरीरसम्बन्धः। भाष्यकारैस्तावत् जन्मनः लक्षणं कृतम्- "जन्म पुनः शरीरेन्द्रियबुद्धीनां निकायविशिष्टः प्रादुर्भावः" इति। अर्थात् शरीरेन्द्रियबुद्धीनां परस्परसम्बद्धानां यः प्रादुर्भावः स जन्म इति। गर्भतो मृतशरीरोत्पत्तावपि जन्मशब्दप्रयोगाभावात् शरीरादीनां परस्परसम्बद्धत्वं विशेषणम्। न्यायवार्तिककारैः प्रश्नमुखेन जन्मन इत्थं लक्षणं कृतम्-"किं पुनरात्मनो जन्म? निकायविशिष्टाभिः शरीरेन्द्रियबुद्धिवेदनाभिरपूर्वाभिरभि-सम्बन्धः"[3] इति। वाचस्पतिमिश्रैरपि सांख्यतत्त्वकौमुद्याम् ऊनविंशतिकारिकायाः जन्मस्वरूपनिरूपणावसरे निकायशब्दस्य प्रयोगः कृतः। न्यायवार्तिकस्य

---

[1] न्याभा. पृ.-13

[2] न्या. सू., 1/1/2

[3] न्या. वा., 3/1/1 सू. व्या., पृ. - 339-340

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

व्याख्यानावसरे मिश्रैरुच्यते -"निकायो देवमनुष्यतिर्यगादीनामनौत्तराधार्येणावस्थितः संघातः तद्विशिष्टाभिरित्यर्थः" इति। प्रवृत्तिसाधनौ धर्माधर्मौ कुत्सितस्याऽभिपूजितस्य च पूजितस्य च जन्मनः कारणम्। गौतमवृत्तौ विजातीयशरीराद्यप्राणसंयोगः जन्म इति जन्मलक्षणं प्रतिपादितं विद्यते।

**बन्धस्वरूपम्**

मोक्षशब्दस्यार्थो भवति बन्धनान्मुक्तिः। बन्धनाभावे सति मुक्तेः सार्थकत्वं नैव सम्भवति। जन्मसद्भावे मृत्योर्विद्यमानत्वम् जन्माभावे मृत्योः सद्भावत्वं कथमपि न सम्भवति। तथाहि- "बन्धत्वमपि चेन्मोक्षो बन्धाभावे क्व मोक्षता। मरणं यदि चेज्जन्म जन्माभावे मृत्युर्न चे"ति[4] श्रुतिः।

बन्धनस्य विद्यमानत्वे च मुक्तेः सद्भावत्वमतो बन्धनस्य नाश एव मुक्तिरिति पर्यवसितम्। बन्धनस्य किं स्वरूपमिति जिज्ञासायामुच्यते श्रुतिः-

"मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥"[5] इति।

अर्थान्मनसो विषयासक्तत्वमेव बन्धः। वासनया बन्धनमपि बन्धः। तथाहि – "बद्धो हि वासनाबद्धो मोक्षः स्यात् वासनाक्षयः"[6], "पदार्थभावनादाढ्यं बन्ध इत्यभिधीयते"[7] "द्रष्टुर्दृश्यस्य सत्ताऽत्र बन्ध इत्यभिधीयते"[8], "देहोऽयमिति संकल्पस्तद्बन्ध इति चोच्यत"[9] इति। एवञ्च देहादावात्मनोऽभिमानं बन्धस्तन्निवृत्तिश्च मोक्षः। प्रतिपादितमस्ति यत्- "अनात्मानं देहादीनामात्मत्वेनाभिमन्यते सोऽभिमान आत्मनो बन्धस्तन्निवृत्तिर्मोक्ष"[10] इति। पद्मपुराणे तावत् कर्मण उत्पत्तिर्बन्धः, सुखदुःखदायककर्मनाशश्च मोक्ष इति वर्णितम्।

"कर्मणाञ्च लयो मोक्षः सुखदुःखप्रदायिनाम्।
तदुत्पत्तिस्तु बन्धः स्यादित्यसौ शास्त्रनिर्णयः॥"[11] इति।

ऐतरेयोपनिषदि च- "भोगेच्छामात्रको बन्धस्तत्त्यागो मोक्ष उच्यत"[12] इत्युपलभ्यते। एतेन ज्ञायते यद्बन्धस्य सद्भावे मोक्षस्य सिद्धिः। बन्धनाभावे मोक्षस्य स्थितिरेव नास्तीति शास्त्रकारैर्यत्प्रपञ्चितं तत् सत्यमिति मे भाति।

तत्र नैयायिका इत्थं प्रतिपादयन्ति- यथोपनिषत्प्रमाणं स्वीकृत्य बन्धस्य सत्ता मोक्षार्थं स्वीकुर्वन्ति तथैव नैयायिकैरपि स्वीक्रियते। तथाहि प्रमाणादितत्त्वज्ञानानन्तरं साक्षान्मोक्षो नैव सम्भवत्यपि तु मिथ्यादिज्ञानानामपाये सति मोक्षः सम्भवति। उक्तञ्चसूत्रकारेण- "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग"[13] इति। एतेन परिचीयते

---

4 तेजोबिन्दूपनिषत् - 5/24

5 ब्रताबिन्दूपनिषत् - 3/2

6 मुक्तिकोपनिषत् - 2/6/8

7 महोपनिषत् - 2/41

8 योगवासिष्ठम् - 3/1/22

9 तेजोबिन्दूपनिषत् - 5/90

10 सर्वसारोपनिषत्- 1

11 पापुराणम् उत्तरखण्ड :- 204/23

12 ऐतरेयोपनिषत् - 4/35/3

13 न्यायसूत्रम् - 1/1/2

यदिह खलु जगद्दुःखपङ्कनिमग्नं भवति तत्रैकविंशतिदुःखानामात्यन्तिकी निवृत्तिर्मोक्षः। तादृशदुःखानामवाप्तिस्तु बन्धनात् सम्भवति। सत्यां बन्धननिवृत्तौ मोक्षस्य प्राप्तिः। अत एव भाष्यकारैः प्रतिपादितं यत्- "नित्यसुखरागस्याऽप्रहाणे मोक्षाधिगमाभावो रागस्य बन्धनसमाज्ञानादि"[14]ति।

अर्थात् बन्धनमोक्षयोरेकत्र विरुद्धत्वाद्बन्धनसमाज्ञातो हि रागः। न च बन्धने सत्यपि कश्चिन्मुक्त इत्युपपद्यते। अत एव बन्धनविषये श्रुतिवाक्यैर्यत् साधितं तदेव नैयायिकैरप्यभ्युपगतमिति। तथा च मिथ्याज्ञानादिदुःखान्तः संसारो बन्धः[15]।

14 न्यायभाष्यम् - 1 / 1 /22

15 न्यायभाष्यम्- 1/1/2

# गुणत्रयविचारः

**डॉ. नेपालदासः**

**सहायकाध्यापकः, केन्द्रियसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः**

**आगरतला, त्रिपुरा- ७९९२१०**

**प्रबन्धसारः**

*त्रिगुणात्मकमस्तीदं जगत्। गुणत्रयेणैव व्याप्तं भवति जगदिदम्। जगदि वैषम्यं केवलं गुणतारतम्यकारणादेव। गुणत्रयविषये भारततीयदर्शनशास्त्रेषु बहुत्र आलोच्यते। सांख्ये गुणत्रयविषये आलोच्यते। भगवद्गीतायां चतुर्दशोऽध्यायः गुणत्रयविभागयोगः। प्रत्येकस्मिन् जीवे गुणत्रयं वर्तते। येन तस्य व्यवहारः सम्भवति। अपि तु गुणत्रयवैचित्र्यकारणादेव स्थानविशेषे व्यवहारभेदः दृश्यते। गुणत्रये एव मनुष्याणां व्यवहारः निहितः अस्ति। अस्मिन् पत्रे गुणत्रयं, गुणत्रयस्य स्वरूपं, तेषां कार्यं, बन्धनिमित्तकञ्च कथं, कथं वा नियमनं, तस्य लक्षणं वा किं, गुणत्रयातिक्रमणस्योपायः, गुणातीतस्य आचारः, गुणातीतस्य लक्षणम्, गुणफलकथनम्, गुणानां लक्षणमित्यादिविषयाः प्रतिपाद्यन्ते।*

**कुञ्चीशब्दाः -** भक्तिः, सत्त्वः, रजः, तमः, प्रदीपः इति।

**उपद्घातः –**

अस्मिन् पत्रे आलोच्यते यत् समानः आत्मा द्रव्यद्वारा व्यक्तः सन् किमर्थं भिन्नभिन्नरूपेण प्रकटितो भवति। एकमेव जलं भिन्नभिन्नपात्रेषु स्थाप्यते चेत् तत्र जलस्य वर्णः जलकारणेन न परिवर्तते अपितु काचस्य वर्णनिर्मितं वर्णपरिवर्तनं जायते तथा च एकः शाश्वतः सिद्धान्तः द्रव्यनिर्माणतत्त्वानि समानान्यपि भिन्नभिन्नव्यक्तित्वेन विभिन्नेषु द्रव्यसाधनेषु भिन्नरूपेण अभिव्यक्तिं कुर्वन्ति। एताः मनोवृत्तयः तिस्रः सन्ति। यथा-

सत्त्वमाध्यात्मिकं, रजो भवति चञ्चलं, तमः आलस्यमिति। एते त्रयो गुणाः व्यक्तेः मनः बुद्धिं च भिन्न-भिन्न-समये भिन्न-भिन्न-प्रमाणेन प्रभावितं कुर्वन्ति । यद्यपि एते त्रयः अपि गुणाः सर्वेषु सर्वदा वर्तन्ते तथापि तेषाम् अनुपातो व्यक्तिभेदेन भिन्नो भिन्नो भवति।

**गुणत्रयम्-**

**<u>सांख्यानां मतम् –</u>**

**गुणानां साम्यावस्था प्रकृतिः** इति गुणानां स्वरूपवर्णनकाले गुणान् उपस्थाप्य साङ्ख्यदर्शनं वदति साङ्ख्याः गुणानां साम्यावस्थां प्रकृतिं स्वीकुर्वन्ति। इयं प्रकृतिः त्रिगुणात्मिका वर्तते। सत्त्वगुणः, रजोगुणः, तमोगुणश्चेति त्रयो गुणाः भवन्ति। यद्यपि एतेषां गुणानां स्वभावाः भिन्नाः भवन्ति तथापि सञ्चालयन्ति। एवं प्रकारेण

लयकालेऽपि मिलित्वा प्रकृतौ विलीनाः भवन्ति। साङ्ख्यदर्शनं गुणानेवं विवेचयति –

1. **सत्त्वगुणः**

"तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥"[1]

अयं सत्त्वगुणः पवित्रतायाः स्वच्छतायाश्च प्रतीकोऽस्ति। अस्य लक्षणं यथा –

"सत्त्वं लघु प्रकाशकमिष्टम्"
(साङ्ख्यकारिका-११) इति।

अर्थात् अस्य स्वरूपम् उद्दीप्तं, प्रकाशकं लघु च वर्तते। लघुगुणकारणात् वस्तुषु स्तोकत्वम् आगच्छति, विषयाश्च उर्ध्वं गच्छन्ति, वस्तूनि प्रकाशितानि जायन्ते, जलप्रवाहः सागरं प्रति अग्रेसरति, अग्निः ऊर्ध्वं ज्वलति, वायुः अनायासं प्रवहति। सत्त्वगुणैः सुखस्य उत्पत्तिः जायते। सत्यं, शान्तिः, प्रेम, श्रद्धा, विश्वासः, सरलताप्रभृतयो गुणाः सत्त्वगुणात् आविर्भवन्ति। सरलानुभूतिद्वारा परमानन्दस्य प्राप्तिर्जायते। अयं सत्त्वगुणः श्वेतवर्णयुक्तः भवति।

2. **रजोगुणः**

"रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥"[2]

उत्तेजनायाः चञ्चलतायाः, मलिनतायाश्च प्रतीकोऽस्ति रजोगुणः। सर्वदा चलचञ्चलः भवति अयं गुणः। तथापि एषः स्वप्रभावेन अन्यान् अपि गुणान् गतिशीलान् करोति। अस्य लक्षणम् ईश्वरकृष्णः इत्थं वदति। यथा-

"उपष्टम्भकं चलञ्च रजः।" इति।

अर्थात् एषः सक्रियः उपष्टम्भकः अर्थात् संश्लेषजनकः भवति। रजोगुणस्य प्रभावेन सर्वाः प्रवृत्तयः प्रभवन्ति। अयं स्वयमेव क्रियाशीलो भूत्वा अन्येष्वपि गुणेषु क्रियाशीलतां जनयति। तस्मात् इन्द्रियाणि स्वविषयोन्मुखानि भवन्ति। कामः, क्रोधः, अहङ्कारः, दर्पः, मोहः, मानं, दम्भः, द्वेषः इत्यादीन् गुणान् उत्पादयति। अस्य रक्तवर्णः अस्य रजोगुणस्य प्रभावेन मनुष्याणां प्रकृतिः चलचञ्चला, असन्तुलिता उद्वेलिता च भवति।

3. **तमोगुणः**

*"तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥"*[3]

ईश्वरकृष्णः तमोगुणस्य लक्षणं वदति यथा –

*"गुरुः वरणकमेव तमः।" इति।*

अर्थात् अयं गुरुः, वरणकः अर्थात् आच्छादकः अवरोधकश्चास्ति। किञ्च असौ सर्वदा अन्धकारेण अज्ञानेन वा आच्छादितः भवति। अयं तमोगुणः मलिनतायाः प्रतीकोऽस्ति। सुखदुःखयोः अवरोधम् उत्पादयति। अज्ञानता, उदासीनता, निद्रा, तन्द्रा, आलस्यं, मूर्च्छा, अकर्मण्यतादयो गुणाः विकसिताः भवन्ति। अयं कृष्णवर्णसंयुक्तः भवति।

गुणानां स्वरूपोपस्थापनप्रसङ्गे कार्याकार्यविषये च ईश्वरकृष्णः साङ्ख्यकारिकायां वदति यत् –

"प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।

[1] भगवद्गीता – 14.6

[2] भगवद्गीता – 14.7

[3] भगवद्गीता – 14.8

अन्योऽन्याभिभवाऽश्रयजननमिथुनवृत्तयश्च
गुणाः॥" इति।

एकैकं पदं व्याख्यायते –

**प्रीत्यप्रीतिविषादात्मकाः –**

सत्त्वं, रजः, तमः चेति त्रयो गुणाः। पुरुषोपभोगादिसाधनत्वेन अप्रधानत्वात् एतेषां गुणत्वं सिद्धं भवति। एते गुणाः प्रीत्यप्रीतिविषादात्मकाः। अर्थात् सुखदुःखमोहात्मकाः। एतेषु त्रिषु गुणेषु सत्त्वगुणः सुखात्मकः, रजोगुणः दुःखात्मकः, तमोगुणः मोहात्मकश्च भवति। अत्र सत्त्वगुणस्य लक्षणं प्रीत्यात्मकम् अर्थात् सुखात्मकं, रजोगुणस्य लक्षणम् अप्रीत्यात्मकम् अर्थात् दुखात्मकं, तमोगुणस्य लक्षणं विषादात्मकम् अर्थात् मोहात्मकं भवति।

**प्रकाशप्रवृत्तिनियमार्थाः –**

पुनश्च प्रकाशप्रवृत्तिनियमार्थाः इत्यत्र उक्तं यत् प्रकाशः अर्थात् बुद्धिवृत्तिविशेषः सत्त्वगुणस्य प्रयोजनं, कार्येषु प्रवृत्तिः रजोगुणस्य तथैव नियमः अर्थात् निरोधः तमोगुणस्य प्रयोजनम्। तस्मात् सत्त्वगुणः प्रकाशकः, रजोगुणः प्रवर्तकः तमोगुणः नियामकश्च भवति।

**अन्योऽन्याभिभवाऽऽश्रयजननमिथुनवृत्तयश्च गुणाः –**

**अन्योन्याभिभववृत्त** इति एषु गुणेषु अर्थवशात् स्वकार्यजननोन्मुखेन अन्यतमेन अन्यौ द्वौ अभिभूयेते। तथा हि यदा सत्त्वं स्वकार्योन्मुखं भवति तदा रजस्तमसी अभिभूय स्वगुणेन प्रीतिप्रकाशात्मकेन अवतिष्ठते। एवं रजः सत्त्वतमसी अभिभूय अप्रीतिप्रवृत्त्यात्मना धर्मेण, तथा तमः सत्त्वरजसी अभिभूय विषादस्थित्यात्मना धर्मेण अवतिष्ठते।

**अन्योन्याश्रयवृत्तयः** इत्यत्र आश्रयत्वम् उपकारकत्वं बोध्यं न तु आधाराधेयभावरूपम्।

एते त्रयो गुणाः **अन्योऽन्यजननवृत्तयोऽपि** भवन्ति। अर्थात् परस्परजननव्यापारवन्तः भवन्ति। जननं चात्र गुणानां सादृश्यरूपः परिणामः। सत्त्वगुणः रजस्तमसी स्वानुकूलतया परिणमयति, रजोगुणः सत्त्वतमसी, तमोगुणः सत्त्वरजसी च परिणमयति।

पुनश्च गुणाः **अन्योऽन्यमिथुनवृत्तयः** अर्थात् परस्परं सहचराः भवन्ति। सर्वदा एतेषां संयोगः जायते। वियोगः न कदापि दृश्यते। प्रत्येकस्मिन् वस्तुनि एतेषां त्रयाणां गुणानां समावेशः दृश्यते। अतः वस्तु त्रिगुणात्मकं भवति। स्त्रीपुरुषौ इव एते मैथुनेन सृष्टेः कारणभूताः भवन्ति। यथा प्रजापालने तत्परः कश्चन राजा दुष्टनिग्रहे शिष्टानां सुखम् उत्पादयति तथैव अत्र सत्त्वगुणः रजस्तमसोः वृत्तिहेतुः भवति रजः सत्त्वतमसोः वृत्तिं जनयति। तमोगुणश्च स्वावरणात्मकेन स्वरूपेण सत्त्वरजसोः वृत्तिं जनयति।

**गीतोक्तं गुणस्वरूपम् –**

भगवद्गीतायां भगवान् स्वयं कथयति भगवद्गीतायां –

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च।"[4]

"सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।

[4] भगवद्गीता – 14.2

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥"[5]

"सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत॥"[6]

सत्वं रजः तमः चेत्येते गुणाः देहिनं देहे बध्नन्ति।

**सत्त्वगुणः** – भगवान् कथयति –

"तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥"[7]

गुणत्रयेषु सत्त्वगुणः प्रकाशकः निर्मलत्वात्, सुखकारणमपि सत्त्वगुण एव भवति।

**रजोगुणः**-

"रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥"[8]

रजोगुणः रागात्मकः रञ्जनात्। तृष्णासमुद्भवकः। अयं कर्मणा सह बध्नाति।

**तमोगुणः**-

"तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥"[9]

अज्ञानाज्जायते तमः। सर्वान् मोहयति। प्रमादालस्यनिद्रादीनां कारणं तमोगुण एव।

**गुणानां लक्षणम् -**

यदा यो गुणः उद्भूतो भवति तदा तस्य किं लिङ्गमिति उच्यते –

**सत्त्वगुणः** –

"सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते।
ज्ञानं यदा तदा विद्याद् विवृद्धं सत्त्वमित्युत॥"[10]

यदा प्रकाशः देहेऽस्मिन् श्रोत्रादिषु सर्वद्वारेषु उपजायते तदा सत्त्वगुणस्याभिवृद्धिः जायते इति बोध्यव्यमस्ति। उत इति प्रयोगेण न केवलं प्रकाशः अपि तु प्रसादलाघवादिचिह्नैः सत्त्वगुणस्य ज्ञानं जायते।

**रजोगुणः**-

"लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ॥"[11]

यदा अस्मासु लोभः, कर्मप्रवृत्तिः, कर्माणामारम्भः, अशान्तभावः, स्पृहा भोगेच्छा इत्यादीनां वर्धनं दृश्यते तदा रजोगुणवृद्धिः इति ज्ञायते।

**तमोगुणः** –

"अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन॥"[12]

तमोगुणस्य वृद्धौ सति अविवेकः, कार्येषु अनिच्छा अप्रवृत्तिः, प्रमादः, कर्तव्ये उदासीनता एवं मोह मूढता इत्यादीनाम् अधिकाधिकाभिव्यक्तिः जायते।

**गुणफलकथनम् –**

भगवद्गीतायां भगवान् कथयति – सुकृतकर्मसकलस्य फलं सात्त्विकं निर्मलं, ज्ञानञ्चोपजायते। रजसः फलं दुःखं, लोभश्च। तमसः फलमज्ञानं, प्रमादमोहौ च। तदेवोच्यते –

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम्।

[5] भगवद्गीता – 14.5
[6] भगवद्गीता – 14.9
[7] भगवद्गीता – 14.6
[8] भगवद्गीता – 14.7
[9] भगवद्गीता – 14.8
[10] भगवद्गीता – 14.11
[11] भगवद्गीता – 14.12
[12] भगवद्गीता – 14.13

रजसस्तु फलं दुःखमज्ञानं तमसः फलम्॥[13]

**गुणातीतस्य लक्षणम् –**

"प्रकाशञ्च प्रवृत्तिञ्च मोहमेव च पाण्डव।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति॥"[14]

अर्थात् यः सत्त्वरजस्तमसाम् आविर्भूते सति न द्वेष्टि, निवृत्ते सति न आकाङ्क्षति सः गुणातीत इति।

**गुणातीतस्य आचारः –**

"उदासीनवदासीनो गुणैर्यो न विचाल्यते।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते॥"[15]

यः साक्षिरूपेण तिष्ठति, गुणैः यः न विचलितो भवति। गुणाः वर्तन्ते इत्येव। तत्र तेषु विशिष्टः यत्नः नापेक्षते। उदासीनभावेन तिष्ठति तावदेव। अपि च सुखदुःखे समः, अर्थानर्थे समः, प्रियाप्रिये समः, धीररूपः, मानपमानोः समः, समः मित्रामित्रेषु तादृशः पुरुषो गुणातीतः।

**गुणत्रयातिक्रमणस्योपायः –**

भगवान् कथयति –

"मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते॥"

ईश्वरं नारायणं सर्वभूतहृदयाश्रितं यो यतिः भक्तियोगेन सेवते सः स्वयं ब्रह्मस्वरूपेण तिष्ठति, अर्थात् ब्रह्मवेद ब्रह्मैव भवति। तत्र भक्तिः भजनं कायेन मनसा वाचा वा निष्पाद्यो भजनीयस्य तुष्टो हेतुः व्यापारः भजमानपुरुषनिष्ठः।

**गुणानां पारस्परिकसम्बन्धः –**

त्रयो गुणाः परस्परं विरोधिनः भवन्तीति साङ्ख्यदर्शनस्य अभिप्रायः। श्वेतलोहितकृष्णभेदेन ऊर्ध्वगमन-अधोगमनभेदेन, सुख-दुःख-मोहभेदेन नैके भेदाः एतेषु वर्तन्ते। परस्परं विरोधिनः एते सृष्टिसञ्चालनकार्यं कथं सम्पादयन्ति इति जिज्ञासायाम् उच्यते यत् –**प्रदीपवच्चार्थतो वृत्तिः।** अर्थात् एकस्मिन् दीपे तैलं, वर्तिका, दीपश्च एतेषां स्वभावाः भिन्नाः भिन्नाः भवन्ति। तथापि एते मिलित्वा प्रकाशम् उत्पाद्य अन्धकारं दूरीकुर्वन्ति। पारस्परिकविरोधे जाते सति एतेषां गुणत्रयाणां प्रयोजनम् एकमेव भवति। सोद्देश्यसाधनार्थमेते परस्परं सहायभूताः भवन्ति इति।

इत्येवं क्रमेण गुणत्रयस्य अवस्था वर्णनमपि च तस्य स्वरूपं यथावत् प्रतिपादितम्।

## सहायकग्रन्थसूची


- दीनेशशास्त्री. *पञ्चदशी.* वाराणसीः चौखाम्बा प्रकाशन्. (1970).
- विवरणाचार्यः. *पञ्चपादिका* (संस्क. प्रथमः). तिरुपतिः: राष्ट्रियसंस्कृत-विद्यापिठम्. (1985).
- व्यानार्जी दीपकदास. *छान्दोग्योपनिषद्.* कोलकाताः देशप्रकाशन्. (1990).
- शङ्कराचार्यः. *ब्रह्मसूत्रशाङ्करभाष्यम् (परिमलो कल्पतरु भामती टिका सहित).* (श्रीमदनन्तकृष्णशास्त्रिः, सं.)


[13] भगवद्गीता – 14.16

[14] भगवद्गीता – 14.22

[15] भगवद्गीता – 14.23

वाराणसीः कृष्णदास अकादमी. (2000).

- श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुर.(2020)
- स्वामी मुमुक्षानन्द. *श्रीमद्भगवद्गीता.* कोलकाता. उद्बोधन कार्यालय. (2013)

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# साम्प्रतिकसन्दर्भे श्री-अरविन्दस्य शिक्षादर्शनं शिक्षाचिन्तनञ्च

**तन्मयरायः**

**अध्यापकः, भारतीचतुष्पाठीसंस्कृतमहाविद्यालयः**

**नवद्वीपः, नदीया, पश्चिमबङ्गः- ७४१३०२**

**भूमिका —**

अरविन्दमहाशयेन १८७२-वर्षे अगस्टमासस्य पञ्चदशदिनाङ्के कलिकातानगरस्य समीपस्थे कोन्नगर इति नामधेये स्थाने जनिं लेभे। यदा तस्य वयः पञ्चासीत्तदा पठनार्थं स कनभेन्टस्थानं प्रति प्रेषितः। सप्तमवयसि स इंल्यण्डदेशं प्रति प्रस्थितः। तत्र स चतुर्दशवर्षाणि यावत् स्थितवान्। विद्यार्थिजीवनं समाप्य भारतीयसिभिलसार्भिस इति परीक्षायां द्वितीयं स्थानं लेभे सः। परन्तु वैदेशिकशासनस्य उपरि विरूपतायै स व्यवहारिकासु परीक्षासु अंशग्रहणं नैव चकार। १८९३-वर्षे देशं प्रत्यागत्य वरोदामहाविद्यालये आङ्गलविषयस्य अध्यापकरूपेण योगदानञ्चकार। अत्रागत्य तेन भारतीयदर्शनं, संस्कृतिश्चेत्यनयोः ज्ञानं लेभे। एवञ्च बालगङ्गाधरतिलकस्य विल्पविमनोभावेन स विशेषरूपेण प्रभावितो जातः।

१९०५-वर्षे सः सक्रियरूपेण स्वाधीनतायाः संग्रामे योगदानं कृतवान्। तस्य राजनैतिकक्रियाकलापस्य द्वौ मार्गौ स्तः तद्यथा – स रहसि वैदेशिकशासनं प्रति संग्राममारब्धवान् अपरस्मिन् पक्षे स मुद्रणकार्यालयः, वक्तृता चेत्येताभ्यां स्वाधीनतायाः प्रचाराय बद्धपरिकरो जातः।

तस्य विप्लविमनोभावस्तु प्रकाशितो जातः **वन्देमातरम्** इति पत्रिकायाम्। १९०६-वर्षे जातीयान्दोलनस्य समये प्रतिष्ठिते बेङ्गल-राष्ट्रिय-महाविद्यालये शिक्षकरूपेण योगदानं कृतवान्। सहिंसान्दोलनस्य कृते १९०८-वर्षे तस्य एकवर्षकालं यावत् कारावरणं जातम्। १९०९-वर्षे कारागारात् तस्य मुक्तिर्जाता एवञ्च तस्मिन् काले कारागारे उषित्वा स गभीररूपेण गीतोपनिषदः चर्चायां मग्नो बभूव, तेनैव तस्य जीवने किञ्चित् आमूलं परिवर्तनं समागतमासीत्। तस्मिन् काले तेन योगसाधना आरब्धा। एवञ्च उच्चमार्गीयाध्यात्मिकचेतनया ऋषि-अरविन्द इति नाम्ना परिचितो जातः। तस्य वास्तवं रूपं तु पण्डिचेरौ एकस्य आन्तर्जातिकसंस्कृतिकेन्द्रस्य प्रतिष्ठामाध्यमेन।

**श्री-अरविन्दस्य शिक्षादर्शनम् (Philosophy Of Education)**

श्रीमद्भगवद्गीतां स जीवनदर्शनरूपेण गृहीतवान्। श्री-अरविन्दस्य शिक्षासम्बन्धि-धारणा तस्य दार्शनिकचिन्तधारया सह विशेषरूपेण प्रभाविताऽस्ति। तस्य

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

दार्शनिकचिन्तायाः मूलतो द्वौ मार्गौ वर्तेते एको भवति मनुष्यः अपरो वर्तते समाजः। सः चिन्तयति यत् कस्यचित् समाजस्य शिक्षाव्यवस्था आश्रिता भवति तस्य समाजस्य प्रकृतौ तथा च तत्र ये वसन्ति तेषां बुद्धि-सांस्कृतिकमनस्सु। तस्य नये शिक्षायाः लक्ष्यमस्ति स्वर्गीय-ऐश्वरिकजीवनस्य कृते मनुष्याणां निर्माणम्। स आत्मानं विषयञ्च संयोजितवान्। स चिन्तयति स्म यत् शिक्षा भवति अन्तरात्मनः आलोकितकरणस्य उत्सभूता, या खलु मनुष्याणां शारीरिक-मानसिक-बौद्धिक-आध्यात्मिकक्षमताया विकाशं साधयति। तस्मात् असंशयं वक्तुं शक्यते यत् श्री-अरविन्दस्य शिक्षादर्शनं साम्प्रतिककाले समन्वयीं धारणां विशेषरूपेण परिपोषयति। दर्शनस्य यत् चरमं सत्यमस्ति तदवश्यमेव वर्तमानस्य वासनां पूरयेत्। वर्तमानकाले अयमेव विषयो वर्तते यत् आशावादः सर्वापेक्षया गतिशीलः इति।

**शिक्षायाः लक्ष्यम् (Aim Of Education)**

**श्री-अरविन्दस्य शिक्षायाः मूलं लक्ष्यम्—**

- सः सर्वेषु क्षेत्रेषु समन्वयिधारणायाः प्रस्तावं प्रददौ। स चिन्तयति शिक्षायाः मूलं लक्ष्यमस्ति शिक्षार्थिनो विकाशः। शिक्षायाः समन्वयिधारा प्रतिष्ठिता भवति। शिक्षक-विद्यार्थि-विद्यालयैः साकं सर्वेभ्यः समीचीनं स्थानमपि प्रदेयम्। महात्मगान्धि-रवीन्द्रनाथादयः प्रमुखा शिक्षाविदः शिक्षायाः समन्वयीं धारणां स्वीचक्रुः। श्री-अरविन्दस्य शिक्षाचिन्तायाः एकस्मिन् पक्षे यथा समाजं प्रति गुरुत्त्वम् प्रदत्तमस्ति तथैव अपरस्मिन् पक्षे जातीय-अतीत-वर्तमान-भविष्यताम् उपरि गुरुत्त्वं प्रदत्तं वर्तते। तेन धर्मीय-नैतिकशिक्षाञ्च विशेषरूपेण गुरुत्त्वं प्रादात्। स योगशिक्षां पाठ्यक्रमस्य गुरुत्त्वपूर्णोऽशंरूपेण वर्णितवान्।
- भाववाद-प्रयोगवादयोः समन्वयोऽपि श्री-अरविन्दस्य शिक्षादर्शनस्य अपरः कश्चन मार्गो वरीवर्तते। प्राचीनभारतीयशिक्षायाः लक्ष्यं भाववादैः प्रभावितम् अस्ति अर्थात् बन्धनात् मुक्तिः। एवञ्च आधुनिकशिक्षायाः लक्ष्यं प्रयोगवादैः प्रभावितम् अस्ति र्थात् शिक्षैव जीवनमिति। श्री अरविन्दस्य शिक्षाचिन्तायाम् अनयोः भाववाद-प्रयोगवादयोः समन्वयः स्पष्टरूपेण परिलक्षितो भवति।
- श्री-अरविन्दः मनुष्यस्य प्रकृतेः आध्यात्मिकव्याख्यां प्रादर्शयत्। स चिन्तयति यत् स्वर्गीयोऽनुभवः मनुष्येषु सञ्चालितो भवति, स शिशोः स्वर्गीयोपादानस्योपरि विशेषं गुरुत्त्वं प्राददात्। एतस्याः सत्तायाः विकाशो भवति शिक्षया एव।
- तस्य नये शिक्षायाः उल्लेखयोग्यं लक्ष्यं भवति मनुष्यनिर्माणम्। तस्य जातीयशिक्षाव्यवस्थायाः मूलं लक्ष्यमस्ति मनुष्याणाम् अभिव्यक्तिः। तस्माद्धेतोः तेन पण्डिचेरिनगरे आन्तर्जातिकविश्व-विद्यालयस्य प्रतिष्ठा कृताऽऽसीत्। तस्य शिक्षाचिन्तायाः मुख्यम् उद्देश्यमासीत्

सर्वेऽपि मानवाः एकस्मिन् सूत्रे बद्धा भवेयुः।

**पाठ्यक्रमः (Curriculum)—**

तस्य पाठ्यक्रमस्य धारणायां भारतीयशिक्षा, संस्कृतिः, साहित्यम्, दर्शनम् इति एतैः साकं पाश्चात्त्यज्ञान-विज्ञानयोः समन्वयं कर्तुं प्रचेष्टां कृतवान्। तस्माद्धेतोः श्री-अरविन्दः तस्य पाठ्यक्रमे यथा भारतीयदर्शनं, साहित्यम्, इतिहासः, विज्ञानम्, गणितं संयोजितवान् तथैव पाश्चात्त्यविज्ञानं साहित्यञ्च योजयामास।

**श्री-अरविन्दस्य नये शिक्षणपद्धतिः शिक्षकस्य भूमिका च (Teaching Method and Role Of Teacher)—**

शिक्षायाः क्षेत्रे शिक्षकस्य गुरुत्त्वपूर्णा भूमिका वर्तते। श्री-अरविन्देन तस्य पुस्तके "A System of National Education" इत्यत्र तिस्रो मूलनीतय उक्ताः वर्तन्ते –

१. सः उक्तवान् प्रकृतपक्षे किमपि शिक्षयितुं न शक्यते। तेन स्वामिविवेकानन्दस्य इव शिक्षकस्य सहायकस्य भूमिकायामाधिक्येन गुरुत्त्वं प्रदत्तमस्ति। प्रत्यकस्मिन् विद्यार्थिनि य ईश्वरस्य अंशो वर्तते तस्य अंशस्य उद्दीपनमेव तस्य कार्यमस्ति।
२. श्री-अरविन्दः उक्तवान् यत् मानवः शिशोः वैशिष्ट्यानुसारं तस्मै विकाशाय सुयोगं प्रदद्यात्, किमपि बलात् नैव प्रदेयमिति। शिशवः अन्तःस्थात् एव उद्दीपिताः भवेयुः, तस्माद्धेतोः शिक्षा शिक्षार्थिनां इच्छानुसारेण भवेत्।
३. शिक्षणस्य तृतीया नीतिः भवति शिक्षार्थिनः समीपस्थात् दूरं प्रति नयनम्। ज्ञातात् अज्ञानं प्रति आनयनम्। अर्थात् अभिज्ञतैव शिक्षणस्य भित्तिः। परिवेशेन सह प्रत्यक्षरूपेण युक्तां दैनन्दिनाभिज्ञताम् आश्रित्यैव शिक्षार्थी नवीनं ज्ञानम् अर्जयेत्। इयञ्च नीतिः शिक्षणे श्रवण-दर्शन-शिक्षासहायकानाम् उपकरणानां व्यवहारे समर्थनं करोति।

**मूल्यबोधस्य शिक्षा (Value of Education)**

समाजस्य परिवर्तनेन सह मनुष्यस्य मूल्यबोधस्यापि परिवर्तनं भवति। क्रमशः पुरातनाः मूल्यबोधास्तु प्रतिस्थापिताः भवति नवीनैः मूल्यबोधैः। श्री-अरविन्दस्य नये सर्वापेक्षया उच्चमूल्यबोधो भवति ऐक्यम्। व्यक्तेः शारीरिक-मानसिक-आध्यात्मिकमूल्यबोधानां चर्चायाः प्रयोजनम् अस्ति। अन्ये मूल्यबोधाः भवन्ति आध्यात्मिकता, परिवर्तनशीलता इत्यादयः। विकाश-परिचर्चयोः प्रयोजनम् अस्ति। श्री-अरविन्दस्य नये शिक्षायाः सर्वोच्चं लक्ष्यं भवति आध्यात्मिकस्य मूल्यबोधस्य विकाशसाधनम्।

**मातृभाषया शिक्षा (Mother Language Medium Education)**

श्री-अरविन्दः मातृभाषया शिक्षादानमेव प्रकृतशिक्षा इति चिन्तयति। स चिन्तयति मातृभाषया शिक्षादानं सम्पूर्णं भवति ततःपरं अन्यभाषाशिक्षायाः प्रश्नः आयाति। विषयोऽयं तदान्तीनकालस्य शिक्षाजगतः सर्वे दार्शनिकाः गृहीतवन्तः।

**नैतिकतायाः शिक्षा चरित्रनिर्ममाणस्य शिक्षा च (Moral Education and Character Building)**

श्री-अरविन्दः शिशोः चरित्रनिर्माणस्य उपरि विशेषं गुरुत्त्वं प्राददात्। तस्य नये शिशवे स्वाधीनताप्रदानेन तस्य अन्तः विद्यमानस्य आदर्शव्यक्तेः जागरणं कर्तुं शक्यते। तस्य नये प्रत्यकस्मिन् शिशौ कश्चिदपि कुसंस्कारः, असमीचीनः अभ्यासो वा तिष्ठत्येव, तस्मिन् क्षेत्रे अवहेलनं क्वचिदपि न कर्तव्यम्, विषयेऽस्मिन् संशोधनं कुर्यात्, तं शिशुं कुसंस्कारात् असमीचीनात् अभ्यासात् मुक्तं कुर्यात्। एतेन तस्य चरित्रं सुगठितं भवति।

**शारीरिकी शिक्षा (Physical Education)**

श्री-अरविन्दः शारीरशिक्षायाः उपरि विशेषं गुरुत्त्वम् आरोपितवान्। तस्य मते स्वस्थो देहः स्वस्थमनसः परिचायको भवति। तस्य इयं धारणा **“The Supramental Manifestation”** इत्यनेन ग्रन्थेन प्रकाशिता जाताऽस्ति। शिक्षा-साधनाभ्यां शरीरं सार्थकं जीवनस्य उपयुक्तञ्च करणीयम्। तस्मात् प्रतिदिनं नियमितः आहारः, निद्रा, व्यायामः, क्रीडा इत्यादीनि कार्याणि कर्तव्यानि सन्ति।

**निष्कर्षः—**

स आसीत् एको महान् ज्ञानी पुरुषः, तस्य आर्विभावेन सर्वेऽपि भारतवासिनो धन्याः जाताः। श्री-अरविन्दस्य जीवनस्य मूलं लक्ष्यमासीत् संहतिः, स्वाभाविकः विकाशः, समन्विता सत्ता इत्यादिभिः समाजस्य आङ्गिकपूर्णतानुसारेण आदर्शसमाजस्य राष्ट्रस्य वा निर्माणम्। तस्य चिन्तायां चेतनायां धर्मीया सहनशीलता, असाम्प्रदायिकता, स्वजातिबोधः इत्यादयो विषयाः प्राधान्येन स्थानं प्राप्तवन्तः। शिक्षाक्षेत्रेऽपि तस्य चिन्तायां चेतनायां देशीयशिक्षा, देशीयसंस्कृतिः, देशस्य जनाः प्रधानरूपेण स्थानं प्राप्तवन्तः। विश्वसमाजनिर्माणस्य स्वप्नः वर्तमानयुगे तस्य चिन्ताधारां विश्वव्यापिनो बौद्धिकसमाजस्य समीपे इतोऽपि परिचितरूपेण उपस्थापितो वर्तते।

**सहायकग्रन्थाः**


- दास, प्राण गोविन्द, भारतीय राष्ट्रचिन्ता ओ जातीय आन्दोलन, निउ सेन्ट्राल बुक एजेन्सि (प्रा.) लिमिटेड, ८।१ चिन्तामणि दास लेन, कलकाता ७००००९.
- महापात्र, अनादिकुमार, भारतीय शिक्षाचिन्तन, सुहृद पावलिकेशन, प्रथमः प्रकाश : नभेम्बर, १९९८.
- मुखोपाध्याय, अशोक कुमार, भारतीय राष्ट्रचिन्ता परिचय, पश्चिमबङ्गराज्य पुस्तक पर्षद्, ६ ए राजा सुबोध मल्लिक स्कोयार, कलकाता, ७०००१३, प्रथम प्रकाश : अक्टोबर २०१३.
- वन्दोपाध्याय, अमृतलाल, ऋषि अरविन्द, विश्वास पाविलिशिं हाउस, कलिकाता, द्वितीय प्रकाश : १३७१ बङ्गाब्दः।
- Gauba, O. P, Indian Political Thought, Mayur Books, 4226/1, Ansari Road, Darya Ganj, New Delhi 110002, 2018.
- Ghose A., Mc Dermott, R. A. - Essential Aurobindo, Steiner Books.
- Heenhs, P., The lives of sri Aurobindo, 2008, New York: Columbia University press.

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# कौटिल्यकालिकवाणिज्यनिर्वाहाधुनिककालिकवाणिज्यनिर्वाहयोः तुलनात्मकं विश्लेषणम्

**देवसुजन-मुखार्जी**

**अध्यापकः (SACT), संस्कृतविभागः, कालियागञ्जमहाविद्यालयः**

**उत्तरदिनाजपुरम्, पश्चिमबङ्गः- ७३३१२९**

**प्रबन्धसारः**

कौटिल्यपूर्ववर्तिकालादेव राष्ट्रियोद्योगानां राष्ट्रियवाणिज्यस्य च स्थितिः भारतवर्षे आसीदिति महाभारतपुराणादिशास्त्रोपलब्धतथ्याधारेण अवगम्यते। किन्तु यथा कौटिल्येन तदीयार्थशास्त्रे उद्योगवाणिज्ययोर्विषये विवरणानि नीतिनिर्देशाश्च प्रदर्शिताः, तेषां सुगभीराध्ययनात् तात्कालिकोद्योगावस्थितेः, तात्कालिक-वाणिज्यावस्थितेश्च स्पष्टं चित्रमेकं मानसपटले उद्भासितं भवति। 'कौटिल्यकालिकोद्योगवाणिज्ययोः स्थितेः पर्यालोचनस्य प्रयास इह विधीयते। कस्यापि राष्ट्रस्य सर्वविधोन्नतेर्कारणानां परीक्षणकाले तस्य राष्ट्रस्य आर्थिकप्रगतेः कारणानि अपि अवधारितरूपेण परीक्षणीयानि भवन्ति। यतो हि आर्थिकप्रगतिर्हि राष्ट्रस्य सुस्थिरावस्थायाः हेतुर्भवति। सोमदेववचनमिह उल्लिख्यते प्रासङ्गिकतामनुभूय- **" यतः सर्वप्रयोजनसिद्धिः सोऽर्थः "** इति। मनुष्याणां सर्वेषां प्रयोजनानां सिद्धिः कदाचित् प्रत्यक्षरूपेण कदाचित् परोक्षरूपेण अर्थेनैव सम्भवति तथैव कस्यचिद्राष्ट्रस्य अभीप्सितोन्नयनस्य सिद्धिरपि अर्थेनैव सम्भवति। अतः राष्ट्रोन्नतिकाङ्क्षिभिः सोमदेववचनस्य तात्पर्यम् अनुधावनीयम्। अर्थेनैव धर्मकामयोः प्राप्तिविषयः उपस्थाप्यते अग्निपुराणे यथा-

**"धनवान् धर्ममाप्नोति धनवान् काममश्नुते।**
**उच्छिद्यन्ते विना ह्यर्थं क्रिया ग्रीष्मे सरिद्यथा ॥ अग्नि.पु-223.5**

कौटिलीये अर्थशास्त्रे खलु - "अर्थ एव प्रधानम् इति कौटिल्यः। अर्थमूलौ हि धर्मकामावि"ति चेत्युक्तं सामान्यतया अनेन कौटिल्यवचनेन धर्मकामाभ्याम् अर्थस्य श्रेष्ठत्वं प्रतिपादितं भवति। किन्तु सुगभीरतया अस्य कौटिल्यवचनस्य मननेन एको गूढार्थो मानसपटले भासते। अत्र हि धर्मकामयोः प्रमुखसाधनरूपेणैव अर्थः स्वीक्रियते। पुनश्चात्र काम इति शब्दस्य कस्यचिद्राष्ट्रस्य कृते अभीप्सितस्य समुन्नयनस्य कामना इत्यर्थो भवति। अत एव कस्यचिद्राष्ट्रस्य काङ्क्षितस्य सर्वविधसमुन्नयनस्य परिपूरकरूपेण अर्थस्य सुमहदवदानं सर्वथा स्वीक्रियते।

**कुञ्चीशब्दाः - अर्थः , अर्थशास्त्रम् , वाणिज्यम् , सुरक्षाकर्म , जनजीवनम्, नगराध्यक्षः, अमात्यः**

कौटिल्यकालिकवाणिज्यनिर्वाहनीतीनाम् आधुनिककालिकप्रासङ्गिकता, समाधानोपायानाम् अन्वेषणं, कौटिलीयार्थशास्त्रोक्तोपायानां विश्लेषणञ्च आलोचितेऽस्मिन् प्रखण्डे करिष्यते। आधुनिककालस्य "Science of Business Management (वाणिज्यनिर्वाहविज्ञानम्)" इत्यस्य प्रसिद्धशब्दस्तु - "Business अपगता अपि तु निरन्तरं प्रवर्धमाना एवास्ति। साम्प्रतिककालस्य वाणिज्यनिर्वाहस्य (Business Management) मूलीभूतसमस्यानां Management (वाणिज्यनिर्वाहः)" इति[1] यस्य परिचयस्तु कर्मसंस्थापनकाङ्क्षिणां कृते संस्थापनाशायाः सम्पूरकरूपेण वर्तते।

यथा आधुनिककाले निर्वाहविज्ञानविषये (Science of Management) परिकल्पनं (Planning), संगठनं (Organising), कर्मगणनिर्वाचनं (Staffing), नेतृत्वप्रदानं (Leading), नियन्त्रणं (Controlling) चेत्येते पञ्चविषयाः अवधारितरूपेण वर्तन्ते तथैव कौटिलीयार्थशास्त्रेऽपि इत्येते विषया राज्यसञ्चालनार्थं, वित्तनिर्वाहार्थञ्च प्रमुखं स्थानमधिकुर्वन्ति स्म। वाणिज्यनिर्वाहार्थं कौटिल्योक्तनिर्वाहनीतिनां प्रासङ्गिकता अद्यावधि वर्तते। एकैकमत्र आलोच्यतेऽधोभागे-

**1. परिकल्पनम्-** कस्यापि कार्यस्य साफल्यलाभार्थं कार्यविषये परिकल्पनम् अत्यावश्यकं वर्तते। पृथिवीलाभरूपस्य पृथिवीपालनरूपस्य च कार्यस्य सम्पूर्तिनिमित्तं कौटिल्येन येषां मूलीभूतकार्याणां परिकल्पनं कृतं तेषां संग्रहः अर्थशास्त्रे वर्तते। मनुष्याणां वृत्तिरर्थो मनुष्ययुक्तभूमिश्च अर्थः, तथा च समग्रमेव अर्थशास्त्रं मनुष्ययुक्तभूमेः लाभपालनोपायैः सन्निविष्टम् कौटिल्यवचनात् ज्ञायते।[2] अनेन हि वृत्तीनां मनुष्ययुक्तभूमेश्च अर्थमयत्वं कौटिल्येन प्रतिष्ठापितमेव। आधुनिककालेऽपि भूमेः सम्पद्युक्तत्वं सर्वैरेव स्वीक्रियते। पृथिव्या लाभपालनोपायप्रदानार्थं शास्त्ररचनायाः परम्परा सुप्राचीना। पृथिव्या लाभे पालने च पूर्वाचार्यविरचितानि अर्थशास्त्राणि संहत्य एकम् अर्थशास्त्रं कृतमिति[3] स्वयं कौटिल्येन उक्तत्वात् सुप्राचीनैषा परम्परा पृथिव्याः लाभस्य परिपालनस्य च परिकल्पितव्यवस्थावलीतरङ्गः अवगाहिता शोधिता च आसीदित्यनुमीयते।

कौटिलीयार्थशास्त्रं खलु पृथिवीलाभस्य परिपालनस्य च परिकल्पितव्यवस्थावलीभिः सम्पूरितमस्ति। अत्र विशेषतः राष्ट्रस्य आभ्यन्तरणसमुन्नयनार्थं बहिर्देशीयराष्ट्रैः सह कूटनैतिकसम्पर्कसाधनार्थं राष्ट्रियसुरक्षाविधानार्थम् आर्थसामाजिकोन्नयनार्थं बहूनां योजनानाञ्च साफल्यार्थं विविधव्यवस्थावली परिकल्पिता। उदाहर्तुं शक्यते सन्दर्भेऽस्मिन् यत् वाणिज्यसञ्चालनार्थं पण्याध्यक्षस्य (Director of Trade) परिकल्पनं कृत्वा तत्कार्यावलीनां व्यवस्थितनिर्देशेन कौटिल्येन राष्ट्रियवाणिज्यस्य सुनियन्त्रणं साधितम्। तथैव पण्यसंस्थानां

---

[1] **S.R.E.E.A.-P.146** (Sen, Rajkumar & Ratanlal vasu (Ed.) : 'Economics in Arthsastra)

[2] **कौ.अ.; र.दे-15-1-12** ( कौटिलीय अर्थशास्त्र; रजनीकान्त देवशर्मसम्पादितम्)

[3] **कौ.अ.; र.दे-1-1-1** ( कौटिलीय अर्थशास्त्र; रजनीकान्त देवशर्मसम्पादितम्)

(पण्यहट्टानां विपणीनां वा) निरीक्षण-नियन्त्रण - सञ्चालनादिकार्यार्थं संस्थाध्यक्षस्य (Superintendent of markts), राजस्वप्रवर्तनसम्बन्धितनियोगस्य सफल-प्रयोगाय कार्यपरिचालन-कार्यपरिदर्शन-राष्ट्रियायव्ययतथ्याहरणादि-कार्याणां सफलप्रयोगाय समाहर्तुः (Revenue Comissionar), आयातनिर्यातादिवाणिज्य-व्यवहारे क्रेतृविक्रेतृभ्यः शुल्काद्याहरणार्थं शुल्काध्यक्षस्य, खनिविषये परीक्षण-नियोग-व्यवसाय-कर्मान्तस्थापनादिकार्यार्थम् आकराध्यक्षस्य (Director of Mines), सुवर्णकार्याणां व्यवस्थापन-परिचालन-व्यापार-कर्मशालास्थापनादिकार्यार्थं सुवर्णाध्यक्षस्य, लोहताम्रसीसादिधातूनां कर्मान्तस्थापनं तन्निर्मितद्रव्यवाणिज्ययोः कार्यान्वयनाय लोहाध्यक्षस्य, वाणिज्यादिव्यवहारे उपयुक्तानां तुलानां परिमापनपात्राणां परिमापनविधीनां परिमापनपरिमाणानाञ्च यथोचितव्यवस्थापनार्थं पौतवाध्यक्षस्य (Superintendent of Standardisation) च परिकल्पनं कौटिल्येन कृतम्।

गृहनिर्माणसीमानिर्धारणादिकार्येषु व्यवहार्याणां दैर्घ्यप्रस्थादिपरिमापन परिमाणानां कर्मकरराजसेवकादीनां कार्यकालपरिगणनायां जनजीवने च व्यवहार्याणां कालपरिगणनपरिमाणानां यथोचितनिर्धारणार्थं मानाध्यक्षस्य, राजकोशस्य वस्तूनां परीक्षणपूर्वकं व्यवस्थिततया रक्षणार्थं कोशाध्यक्षस्य, निर्माणार्थं कोशगृह-पण्यगृह-कोष्ठागार-कुप्यगृह-अस्त्रागार-बन्धनागाराणां संनिधातुः (Director of Stores), राष्ट्रियखाद्यानां व्यवस्थिततया संरक्षणार्थं कोष्ठागाराध्यक्षस्य (Superintendent of Magazine), वन्यसम्पत्सुरक्षार्थं विविधद्रव्यकर्मान्तस्थापनार्थं द्रव्यनिर्माणनियोगादिकार्यार्थञ्च कुप्याध्यक्षस्य, राष्ट्रियपशुपालनव्यवस्थायाः समुन्नयनपूर्वकं पशुपालनगतायस्याहरणार्थं गोऽध्यक्षस्य, सुरावाणिज्यनियन्त्रणपरिचालनदिकार्यं सम्पाद्य करशुल्काद्याहरणार्थं सुराध्यक्षस्य, राष्ट्रियसुरक्षाविधायकानाम् आयुधानां निर्माणसंरक्षणव्यवहारादि चापि तथैव परिकल्पनं कृतम्। कायार्थम् अभिज्ञायुधागाराध्यक्षस्य, चापि तथैव परिकल्पनं कृतम्।

राष्ट्रियवस्त्रोद्योगपरिचालनार्थं सूत्राध्यक्षस्य, राष्ट्रियकृषिव्यवस्थायाः परिचालनार्थं सीताध्यक्षस्य (Director of Agriculture), अभयारण्यपशूनां सुरक्षार्थं वध्यपशूमत्स्यादीनां मांसास्थिप्रभृतीनां वाणिज्यव्यवहारार्थं सूनाध्यक्षस्य, यौनापराधनियन्त्रणपूर्वकम् आमोदकराद्याहरणार्थं गणिकाध्यक्षस्य, नौकया यातायातव्यवस्थापनेन प्रजाभ्यो वाणिज्यव्यवहारमार्गव्यवस्थापनेन वणिग्भ्यश्च करादीनामाहरणार्थं नावध्यक्षस्य, युद्धव्यवहारार्थम् अश्वपरिपालनार्थं हस्त्यध्यक्षस्य, अश्वाध्यक्षस्य, विविधकर्मोपयोगिहस्तिनां परिपालनार्थं विविधरथानां निर्माणार्थं रथाध्यक्षस्य, पदातिकसैनिकानां भोजनवेतन-प्रशिक्षणादिसम्पादनार्थं पत्याध्यक्षस्य (Superintendent of Foot Soldiers), सेनापतेः कार्यपरिदर्शनप्रशिक्षणयुद्धव्यूह-

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

संरचनादिकार्यार्थं चतुरङ्गसैन्यानां (Commandent of Army), राष्ट्रियवाणिज्यसहयोगार्थम् अनुप्रवेशनियन्त्रणार्थञ्च मुद्राव्यवहाराय मूद्राध्यक्षस्य पशूनां संवर्धनं द्रव्यवनहस्तिवननिवासिनामाजीविकाप्रवर्तनं वणिक्सुरक्षादिकार्यञ्च सम्पादयितुं विवीताध्यक्षस्य, नगरनिवासिजनानां सुरक्षादिविधानं कृत्वा नगरगतायव्यययोः वाणिज्यगतविषयाणां च परिलेखनार्थं नगराध्यक्षस्य, च परिकल्पनमपि निर्वाहविज्ञानस्यैव उदाहरणरूपेण उपस्थापयितुं शक्यते।

**2. संगठनम्-** संगठितकार्यसाफल्यस्य परिसीम्नि वर्तते इति विदुषां मतम्। लक्ष्यप्राप्तिनिमित्तं कार्यक्षमतानुगुणं निर्दिष्टानि विभाजितानि च कार्याणि संगठने वर्तन्ते, यत्राधिकारिणः कार्यसाफल्यार्थं कार्यसमीक्षणं, व्यवस्थापरिकल्पनञ्च कुर्वन्ति। आधुनिकवाणिज्यनिर्वाहे खलु संगठितकार्य- (Team work) साफल्यप्रापकव्यवस्थारूपेण परिगण्यते। कौटिलीयार्थशास्त्रे एक साङ्गठनिक- प्रारूपः प्राप्यते। उपर्युक्तानां विषयाध्यक्षाणां कार्याणि संगठितकार्याणि एव वर्तन्ते। परस्परसहयोगात् राजस्वाहरणं, राष्ट्रियोद्योगव्यापारयोः कार्यपरिचालनं, जनसुरक्षादिविधानञ्च राजसेवकैः क्रियन्ते स्म कौटिल्यकाले।

**3. कर्मगणनिर्वाचनम्-** उच्यते हि बहूनामप्यसाराणां समवायो हि दुर्जयः[4] इति। अतः संगठनात्मककार्यं कर्तुं योग्यकर्मगणस्य प्रयोजनं भवति। एवं कार्यगणप्रस्तुतकाले च यो यस्मिन् कर्मणि दक्षः स तस्मिन् कर्मणि नियुक्तो भवेदिति समुन्नयनकाङ्क्षिनियोजकस्य समुन्नयनकाङ्क्षिगणनिर्वाचकस्य च लक्ष्यं भवति। उच्चपदाधिकारिणां नियोजनात् प्राग् कार्ययोग्यतापरीक्षणस्य चतुर्प्रकारकाणां गुप्तपरीक्षणविधीनां व्याख्यानं कौटिल्येन कृतम्[5]। ते विधयः खलु - १) धर्मोपधा (धर्मपरीक्षा), अर्थोपधा (अर्थपरीक्षा), कामोपधा (कामपरीक्षा), भयोपधा (भयपरीक्षा)। इदमत्र स्मर्तव्यं यत् धर्मस्य परीक्षणे शुद्धविवेचितस्य अमात्यस्य धर्मविचारकपदव्याम् अपराधदण्डविधायकपदव्यां वा, अर्थस्य परीक्षणे शुद्धविवेचितस्यामात्यस्य समाहर्तृपदव्यां संनिधातृपदव्यां वा, कामस्य परीक्षणे शुद्धविवेचितस्यामात्यस्य उद्यानान्तःपुरयोः सुरक्षाकर्मणि, भयस्य परीक्षणे शुद्धविवेचितस्यामात्यस्य राज्ञ आसन्नकार्येषु चतसृषु अपि परीक्षासु शुद्धविवेचितस्यामात्यस्य मन्त्रिपदे, सर्वपरीक्षासु अशुद्धविवेचितस्यामात्यस्य खनिद्रव्यवनहस्तिवनकर्मान्तेषु च नियोगः करणीयः इति कौटिल्योपदेशः[6] तदीयनियोगकुशलतां निर्देशयति। स्वदेशीयः,

[4] **अ.सं.हि.को.पृ. 1075** (आप्ते, वामन शिवराम; संस्कृत-हिन्दी-कोश)

[5] **कौ. अ.; र. दे-(द्वि. ख)1/10/2-12** ( कौटिलीय अर्थशास्त्र; रजनीकान्त देवशर्मसम्पादितम्)

[6] **कौ.अ.; र.दे-(द्वि. ख)1/10/13-15** ( कौटिलीय अर्थशास्त्र; रजनीकान्त देवशर्मसम्पादितम्)

सद्वंशोत्पन्नः, आत्मनियन्त्रणकुशलः, शिल्पनिपुणः, शास्त्रेषु तीक्ष्णदृष्टिसम्पन्नः, ज्ञानी, अध्यवसायी, दक्षो, वाग्मी, साहसी, प्रत्युत्पन्नमतिः, सोत्साही, प्रभावी, कष्टसहिष्णुः, न्यायपरायणः, मैत्रिभावसम्पन्नो, दृढानुरक्तः, चरित्रबलस्वास्थ्यमनोबलैर्युक्तः, स्थविरताचाञ्चल्याभ्यां हीनः, संप्रियः (Amiable), शत्रूणाम् अस्रष्टा च अमात्यो भवेदिति कौटिल्यमतानुसारम्[7] इत्येते गुणाः अमात्यैः परिशीलनीया इति ज्ञायते। आधुनिककाले हि वाणिज्यनीतौ उद्योगनीतौ च उपर्युक्तानां गुणाबलीनां परिशीलनम् अन्वेषणं वा कार्यकर्तृगणसदस्येषु करणीयं येन हि वाणिज्यसञ्चालने उद्योगपरिचालने च सौविध्यं भवेत्। विषयाध्यक्षैः तत्कृते निर्दिष्टकार्यभार-परिपालितं न वा, अर्थलिप्सा राजद्रोहादिभावाः तेषु उज्जीविता वा चेत्यादिविषयज्ञानार्थं च गुप्तचराणां नियुक्तिः[8] अपि कौटिल्येन विहिता येन राष्ट्रसञ्चालितकार्याणां प्रगतिविषयः अनुमीयते।

**4. नेतृत्वप्रदानम्–** किमपि कार्यम् उपयुक्तनेतृत्वेन परिचालितं भवति चेत् तत्कार्यं फलप्रदं लक्ष्यसम्पूरकञ्च भवति। साम्प्रतिककालस्य वाणिज्यस्थितिः, उद्योगस्थितिः, राजनैतिकस्थितिः, आर्थसामाजिकस्थितिः, जनकल्याणकार्यस्थितिः, बहिर्विश्वसम्पर्कस्थितिः, परराष्ट्रवाणिज्यसम्पर्क - स्थितिश्च उपयुक्तनेतृत्वमेव अपेक्षन्ते। नेतृत्वप्रदाने प्रमुखतया चतुर्णां सामर्थ्यानामावश्यकं येषु १) सुपरिणामि- दायित्वपूर्णमानसिकतया नेतृत्वशक्तेः प्रयोगसामर्थ्यं कालानुगुणं परिस्थित्यनुगुणञ्च मनुष्येषूद्भूतकार्योद्वेगानाम् अनुभवसामर्थ्यम्, ३) प्रोत्साहनसामर्थ्यम् ४) समययोग्याचरणेन प्रतिक्रियाप्रदर्शनेन कार्योद्वेगप्रोत्साहनेन च समुन्नयनं कर्तुं सामर्थ्यं चेत्येते उपक्रमा वर्तन्ते।[9]

कौटिलीयार्थशास्त्रे नेतृत्वप्रदानार्थं राज्ञः प्रयोजनीयगुणावलीनां व्याख्यानं राजर्षेः आचरणविधीनामालोचनप्रसङ्गे कृतं यत्र राज्ञः उद्यमशीलता, राजकर्मचारिभिः सह मेलनमन्त्रणालोचनानि, परामर्शदानग्रहण-कार्यपरिदर्शनगूढपुरुषमेलनम् अध्यक्षकार्यनिर्देशाः, अभ्यागतैः सह मेलनम्, पुरोहिताचार्यवैद्यतपस्वित्रिवेदज्ञैः सह सम्पर्कः, प्रजासुखचिन्तनादिविषयाः प्रमुखाः सन्ति[10]। तथैव वृद्धसंयोगनामके द्वितीयप्रकरणे ज्ञानवृद्धानां सङ्गः, आचार्यशिष्टाध्यक्षादिसंसर्गात् विद्याविनयादिशिक्षालाभः, प्रजावर्गाणां हितम्, अध्ययनलब्धप्रज्ञायाः प्रयोगादिविषया वर्णिताः ये च राज्ञः नेतृत्वप्रदानसामर्थ्यपरिवर्धने सुसहायकाः सन्ति। ज्ञानवृद्धसंयोगलब्धविद्यया राज्ञि विनयः, विनयमूलकदण्डनीत्या च प्राणिनां संरक्षणम्, अभ्युदयश्च सम्भवन्ति इत्येव प्रकरणस्यास्य अन्तर्निहितसारः। संयमितेन्द्रियो राजा हि सुचारुतया प्रजाशासनं कर्तुं शक्नोति। अत एव

[7] **कौ.अ.; र.दे-(द्वि.ख)1/9/1** ( कौटिलीय अर्थशास्त्र; रजनीकान्त देवशर्मसम्पादितम्)

[8] **कौ.अ.; र.दे-(द्वि.ख)1/12/20** ( कौटिलीय अर्थशास्त्र; रजनीकान्त देवशर्मसम्पादितम्)

[9] **S.R.E.E.A.-P.159** (Sen, Rajkumar & Ratanlal vasu (Ed.) : 'Economics in Arthsastra)

[10] **कौ.अ.; र.दे-(द्वि. ख) 1/19** ( कौटिलीय अर्थशास्त्र; रजनीकान्त देवशर्मसम्पादितम्)

राज्यशासनविधीनां व्याख्यानात्प्रागिन्द्रियाणाम् अनुशासनं निग्रहणं वादौ भवेदिति विचार्य कामक्रोधलोभमानमदहर्षाणां परित्यागेन, शब्दस्पर्शरूपरसगन्धेषु भोगासक्तिनियन्त्रणेन च राज्ञा इन्द्रियाणां निग्रहाभ्यासः करणीय इति च तृतीये प्रकरणे सम्यगुपदिश्यते।

कौटिल्योक्तविषयाध्यक्षाणां कार्याबलीनाञ्च सम्यगध्ययनात् तत्तद्विषयाध्यक्षविभागानां कार्यसञ्चालनपरिदर्शनविधिः विभागाध्यक्षेषु नेतृत्वप्रदानकुशलता च सम्यगनुमीयते। अतः कौटिलीयार्थशास्त्रे उपलब्धानां नेतृत्वकौशलानां समुचितप्रयोगो न केवलं राज्यशासने अपि तु राज्ये वर्तमानानां शिल्पोद्योगवाणिज्यनेतृणां प्रशासनाधिकारिणां सामान्यगृहस्वामिनाञ्च राजः षोडशप्रकाराणां स्वकीयकार्यपरिचालने सहायको भवति। राज्ञः षोडशप्रकाराणाम् अभिगामिकगुणानां (नैकव्यप्रचारिगुणानां / Easily approachable qualities), अष्टप्रकाराणां प्रज्ञागुणानां चतुर्प्रकाराणाम् उत्साहगुणानां द्वात्रिंशत्प्रकाराणां विशिष्टात्मसम्पद्गुणानामालोचनं षष्ठाधिकरणे प्रथमाध्याये क्रियन्ते येषामुपयोगो नेतृत्व-प्रदानसामर्थ्यस्य वर्धनाय आधुनिककालिकवाणिज्यसम्प्रसारणाय च कर्तुं शक्यते। परिचयः कार्यते तावत् एतैः राजगुणैः सह- १) उच्चवंशोद्भवः २) भाग्यवान् ३) बुद्धिमान् ४) तेजस्वी

५) ज्ञानवृद्ध-वयोवृद्धयोः आज्ञापालकः

६) धार्मिकः ७) सत्यवादी ८) सत्यप्रतिज्ञः

९) कृतज्ञः १०) उदारः ११) महोत्साही

१२) अदीर्घसूत्री १३) दुर्बलसामन्त-परिवेष्टितः १४) स्थिरसङ्कल्पी १५) उदारस्वभावैर्मन्त्रिभिः परिवेष्टितसभा-सद्युक्तः १६) शिक्षाभिलाषी च राजा सर्वथा जनानां नैकट्यं प्राप्नोति।

१) ज्ञानाभिलाष्यम् २) श्रवणम् ३) ज्ञानाहरणम् ४) धारणम् (अविस्मरणम्) ५) पूर्णोपलब्धिः ६) युक्तिभिर्निर्णयग्रहणम् ७) असत्यमतपरिहारः

८) तत्वान्वेषणञ्च प्रज्ञागुणाः राज्ञः।

१) वीरत्वम् २) अक्षमा ३) शीघ्रता

४) दक्षताथ राज्ञः उत्साहगुणाः सन्ति।

१) वाग्मी, २) निर्भिकः ३) स्मृतिमान्

४) बुद्धिमान् ५) बलवान् ६) उच्चाभिलाषी ७) सत्यसन्धाता ८) शिल्पचर्चाकुशलः

९) निर्व्यसनिकः १०) सेनानेतृत्वकुशलः ११) नीतिशास्त्रविधानानुसारं प्रत्युपकारी १२) अपकारस्य च प्रतिशोधी १३) लज्जाशीलः १४) विपत्तिकाले स्वाभाविकावस्थायाञ्च योग्यकार्यसाधनोपायग्रहणसमर्थः १५) दुरदर्शी १६) उपयुक्तस्थाने काले च योग्यपुरुषार्थेन कार्यसम्पादने आग्रही, १७) सन्धिविग्रहयोः

१८) त्यागसंयमयोः १९) प्रतिज्ञापालन-छिद्रान्वेषणयोश्च पार्थ्यक्यमवगन्तुं समर्थशाली २०) मन्त्रणारक्षकः २१) अनशोभनीयहासः २२) सरलभ्रुकुटि-हीनः २३) कामविजयी २४) क्रोधविजयी २५) लोभविजयी २६) कठोरताहीनः २७) चपलताविहीनः २८) अनुपद्रवी २९) खलस्वभावमुक्तः ३०) स्मितहासभाषी ३१) गम्भीरभाषी ३२) श्रेष्ठजनोपदेशाचारी च राजा विशिष्टात्मसम्पद्गुणसम्पन्नो भवति।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

**5. नियन्त्रणम्-** राष्ट्रस्य सर्वेषु सांगठनिकविभागेषु वैयक्तिकविषयेषु वर्तमानेषु प्रशासनिकक्षेत्रेषु च नियन्त्रणं नाम कोऽपि प्रशासनिकविधिः कार्यं करोति। सुनिश्चितयोजनया परिचालितलक्ष्यमधिगन्तुं सांगठनिकविषयस्य व्यक्तिविषयस्य पारदर्शितायाः च परिमापणपरिशोधनयो विधिरेव नियन्त्रणमित्युच्यते यत्र १) गुणवत्तायाः प्रतिष्ठा, २) गुणवत्तानुसारं पारदर्शिताया मूल्यायनं ३) असमतायाः संशोधनं चेति सोपानत्रयम् अन्तर्भवन्ति परिस्थित्यनुगुणं व्यवस्थां परिकल्पयितुं शक्नुयादिति विचिन्त्य कौटिल्यकाले राष्ट्रस्य सर्वविधवार्तामवगन्तुं राजा गुप्तचराणां नियोगं करोति स्म। अपराधनियन्त्रणार्थं विचारकाणां (धर्मस्थानां) नियोगस्तत्कर्तव्यानि राष्ट्रे प्रयुज्यमानानां विचारसम्पर्कितविधीनाम् आलोचनप्रसङ्गे नियन्त्रणमूलककार्याणि च धर्मस्थीयनामके तृतीयाधिकरणे विंशतिषु अध्यायेषु सम्यग्विवेचितानि सन्ति। तथैव अपराधिनाम् अपराधप्रवृत्तिनियन्त्रणार्थं कण्टकशोधननामकम् अधिकरणं प्रकल्पितं यत्र त्रयोदशसु अध्यायेषु अपराधनियन्त्रणविधीनामालोचनं कृतम्। अमात्यपदमर्यादाविशिष्टानां प्रदेष्टनामकपदाधिकारिणां नियोजनम्, अपराधनियन्त्रणे तत्कार्यविधीनामालोचनं, संस्थाध्यक्षस्य वाणिज्यिकापराधनियन्त्रणकार्यविधीनां, समाहर्तृनियुक्तगुप्तचरैः करणीयानाम् अपराधिनिग्रहणविधीनां चालोचनं, प्रकरणेऽस्मिन् सम्यग्विवेचितम्। पुनश्च पञ्चमाधिकरणे राजद्रोहिलोकानां निर्मूलनोपायानां कथनेन परिस्थितिनियन्त्रणस्य, अर्थसङ्कककाले राजकोशस्य कौटिल्यकालिकयोः उद्योगवाणिज्ययोश्च नियन्त्रणमूलकव्यवस्थावलीनां च आधुनिककालिकवाणिज्यिकगुरुत्वम् अस्ति एव।

कौटिल्यकालिकोद्योगवाणिज्ययोः अध्ययनलब्धसारोऽयं यत् तस्मिन् काले राष्ट्रियोद्योगानां राष्ट्रियवाणिज्यस्य च परिचालनं राजनियोजिताधिकारिभिर्विहितं येन उद्योगवाणिज्ययोर्विषये अपराधनियन्त्रणेन सुस्थिरोद्योगस्थितिं सुस्थिरवाणिज्यस्थितिं च निर्मातुं प्रयत्नः कृतः। उद्योगक्षेत्रे कर्मान्तेषु दक्षतानुगुणं जनानां नियोजनं, सामर्थ्यानुगुणं कर्मविभाजनम्, अन्ताराष्ट्रियसौहार्द्यवर्धनेन वाणिज्यक्षेत्रस्य परिवर्धनम्, शुल्कहासादिभिः वाणिज्यिकक्षेत्रस्य क्रेतृविक्रेतृणां वणिजाम् उत्साहवर्धनेन अर्थनैतिकप्रगतिपरिकल्पनञ्च इत्यादिविषया आधुनिकोद्योगवाणिज्ययोः समुन्नयनाय च राष्ट्रियार्थिकविकाशाय च सुफलप्रदायका एव सन्ति।

## सहायकग्रन्थाः


- अग्निपुराणम् (भाषानुवादसहितम्) पुञ्चाननतर्करन (सम्पा.); नवभारत पब्लिशर्स, कलिकता, शकाब्दः १८१२
- अथर्ववेदसंहिता : विजन बिहारी गोस्वामी (सम्पा.) हरफ प्रकाशनी, कलकाता, चतुर्थप्रकाशन २०००

ISSN : 2583-2271
Vol. - 2, No. 1: 2022


- ऋग्वेदसंहिता (वङ्गभाषानुवादसहितम्, खण्डयम्) आब्दुल आयीय आलू आमान्(सम्पा.) हरफ प्रकाशनी, कलकाता, चतुर्थमुद्रणम् २०००
- कामन्दकीयनीतिसारः एम. बन्दोपाध्याय (सम्पा.) संस्कृतपुस्तकभाण्डार, कलकाता, पुनर्मूद्रित संस्करण १९९९
- कुमारसम्भवम् : वासुदेवलक्ष्मण शास्त्री पणशीकर (सम्पा.) ; नाग पब्लिशर्स, दिल्ली, पुनर्मूद्रित १९८५
- कौटलीयार्थशास्त्रम् (संस्कृतमूल टिप्पणीविविधानुबन्धैः समलङ्कृतम्) एन्. एस्. वेङ्कटनाथाचार्य (सम्पा.); प्राच्यविद्यासंशोधनालय मैसूरुविश्वविद्यालयः, मैसुरु, १९६०
- कौटिलीय अर्थशास्त्र (असमीयानुवादसहितम्) रजनीकान्तदेवशर्मा (सम्पा.) ; असम प्रकाशन परिषद्, गुवाहाटी, तृतीयसंस्करणम् २००३
- कौटिलीयम् अर्थशास्त्रम् (श्रीमूलाख्यया व्याख्यया सहितम्) : त. गणपति शास्त्री (सम्पा.) ; राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, प्रथमप्रकाशनम् २००२

 ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# लेखकानां कृते निर्देशावलिः

- मनीषाख्यायां संस्कृतशोधपत्रिकायां संस्कृतसम्बन्धिविविधतत्त्वानामेव प्रकाशनं भवति।
- अस्यां पत्रिकायां संस्कृतभाषायां देवनागरीलिप्यां च लिखिताः शोधप्रबन्धा एव गृहीता भवन्ति।
- प्रेषितेषु शोधलेखेषु विद्वद्भिः परीक्षिताः शोधलेखा एव स्वीकृता भवन्ति। लेखानां चयने संशोधने परिवर्धने च सम्पादकमण्डली एव प्रमाणम्।
- मनीषाख्यायां शोधपत्रिकायां प्रकाशनार्थं प्रेषिताः शेधलेखाः शुद्धाः, मौलिकाः, प्रामाणिकाः, अन्यत्र कुत्रचित् पूर्वम् अप्रकाशिताश्च स्युः। एतदर्थं लेखकाः प्रमाणपत्रमेकं प्रयच्छेयुः।
- शोधप्रबन्धः २०००-२५००संख्यकैः शब्दैः लिखितः स्यात्।
- मनीषाख्यशोधपत्रिकायाः कृते शोधलेखस्य मूलप्रतिः प्रेषणीया। हस्तलिखितलेखाः छायाप्रतयश्च नैव स्वीक्रियन्ते। केवलं शुद्धटङ्किता लेखा एव गृह्यन्ते। A4-परिमिते पत्रे Unicode-आधारितदेवनागरीलिप्या (Sanskrit 2003, Lohit Hindi, Kalimati) अधोनिर्दिष्ट-अक्षरमानेन टङ्किताः स्युः। पार्श्वसीमा प्रतिदिशं १-इञ्च् देया।
- प्रबन्धस्य अन्तिमे लेखकस्य नाम, वृत्तिः, सङ्केतः, दूरभाषक्रमाङ्कः, ई-मेलसङ्केतश्च अवश्यं लेखनीयम्।
- **शोधलेखे अवश्यं देयाः अंशाः**
  - शोधशीर्षकम् (यथासम्भवं लघु, विषयवस्तुबोधनसमर्थं च भवेत्) [अक्षरमानम् -१६]
  - लेखकनाम [अक्षरमानम् -१४]
  - प्रबन्धसारः (१५०-२००संख्यकैः अक्षरैः भवेत्) [अक्षरमानम् -१०, italics]
  - कुञ्चीशब्दाः (पञ्च) [अक्षरमानम् -११]
  - विषयः (भूमिकादिरूपेण सज्जितः स्यात्) [अक्षरमानम् -११]
    - बिन्दुः (Points) - [अक्षरमानम् -१२, Bold]
  - सहायकग्रन्थसूची [अक्षरमानम् -११]
- **पादटिप्पणीनियमाः**
  - वेद-उपनिषद्-रामायण-भगवद्गीता-महाभारत-पुराण-अष्टाध्यायीसूत्र-ग्रन्थादिभ्यः मन्त्राणां श्लोकानां सूत्राणां वा उद्धरणे तेषां पार्श्वे एव [वाल्मिकीयरामायणम् ५४/३०-३१] इत्येवंरूपेण कर्तव्यम्।
  - पङ्क्तीनामुद्धरणविषये ग्रन्थः टीकारूपश्चेत् पादटिप्पण्यां मूलग्रन्थेन साकं टीकाया नाम अपि उल्लेख्यम्। यथा–

१कठोपनिषद् १-२-४ मन्त्रस्य शाङ्करभाष्यम्

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

- मूलग्रन्थेभ्यो यदि पङ्क्तयः स्वीक्रियन्ते तदा तद्ग्रन्थस्य नाम, अध्यायनाम, श्लोकसंख्यादिकं च प्रदेयम्।
- आधुनिकग्रन्थेभ्यो पङ्क्तीनामुद्धरणविषये तु ग्रन्थकारस्य नाम पृष्ठसंख्या च प्रदेया।
- पादटिप्पण्युक्तग्रन्थानां विस्तृतं विवरणं ग्रन्थसूचीमध्ये प्रदेयम्।

- **ग्रन्थसूचीनियमाश्च**
  - ग्रन्थकारः। (प्रकाशनवर्षम्)। ग्रन्थस्य नाम। सम्पादकः। प्रकाशनस्थानम् : प्रकाशकः। यथा–

  भर्तृहरिः। (२००७)। वाक्यपदीयम् (ब्रह्मकाण्डम्)। खण्डूडी, सत्यनारायणः (सम्पा.)। वाराणसी : चौखम्बा संस्कृत संस्थान।

- लेखानां प्रेषयाण ई-पत्रसङ्केतः – manisha@sabangcollege.ac.in
- लेखसम्बन्धिजिज्ञासा पूर्वोक्त-ईपत्रसङ्केतमाध्यमेनैव प्रेषणीया।
- यथासमयं लेखः प्रेषणीयः।
- शोधपत्रिकाविषये अधिकज्ञानार्थं https://sabangcollege.ac.in/e-journals/manisha-a-research-journal-of-sanskrit/ इति अन्तर्जालपत्रं पश्यतु।

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

# उद्घोषणा

| | | | |
|---|---|---|---|
| १. | पत्रिकानाम | - | मनीषा |
| २. | प्रकाशनावधिः | - | वार्षिकी |
| ३. | भाषा | - | संस्कृतम् |
| ४. | लिपिः | - | देवनागरी |
| ५. | प्रकाशनस्थानम् | - | सबं-सजनीकान्तमहाविद्यालयः |
| ६. | प्रकाशकस्य नाम | - | स्नातकोत्तरसंस्कृतविभागः |
| ७. | जातीयता | - | भारतीयः |
| ८. | सङ्केतः | - | सबं-सजनीकान्तमहाविद्यालयः |
| ९. | पत्रिकाधिकारिणो नाम सङ्केतश्च | - | प्रो. (ड.) तपनकुमारदत्तः, अध्यक्षः सबं सजनीकान्तमहाविद्यालयः, लुटुनिया, पश्चिममेदिनीपुरम्, ७२११६६, पश्चिमबङ्गः |

अहं प्रो. (ड.) तपनकुमारदत्तः उपरि प्रदत्तं तथ्यजातं यथार्थमिति उद्घोषयामि।

प्रो. (ड.) तपनकुमारदत्तः

अध्यक्षः

सबं-सजनीकान्तमहाविद्यालयः